

इन्दिरा-कीर्ति-कौमुदी

डॉ० रुद्रदेवत्रिपाठी

॥ श्री ॥

इन्दिरा-कीर्ति-कौमुदी

स्वर्गीय-प्रधानमन्त्रि-श्रीमती-इन्दिरा-गान्धी-महाभागायाः
चारु-चरित्र-चित्रिता चम्पू-काव्य-समुदञ्चिता

★

प्रस्तावना-लेखकाः
महामहिम-श्रीरामस्वामि-वेङ्कटरामन्महोदयाः
उपराष्ट्रपतयः, भारतस्य

प्रधानसम्पादकः
डा० मण्डनमिश्रः, प्राचार्यः

★

चम्पूकाव्य-रचयिता
डा० रुद्रदेव त्रिपाठी
एम० ए०, पी-एच० डी०, डी० लिट्०
भूतपूर्वप्राध्यापकोऽनुसन्धान-प्रकाशन-सङ्घायाध्यक्षश्च

★

प्रकाशन-स्थलम्—
श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्
नई दिल्ली-११००१६

प्रकाशकः —
डा० मण्डनमिश्रः, प्राचार्यः
श्रीलालबहादुरशास्त्री-केन्द्रीय-संस्कृत-विद्यापीठम्
शहीदजीतसिंहमार्गः, कटवारिया सराय, नई दिल्ली-११००१६
दूरभाषाङ्काः —६५०८३१

प्रकाशन-वर्षम् १९८६ ई०


प्रथमसंस्करणम्

६०० पुस्तकानि

मूल्यम्

मुद्रकः —पङ्कज प्रिण्टर्स, मौजपुर, दिल्ली-११००५३

विद्यापीठस्य संस्थापकाः



भूतपूर्वप्रधानमन्त्रिणः श्रद्धेयाः श्रीलालबहादुरशास्त्रिमहाभागाः

विद्यापीठ-विषयका विचाराः

हर्षस्येयं वार्ताऽस्ति यद् भारतस्य राजधान्यां दिल्ली-नगर्यां संस्कृत-भवनस्य निर्मितेस्तथैकस्यादर्शरूपस्य संस्कृत-विद्यापीठस्य स्थापनायाः प्रयासं सम्मेलनं कर्तुमभिलषति। इदमेकं शुभं कार्यं, यस्य सम्पन्नतया राजधान्या जीवन एकस्य महतोऽभावस्य पूर्तिर्भविष्यति। मम विश्वासोऽस्ति यदनयोर्योजनयोर्जनतायाः सर्वकारस्य च सहयोगोऽवश्यं प्राप्स्यति।

सम्मेलनस्य कलकत्ताधिवेशने
दिनाङ्क—२ जुलाई १९६१ ई०

—डॉ० **राजेन्द्रप्रसादः**
(भू० पू० राष्ट्रपतिः, भारतस्य)

भवन्तो जानन्ति यद् दिल्लीनगर्याम्—अखिल-भारतीय-संस्कृत-विद्यापीठस्य स्थापना श्रीशास्त्रिभिः कृताऽऽसीत् तथा तैरन्ताराष्ट्रिय-संस्कृत-संस्थानस्य स्वरूपेणास्य विकासस्य घोषणां विधायैका योजनाऽपि निर्मापिताऽऽसीत्! साम्प्रतमिदमुचितं भविष्यति यदनया संस्थया तेषां नाम योजयित्वा तेषां सेवानामेकः स्थायी स्मारको निर्मीयेत। अनयैव दृष्टयाऽहं सम्मेलनस्य तथा विद्यापीठस्य सभापते रूपेणाद्यप्रभृति संस्कृत-विद्यापीठस्याभिधानं 'श्रीलालबहादुर शास्त्री राष्ट्रिय-संस्कृत-विद्यापीठं दिल्ली'-ति विधानस्य घोषणां करोमि।

अस्मिन्नेव प्रसङ्ग इदं घोषयन्त्यप्यहं प्रसीदामि यद् भारतसर्वकारेण दिल्लीस्थं संस्कृत-विद्यापीठमिदं केन्द्रीयसंस्थानस्वरूपेण स्वीये सञ्चालने नेतुं निर्णीतमस्ति। तथा शिक्षामन्त्रालयो विद्यापीठस्य सम्मेलनस्य च पदाधिकारिभिः परामृश्य शीघ्रमेव विद्यापीठस्य व्यवस्थां स्वकीये हस्ते गृहीतुमुद्यतोऽस्ति। मम विश्वासोऽस्ति यच्छिक्षामन्त्रालयोऽस्याः संस्थाया विकासस्य पूर्णं प्रयत्नं विधास्यति।

सम्मेलनस्य स्वर्ण जयन्ती समारोहे
दिनाङ्क—२ अक्टूबरः १९६६

—स्व० श्रीमती-इन्दिरा-गान्धी

विषयानुक्रमणिका

स्व० प्रधानमन्त्रि-श्रीमती-इन्दिरागान्धीमहाभागायाः-

चारु-चरित्र-चित्रितं चम्पूकाव्यम्

इन्दिरा-कीर्ति-कौमुदी

प्रस्तावना

भारतवर्षस्य विविधतायां निलीना 'एकता' अस्माकं राष्ट्रस्य वैशिष्टच-मस्ति। वयं बंगाली-पञ्जाबी-गुजराती-हिन्दू-मुसलमान-सिख-जैन-बौद्धास्तु भवाम एव, परं तेन सह वयं सर्वे भारतीयाः स्मः। अमृतसरे स्थितं स्वर्ण-मन्दिरं, तिरुपतौ विराजितो भगवान् वेङ्कटेशः, मद्रासस्य सेंथोम-गिरिजागृहं तथा दिल्ल्या लालकिला-समक्षं सुशोभितं जामामस्जिदं देशस्य जनानामास्थायाः स्तम्भाः सन्ति। इदमेव सर्वमवलोक्य 'इकबाले'नोक्तमासीत्—

"सारे जहां से अच्छा हिंदोस्तां हमारा"।

महात्मगान्धिना स्वकीयाश्रमस्य प्रार्थना-स्तोत्रेषु गीतोपनिषत्-कुरान-बाईबिलानां तथा पारसीकसमाजस्य आवेस्टायाः समाहारः कारितः।

'स्वर्गीया श्रीमती-इन्दिरा-गान्धी' देशस्यास्याः समरसतायाः समानाया आस्थायास्तथा भावात्मकैकतायाः साक्षात् प्रतिमूर्तिरासीत्। ता अस्य देशस्य वैविध्ये निलीनामेकतां न केवलं सदाऽपश्यन्नेव, अपि तु तदनुकूलमाचरणान्यप्य-कुर्वन्। ता यदा यात्रायां कुत्रापि गच्छन्तिस्म तदा तत्रत्यानि मन्दिराणि गुरुद्वाराणि मस्जिदानि चर्चाणि जैन-मन्दिराणि बौद्धस्तूपादीनि चैकया भावनया द्रष्टुमवश्यं गच्छन्तिस्म तथा तत्र गत्वा प्रसादमाशीर्वादञ्च गृह्णन्तिस्म। अहं स्मरामि यद् दिल्लीनगर्याः स्वामि-मलय-मन्दिरस्य प्रतिष्ठा-समारोहे ताः सर्वैर्जनैः सह भक्ति-भावेन परिपूर्णा भूत्वा भागमगृह्णन्।

ता आचार्यविनोवाभावे - आनन्दमयीमां - स्वर्गीया - श्रीजिद्दूकृष्णमूर्ति-काञ्चीपरमाचार्येभ्यस्तथाऽन्येभ्यः सद्भ्यः परामर्शाय गच्छन्तिस्म।

कलायाः सुरक्षायै तथा समृद्धये तासां प्रयत्नोऽवर्तत। पुरातत्त्वं प्रत्यगाधा-ऽऽस्था तासु स्वाभाविक्यविद्यत।

संस्कृत-विद्यापीठेन सह तासां संस्मरणीयाः सम्बन्धा अवर्तन्त। संस्कृतस्य गद्यैः पद्यैश्च तासां जीवन-चरित्रम् **'इन्दिरा-कीर्ति-कौमुदी'** नाम्नाऽत्र संयोजितमस्ति,

यस्य रचनां विद्यापीठस्याचार्यः **श्रीरुद्रदेवत्रिपाठी** व्यदधात्। डा० त्रिपाठी, अस्य रचनायै वर्धापनामर्हति।

अहमस्मै उत्तमप्रयासायास्य प्रधानसम्पादक-डा० मण्डनमिश्रस्याप्यभिनन्दनं करोमि। मम विश्वासो विद्यते यदयं साहित्यिकः श्रद्धाञ्जलिर्भारतीयसंस्कृतेः राष्ट्रभक्तेः कर्तव्यनिष्ठायाश्च सञ्चारे सहायको भविष्यति।

रामस्वामी वेङ्कटरामन्
(उपराष्ट्रपतिः, भारतस्य)

फरवरी २४, १९८६ ई०

★

प्रधान-सम्पादकीयम्

अस्माकं देश एको विलक्षणो देशः। अस्मिन् देश एकस्मिन् काले सर्वेषाम् ऋतूनां विलक्षणा शोभाऽवलोकयितुं शक्यते। यदा भद्राचुर्यां जना विद्युद्व्यजनं विना स्थातुं न शक्नुवन्ति तस्मिन्नेव समये काश्मीर-वासिनः कम्बलावृता अपि प्रतापकाश्रयं गृह्णन्ति। कन्याकुमारीस्थले त्रयोऽपि समुद्राः स्वेषां सङ्गमस्य रमणीयं दृश्यमुपस्थापयन्ति तर्हि हिमालयस्य पर्वत-शृङ्खलाः श्वैत्येन दर्शकानां मनांसि मोहयन्ति। यस्मिन् काले चैरापूंजी-क्षेत्रे मुशलाधारा वर्षा वर्षन्ति तस्मिन्नेव काले राजस्थानस्य भू-भागः प्रतपति। एकस्मिन्नेव काले देशेऽस्मिन् सर्वेषामेव प्रकाराणां कृषिः सम्पाद्यते। अत्र सर्वविधाः पशवः पक्षिणो वृक्षाश्चोपलभ्यन्ते।

प्राकृतिक-वैलक्षण्यवदेवात्रत्या नागरिका अपि मिथो विलक्षणा वर्तन्ते। गौराः, कृष्णाः, वामनाः प्रांशवश्च। अत्रत्या मानवा अनेका जातीर्धर्मान् भाषा आचार-विचारान् वेष-भूषाश्चाङ्गीकुर्वन्ति।

भारतस्य महापुरुषैर्यच्चिन्तनं दर्शनं वाङ्मयं सहिष्णुतोदारतादीनि चास्मभ्यं दत्तानि तान्येवैतां विविधतामेकतायां परिणमनस्य तत्त्वानि विद्यन्ते। एतेष्वेवास्माकमेकता सुस्थिराऽस्ति, वयमनेके सन्तोऽप्येके स्मः। भवामो नाम वयमुत्तरस्था अथवा दक्षिणस्थाः, पूर्ववासिनः पश्चिमवासिनो वा; अस्माकं तीर्थयात्रा तदैव सम्पन्ना भवति यदा वयं देशस्य चतसृषु दिशासु स्थापितानां चतुर्णामपि धाम्नां द्वारका-जगन्नाथपुरी-रामेश्वर-बदरिकाश्रमाणां यात्राः कुर्मः।

नैतावदेव; भवतु नाम प्रणाल-सलिलेनैवास्माकं स्नानं, परं पात्रस्थे जले—

> **"गङ्गे च यमुने चैव गोदावरि सरस्वति !।**
> **नर्मदे सिन्धु कावेरि ! जलेऽस्मिन् सन्निधिं कुरु ॥"**

मन्त्रेणानेन सर्वस्यापि देशस्य नदीरावाह्य स्नानानि कुर्मः। मान्यतां नाम समस्ताय राष्ट्राय भेद-भावैर्विना जीवन-प्रदाभ्य एताभ्योऽद्भ्यो वयमात्मनोऽभिषेचयन्तः सर्वत्र समानाया आस्थाया आत्मीयताया एकतायाश्चात्मनो गायका अस्य पद्यरूपस्य मन्त्रस्य स्मरणं विधाय प्रान्त-भाषादीनां भेद-भावेभ्य उच्चैरुत्थाय राष्ट्रियैक्येन प्रतिदिनमनुप्राणिता भवामः। किञ्चास्माकं हेमाद्रि-सङ्कल्पः किमस्ति ? राष्ट्रस्य विशाले शरीरे एकस्यात्मनो दर्शनमेव तु विद्यते।

'सङ्गच्छध्वं संवदध्वम्' 'समानो मन्त्रः समितिः समानी समानं मनः' तथा **'समानी व**

आकूतिः समाना हृदयानि'—प्रभृतीन्यार्षवाक्यान्यपि विविधतायामेकताया दृष्टेरेव तीव्रताविधातॄणि वर्तन्ते। समस्तं राष्ट्रमेकया भावनया द्रष्टारः—**"व्यास-वाल्मीक्यश्वघोष-कालिदासाद्याः कवयः, शङ्कर-रामानुज-बुद्ध-महावीर-विवेकानन्दारविन्द-दयानन्द-त्यागराज-पोतन्ना-चैतन्यमहाप्रभु-कबीर-गुरुनानक-रहीम-रसखान-तुलसी-सूर-दादू"**—प्रभृतयो महात्मानः सर्वत्राभेदबुद्धया वर्तनस्य तथैकस्य विराजः स्वरूपदर्शनस्य प्रवृत्तिमस्मभ्यं व्यतीतरन्। एतेषां मूले सा राष्ट्रस्योदारा दृष्टिरस्ति यां कालिदास एतैः शब्दैरभिव्यञ्जयत्—

बहुधाऽप्यागमैर्भिन्नाः पन्थानः सिद्धि-हेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥

—यथा बङ्गेषु विविध-प्रवाहेषु विभक्ता गाङ्गधाराः पद्मादि-नामानि धारयित्वाऽपि मूलत एकस्या एव गङ्गाया धाराया विविधानि रूपाणि सन्ति किञ्चान्ततो गत्वा स्वीया आपस्तेनैव (समुद्रेण) मेलयन्ति, तथैव विविधा भाषा जातयो धर्मा दर्शनान्युपासना-पद्धतयश्चैकस्यैव राष्ट्रस्य चेतनाया विभिन्नधाराः सन्ति तथैताः सर्वा एकेनैव विराजा ब्रह्मणा मेलयन्ति।

अस्माकं देशस्येमां संस्कृतिं सर्वात्मना रक्षितुकामा श्रीमती-इन्दिरागान्धी-महाभागा देशस्यास्याः समरसतायाः समानाया आस्थायास्तथा भावनात्मकैकतायाः साक्षात् प्रतिमूर्तिरासीत्। साधवो महापुरुषा भवन्तु नाम कस्या अपि जातेर्धर्मस्य वा, तान् प्रति श्रद्धाया आदरस्यैकरूपताया निदर्शनं तस्यां महाभागायां नितान्तं व्यराजत्। सा हि त्यागिनां तपस्विनां चरित्राणि वचनानि चैकं स्थायिनं सांस्कृतिकं निधिममन्यत। कला हि वैदिकस्य पौराणिकस्य वा युगस्यास्तु, गुप्तकालिकी भवत्वथवा जैन-बुद्धयुगयोर्भवतु किंवा मुस्लिमकलाकाराणामेवावदानमस्तु सर्वासां सुरक्षायै समृद्धये च सा सर्वदा प्रायतत। पुरातत्त्वानि प्रति तस्या अगाधाऽऽस्था स्वाभाविक्यवर्तत। ईदृशानामेव गुणानां कारणात् समग्रमपि राष्ट्रं तां महाभागामात्मनः प्रतिनिधिं तथा सर्वस्वममन्यत।

प्राचीन-दार्शनिक-चिन्तने तथा भाषाविज्ञानेऽस्य देशस्य ख्यातिस्तु सर्वत्रास्त्येव, परन्त्वस्य प्राचीनं युगं खगोल-विज्ञानेऽपि समृद्धमासीद्। इदं सूचयितुं तया महाभागया नभसि विसृष्टस्य नवीनस्योपग्रहस्याभिधानं खगोल-विज्ञानस्य मनीषिणो नाम्ना 'आर्यभट' इति घोषितम्। इयं तस्याः प्राचीनतां प्रत्यास्थायास्तथा तया सहैव नवीनं चिन्तनं संयोज्य द्रष्टुं वाञ्छैव त्वासीत्।

सर्वासां भाषाणां साहित्यस्य विदुषाञ्च समानभावेन समादरस्तदीयः स्वभाव एव सम्पन्नोऽभूत्। राष्ट्रिय-पुरस्कार-वितरणस्य सूची तस्य प्रमाणमस्ति। स्वर्गीय-प्रधान-मन्त्रि-श्रीमतीन्दिरागान्धी-महाभागाया ईदृश्या प्राचीन-नवीनयोः समन्वयप्रवृत्त्यैवात्रत्याय सांस्कृतिकनिधये कला-साहित्य-योगक्षेमाः (उपलब्धस्य सुरक्षार्थमनुपलब्धस्य च गवेषणायै) सर्वतोमुखा अवसराः प्राप्ताः। तदीयाभिरुदारता-दूरदृष्टि-समरसता-विविधतायामेकतानां प्रवृत्तिभिरेवास्य देशस्य जनता महात्मगान्धिभिः प्रदर्शिते पथ्यग्रेसरी विधायैका राष्ट्रहितोन्मुखी व्यधीयत। इदमेव कारणमस्ति यत्तदीये कार्यकाले प्रत्येकं व्यक्त्या वर्गेण च सम्भूय कर्म विहितम्। खाद्यस्य प्रसङ्गे राष्ट्रमात्मनिर्भरमभूत्, विदेशिमुद्राणामभूतपूर्वो लाभः समजायत, नव-नवा आविष्काराः

सम्पन्नास्तथा राष्टेण समस्ते विश्वे समादरः प्राप्तः। साऽऽसीत्-**'सत्यमेव जयते'**-'श्रम एव जयते'-इत्यनयोः साक्षात् प्रतिमा।

अस्याः कार्यसिद्धेर्मूले तस्या महाभागाया मानवतावादी दृष्टिकोणो विद्यते यो हि तया स्वस्या वंशपरम्पराया अत्रत्याद् वाङ्मयात् तथा शान्तिनिकेतने श्रीरवीन्द्रनाथटैगोरमहानुभावैः प्रतिष्ठापिताद् वातावरणाल्लब्ध आसीत्। स्वर्गीया श्रीमती गान्धी— **न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः'** इति व्यासवचनं स्वीये जीवनेऽवतार्य यथा राजधर्मं निर्व्यूढवती तादृशमुदाहरणमन्यत्र दुर्लभम्।

स्वर्गीयायाः प्रधानमन्त्रि-श्रीमतीन्दिरागान्धीमहाभागाया इममेवैकं सांस्कृतिकं पक्षं यो हि राष्ट्रियताया मूलाधारो वर्तते, प्रत्येकं जनस्य मनसि पूरणायायं लघु-प्रयासोऽस्ति विहितः। ईदृशस्य गुणस्य प्रकाशनमध्ययनं मननं परिशीलनं तदनुकूलाचरणार्थं वातावरणनिर्माणमेवैतस्य राष्ट्रस्य रक्षायाः समृद्धेश्चैकमात्रमुपायो भवितुमर्हति। **"नान्यः पन्था विद्यतेऽयनाय।"**

भारतप्रधानमन्त्रिणः स्वर्गीयायाः श्रीमत्याः इन्दिरागान्धीमहाभागायाः सम्बन्धः भारतीयसंस्कृत्या कलया सभ्यतया सह अतिमधुरः संरक्षणात्मकश्चासीत्। महतः पितुः सन्तानत्वात् तस्या जीवने भारतीयतायाः प्रभावोऽविच्छिन्न आसीत्। विशिष्य प्रधानमन्त्रिपदप्राप्त्यनन्तरं यदा हि विश्वस्मिन् तस्याः सम्मानोऽवर्धत तदा भारतीयतायाः संरक्षणे तस्याः प्रयासोऽनुदिनं दृढोऽभवत्। सैकाऽऽसीन् महनीया प्रधानमन्त्री याऽस्मै राष्ट्राय गतिशीलं नेतृत्वमदात्। उच्चतमवैज्ञानिकोपलब्धयस्तथाः विशालतमौद्योगिकविकासेन साकं नैतिकाध्यात्मिक-विचारप्रमतयौ विश्वेनानेन तस्याः प्रत्येकं निर्णये दृष्टा आसन्। स्वविचारेषु साऽऽधुनिकी वैज्ञानिकी तथा पूर्णहृदयेनाध्यात्मिकी चासीत्। सा तादृशी राजनीतिकी नेत्री सञ्जाता या सर्वथाऽस्य राष्ट्रस्य कृते दत्तचित्ताऽवर्तत। कारणेनानेन तस्या जीवनं राष्ट्रस्यास्यामूल्यनिधिरभवत्। भारतस्य समृद्धिरखण्डता च तस्या जीवनसर्वस्वमास्ताम्। त्यागेन बलिदानेन राष्ट्रसेवया च तस्या जीवनमध्यात्मतत्त्वस्य प्रतीकं सञ्जातम्। शनैः शनैरेतेषां गुणानां समन्वयस्तां राष्ट्रमातृरूपेण विकासयामास। तस्या निधनानन्तरं रूपमेतन् मनसि निधाय भारतीयजना हार्दपूर्णं श्रद्धाञ्जलिं समार्पयन्। परम्परामिमामनुसृत्य **श्रीलालबहादुर-शास्त्री-केन्द्रीय-संस्कृत-विद्यापीठस्य त्रैमासिकानुसन्धान-पत्रिकायाः शोध-प्रभायाः —श्रद्धाञ्जलि-विशेषाङ्केनानेन** तस्याः स्मरणरूपेण संस्कृतजगतः श्रद्धापुष्पाञ्जलयोऽर्प्यन्ते।

इदम्प्रथमतया महानस्मत्प्रधानमन्त्री पण्डितजवाहरलालनेहरूः संस्कृतस्य विकासायाऽऽधारशिलां स्थापयामास। तस्य नेतृत्वे संस्कृतस्य प्रगतिं प्रति भारतसर्वकारो विशेषानुयोज्यः कृतः, संस्कृतायोगस्थापना च विहिता यतो वर्तमानविकसितस्वरूपस्य प्रारम्भः सञ्जातः। तदनन्तरं स्वर्गत—श्रीलालबहादुरशास्त्रिणः पूर्वोद्दिष्टनीत्यनुसारेण दिश्यस्यां विशिष्य प्रयतितवन्तः, यैर्दिल्लीनगरेऽस्मिन् **संस्कृतविद्यापीठं** स्थापितम् यस्यान्ताराष्ट्रियस्वरूपं तैः सङ्कल्पितमासीत्। तेषामेव काले प्रदेशान्तरेष्वपि विद्यापीठानां स्थापनार्थं योजनाः कारिताः। यदैवैषां कार्यक्रमाणां प्रारम्भो जातस्तदानीमेव दैवेन ते परलोकं गमिताः। विषयान्तरेष्विव संस्कृत-विकासेऽपि भारोऽयं प्रधानमन्त्रिणं श्रीमतीन्दिरागान्धिमाश्रयत। शास्त्रिमहाभागानां

निधनादूर्ध्वं डा० सम्पूर्णानन्दस्यानुरोधेनाखिलभारतीयसंस्कृतसम्मेलनस्य, दिल्लीसंस्कृतविद्यापीठस्य च सभापतिपदं श्रीमतीन्दिरागान्धिः स्वीचकार। एतयोः संस्थयोः सा **साभिनिवेशा**ऽऽसीत्। तस्याः परिषदो महामन्त्रित्वेन मया कार्यसमित्या अधिवेशनमेकं तस्याः निवासस्थाने समायोजितमासीत्। समयेऽस्मिन् संस्कृतजगतः सम्मानरूपेण तस्या अभिनन्दनाय विशेषाङ्क एकः प्रकाशितः।

संस्कृत-साहित्यसम्मेलनस्य स्वर्णजयन्तीसमारोहे सा दिल्ली-विद्यापीठं श्रीशास्त्रिणां स्मरणाय समार्पयत् तस्य 'श्रीलालबहादुरशास्त्री-संस्कृतविद्यापीठ'मितिनामकरणं विधाय भारत-सर्वकारस्य शिक्षामन्त्रालयाधीन्ये सञ्चालनाय निर्देशञ्च कृतवती। भाषणसन्दर्भेऽस्मिन् विद्यापीठमिदं श्रीशास्त्रिमहोदयानां सङ्कल्पानुसारेणान्ताराष्ट्रियसंस्थारूपेण परिणमयितुमाश्वासनञ्च प्रादात्। निर्णयेनानेन भारतीयजनानां मस्तकाः श्रद्धयाभिभूताः सन्तः प्रणता अभवन्। यतः प्रकारेणैकेन संस्कृतविद्यापीठस्य सम्यग्विकासाय तद् भारतसर्वकाराधीनस्थं कृतवती। द्वितीयेन प्रकारेण स्वर्गत-श्रीलालबहादुरशास्त्रिणः प्रति श्रद्धाञ्जलिश्चार्पित आसीत्।

एतदनन्तरमेवम्भूता अनेकेऽवसराः प्राप्ताः, येषु संस्कृतस्य भारतीयसंस्कृतेश्च कृते तस्या अनन्यतम आश्रयः प्राप्तः। तस्या एव कार्यकाले राष्ट्रिय-संस्कृत-संस्थानस्य स्थापना सञ्जाता। संस्कृतविकासाय क्रियमाणासु योजनासु वित्तव्ययतालिकायां सूचितः कतिपयलक्ष-मुद्रापरिमितो राशिः क्रमेण कोटिभिर्मुद्राभिः संवर्धितोऽभूत्। तस्या भाषणैः सन्देशैश्च संस्कृतेन लब्धो महानवलम्बः। संस्कृतजगतः सम्मानमर्पयितुं **वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन** सा वाचस्पति-विरुदेन विभूषिता। तस्याः कार्यकाल एव **'विश्वसंस्कृतसम्मेलन'**स्य स्थापना कृता, यस्याधिवेशनद्वयं देहल्यां वाराणस्यां च सम्पन्नमभूत्। **'अन्ताराष्ट्रिय-प्राच्यविद्या-सम्मेलन'**-मप्यत्र देशे सञ्जातं तथा विगतस्याक्टोबरमासस्य दशमे दिनाङ्केऽन्ताराष्ट्रियबौद्धसम्मेलनोद्घाटनं विधाय बौद्धविषयेऽपि सा स्वश्रद्धां प्रकटितवती।

निजरक्षिणामधिकारिणां प्रतिषेधे सत्यपि सा प्रत्येकं विदुषा सम्भूय तान् सभाजयतिस्म। तस्या जीवनं धर्मस्य व्यापकरूपस्य देदीप्यमानं स्वरूपमासीत्। भारतीयधार्मिकास्थाभ्यः सा स्वव्यवहारेण मान्यतामदात्। यां कामपि परम्परां प्रत्याश्रितं प्रत्येकं देशस्यास्य तीर्थस्थान-मुपासनास्थलं वा सा स्वश्रद्धाभक्तिभ्यामर्चितवती। प्रसिद्धसंन्यासिनां महात्मनाञ्च समक्षं सा स्वयं गत्वा ननाम।

भारतीयेतिहासे सम्राड्भिर्धार्मिकपरम्पराभ्यो यः सम्मानः प्रदर्शितस्तस्य दृष्टान्तोऽस्यां शताब्द्यां प्रत्यक्षरूपेण तया प्रदर्शितः, येन धार्मिकसांस्कृतिक-क्षेत्रयोः कर्मनिरतानां मठ-मन्दिरदेवस्थानमस्जिद-गुरुद्वारादि-धार्मिक-स्थानानां गौरवमवर्धत येन हि तत्रत्य-कर्मकरैर्गरिमा लब्धस्तथा धर्मेणाप्युच्चतमप्रतिष्ठा प्राप्ता। स्व-व्यवहारेण सा तान् सर्वानस्तम्भयद् यैर्धर्मनिरपेक्षताया अर्थो धर्माद् दूरवर्तनमिति घोषितम्।

श्रीकाञ्ची-श्रीशृङ्गगिरि-शङ्कराचार्ययोरभिनन्दनसमारोहयोस्तां प्रत्युद्गन्तुमवसरो मया लब्धः। प्रतिवर्षं तस्या निवासस्थाने श्रद्धेयश्रीकाञ्चीशङ्कराचार्याणां श्रीचन्द्रशेखरेन्द्रसरस्वतीपादानां जन्मदिनोत्सवस्तद् भक्तैः संस्थाभिश्चानुष्ठीयमान आसीत् यस्मिन् सा स्वयं भागं

गृहीतवती। श्रृङ्गगिरि-श्रीअभिनव-विद्यातीर्थस्वामिपादानां स्वर्णजयन्ती-समारोहे सा मुख्यातिथिरासीत् तत्र स्वयमागत्य सा स्वामिपादानां विषये स्वभक्तिमर्पितवती। वर्षद्वयात् पूर्वमपि श्रीश्रृङ्गगिरिस्वामिनां सान्निध्ये समायोजिते विद्वत्-सदसि सा विद्वद्भ्यो राङ्कव-पुरस्कारादिकं व्यतरत्। यस्य समारोहस्य संयोजनसौभाग्यं मया लब्धमासीत्। एवं प्रकारेण विदुषामादरप्रदर्शने तस्या विशेषरुचिरासीत्। आदरणीय-पण्डित-कमलापतित्रिपाठिमहोदयानामाध्यक्ष्ये स्वगृह आयोजिते समारोहे सा वाराणसेयविद्वत्प्रकाण्डानामाचार्य-श्रीपट्टाभिरामशास्त्रिणामभिनन्दनग्रन्थमुद्घाट्य तेभ्यः प्रादात्।

भारतस्य प्रतिष्ठितबुद्धिजीविभिः सह तस्याः साक्षात् सम्बन्ध आसीत्। विगतवर्षीयनवम्बरमासस्य सप्तमदिनाङ्के सौभाग्यवशान् मया समायोजिते राष्ट्रियस्तरशालिनि बुद्धिजीविसम्मेलने, आध्यक्ष्यं श्रीपट्टाभिरामशास्त्रिभिः कृतं, तस्योद्घाटनं च स्वयं श्रीमत्या इन्दिरागान्धिमहाभागया कृतं, यस्मिन् तया कृतं भाषणमेकमैतिहासिकं लेख्य-पत्रमभवत्, यस्माद्वयं सर्वे बुद्धिजीविनः प्रेरणां प्राप्नुमः। केवलं पञ्चचत्वारिंशद् निमेषपर्यन्तं तस्या निश्चितकालिकः कार्यक्रम आसीद् यत उत्तरत्र तस्यै, नासीदवकाशः। तथाऽपि तान् सर्वान् कार्यक्रमान् विहाय सार्धघण्टाद्वयं यावद् बुद्धिजीविनां कार्यक्रमेऽस्मिन् सा सन्निहिताऽऽसीत्। विद्यायाः कलायाश्चाद्वितीयमभिनन्दनमिदं सञ्जातं यदस्मद्-राष्ट्रस्य महनीयया नायिकया विहितम्।

इदमस्मद्-दौर्भाग्यं यदस्माभिरनुभूता तया दत्ता च रक्षा तस्या निधनेन क्षयं नीता। मातुर्वात्सल्येन विहीनं राष्ट्रं संवृत्तम्। विशिष्य भारतीय-संस्कृति-संस्कृत-सभ्यता-क्षेत्रेषु कर्मनिरता जना आत्मन आश्रयहीना इवा वगच्छन्ति।

एवम्भूतायास्तपस्त्याग-शौर्यौदार्य-नैपुण्यादि-गुण-गण-मण्डितायाः सुगृहीत-नामधेयाया इन्दिरागान्धिमहाभागाया जीवनचरितात्मिका चम्पूकाव्यस्वरूपा विद्यापीठ-भूतपूर्व-प्राध्यापक-**डॉ० रुद्रदेवत्रिपाठि-निर्मिता** "इन्दिराकीर्तिकौमुदी" संज्ञिका रचना विद्यापीठस्य प्रकाशनपुष्पेषु प्रकाशितेयं नवीन-साहित्य-सौहित्य-सुरभि-सञ्चिता विशिष्य स्वातन्त्र्यस्य पूर्वोत्तरकालयोरितिवृत्तेन, नेहरूवंशेभ्यो राष्ट्रसेवायां विहितस्य महतस्त्यागस्याख्यानेन, काङ्ग्रेस-दलस्य राष्ट्रिय-भूमिकाया ऐतिहासिक-महत्त्व-ख्यापनेन सहैव भारतीयसंस्कृतेर्विविधान् पक्षान् द्योतयति।

इन्दिरागान्धिमहोदयायाः महत आदर्शान् जनं जनं यावत् प्रापयितुं तथा च ततः प्रेरणां नीत्वा स्वदेशस्यान्तरङ्गपरिष्करणदिशि ये प्रयासा विधीयन्ते तान् संवर्धयितुं नव-दिल्लीस्थ—श्रीलालबहादुरशास्त्रीकेन्द्रीय-संस्कृतविद्यापीठेन प्रकाशितेयं स्वर्गीय-प्रधानमन्त्रि-'**श्रीमती-इन्दिरागान्धी**-महाभागायाश्चारु-चरित्र-चित्रिता चम्पूकाव्यसमञ्चिता—"**इन्दिरा-कीर्ति-कौमुदी**" सर्वेषां राष्ट्रिवासिनां साहित्योपासकानां च प्रमोदाय सम्पत्स्यते। श्रीमती-इन्दिरागान्धी संस्कृतस्य संस्कृतेश्च विकासाय सदा स्वयं दत्तावधानाऽवर्तिष्ट किञ्च सर्वसम्भवैः प्रयासैस्तयोरभ्युत्थाने सहयोगमकार्षीत्। तस्या एव महाभागाया दूरदर्शित्वस्यायं परिणामोऽस्ति यद् भारतस्य राजधान्यामन्ताराष्ट्रियतया ख्यातिं प्राप्नुवदिदमुपर्युक्तं विद्यापीठं निर्मितम्, अग्रे प्रवृद्धं तथाऽधुना 'संस्कृत-विश्व-विद्यालय'स्य स्वरूपं प्राप्तुं सन्नद्धं सन्नानाविधानि प्राच्यग्रन्थरत्नानि

संशोध्य, सम्पाद्य नवीनानि निर्माणानि च प्रतिवर्षं समर्पयति ।

अस्माकमुपराष्ट्रपतयो महामहिम—श्री आर० वेङ्कटरामन्-महोदयाः संस्कृतस्य भारतीय-संस्कृतेश्च शाश्वताः संरक्षकाः सन्ति । देशस्य प्रतिकोणं स्वीयानां यात्राणां तथा विभिन्नानां कार्यक्रमाणां माध्यमेन नैतिक-मूल्यानां देशस्याखण्डतैकतयोः स्थापनायां च तेषां योगदानं प्रेरणाया विषयोऽस्ति । अस्य चम्पूकाव्यस्य प्रस्तावनां विलिख्य तेऽस्माकमिमं विनम्रप्रयासं सुषमया मण्डितमकार्षुस्तदर्थमहं तान् प्रत्याभारी वर्ते ।

अहं पुनरप्येकवारमस्या **'इन्दिरा-कीर्ति-कौमुदी'** नामिकाया अभिनव-चरित्र-काव्य-रूपायाः कृतेः रचयित्रे डॉ० रुद्रदेवत्रिपाठिने धन्यवादान् वितरामि येन महाभागेन विद्यापीठस्य प्रकाशनेषु नानाविधा ग्रन्थाः सम्पाद्य संशोध्य न केवलं मुद्रापिता एवापितु सत्यामपि बहुव्यस्ततायां विद्यापीठस्य कार्यमात्मनीनमेव मत्वा समर्पणभावनया समये समये नवीनं साहित्यं विरच्यापि स्वीयं योगदानं विहितम् । डॉ० त्रिपाठिना संस्कृत-जगदाशावद् विद्यते यत् स नैरोग्य-पूर्णेन सुखितेन जीवनेन दीर्घायुषा च स्वीयां सुरभारतीसेवां दीर्घकालं यावत् समर्पयेदिति भगवान् भूतभावनः पूरयेन्मनोरथमस्माकम् ।

—डॉ० मण्डनमिश्रः

विमर्श-वेदिका

—सम्पादकीया

"राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमवरुन्धे राष्ट्रमेव भवत्यात्मने होतव्या, राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमवरुन्धे वसिष्ठः समानानां भवति, ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं सञ्जाता राष्ट्रेणैवास्मै राष्ट्रं सञ्जातानवरुन्धे ग्राम्ये ।।"

(तैत्तिरीय०, काण्ड०३, प्र०४, अनु० ८-९)

भगवत्याः श्रुतेरयं राष्ट्रिय उद्घोषो राष्ट्रं प्रति सर्वानपि मानवान् सञ्जीवनमन्त्ररूपेण निष्ठायै प्रेरयति कर्तव्यं प्रत्युत्साहयति, राष्ट्रियैर्विचारनिचयैरन्तरङ्गं रञ्जयति कामप्यभिनवां स्फूर्तिमुद्भावयति च। प्राचीना महर्षयोऽहर्निशं यानि पुण्यानि कर्माणि साधयन्तिस्म तानि केनापि स्वार्थेन सङ्कुलितानि नाभूवन्, ते तु राष्ट्रायैव यज्ञ-दान-तपः-स्वाध्यायेज्योपासनादीनि सर्वाणि संसाध्य समर्पयन्तिस्म । 'वसुधैव कुटुम्बक'मित्युद्घोषं को न वेत्ति? 'यत्र विश्वं भवत्येकनीड'मिति वा को न जानाति? एतादृश्येव वचनानि राष्ट्रियता-सम्पोषणाय भवन्ति सम्बल-प्रदायीनि।

भारतीया राष्ट्रियताऽन्येभ्यो राष्ट्रेभ्यः स्वीयां कामपि विशिष्टतां बिभर्ति सा च संस्कृति-संवलिता विद्यते। भारतीया संस्कृतिर्विश्ववारा संस्कृतिरस्ति । अत एव संस्कृतौ संस्कारा-आचारा विचाराश्च सम्भूय विकसिता भवन्ति। उदात्तानादर्शान् संस्कृतिरेव निर्दिशति, सत्याहिंसासहिष्णुतालोककल्याणनिष्ठाकर्तव्यभावनाप्रभृतय आदर्शाः प्राणिमात्रं प्राणवद् विदधति । सैव प्राणवत्ता रक्तधारेव नाडीषु प्रवहन्ती मानवं च राष्ट्रियं कुरुते। तदैव **'राजत इति राष्ट्र'**-मिति व्युत्पत्तिः साधीयसी भवति ।

यदाऽस्माकं देशो वैदेशिकानां यवनानामाङ्लानां चाक्रमणैः कूटनीत्या च दासातापाशे निबद्धस्तदाप्रभृत्येव भयाक्रान्ता भारतीया राष्ट्रियत्वभावनावन्तोऽपि कालं प्रतीक्षमाणा आसन्। नहि सर्वः समयः सर्वदा समानस्तिष्ठति, परिवर्तत एव कालचक्रम् । अत एवात्रापि वैदेशिकानामुत्पीडनान्यसहमाना भारतीया भूयोऽपि जागरिताः, कर्तव्ये पथि निर्भयं प्रचलिताः। स्वातन्त्र्य-प्राप्तये तैर्यो महान् सङ्घर्ष आहितः, यानि महान्ति बलिदानानि कृतानि, याश्च विपत्तयः सोढाः, यावतीनां सम्पत्तीनां विनाशो दृष्टस्तत्सर्वं राष्ट्रियतायाः पुनःप्रबोधनस्यैव फलमभूत्। तदानीं संस्कृती राजनीतिश्च परस्परं समाने अभूताम्। एकदा श्रीमतीन्दिरागान्धीमहाभागाऽप्येवं स्वीयमभिमतं प्राकाशयत्—

मम विचारे राजनीतिः संस्कृतिश्च पृथक् पृथङ् न स्तः । अहं मन्ये, यदस्माकं दैनिके जीवने दैनिकानां कार्याणां प्रत्येकं कोणं संस्कृतेरङ्केन भूषितं भवेत्, इदं च तदैव सम्भाव्यते यदा वयं तां यथेच्छं त्रोटयितुं स्फोटयितुं वा न प्रभवेम, न चेदं कथयितुं शक्यते यद् नववादनात् पञ्चवादनं यावत् कार्यं ततः परं पञ्चवादनान्नववादनं यावत् संस्कृतिरिति । **"संस्कृतिस्तु जीवनस्यैका पद्धतिर्विद्यते जीवनं प्रत्येको दृष्टिकोणो विद्यते ।"**

यदा राजनीतिः संस्कृत्या साम्यं भजन्ती प्रवर्तते तदा सा महनीयतां प्राप्नोति। यथा संस्कृतिः सर्वैरपि समादरणीया भवति तथैव राजनीतिरपि समादरार्हा भवति। इत्थं राजनीतौ सांस्कृतिके पावित्र्ये सति सा सर्वैरपि स्वीक्रियते, तस्यां जनता विश्वसिति। श्रीमती गान्धी तादृशं राजनीतिकं पावित्र्यं कामयमाना सर्वत्र सर्वदा व्यवहरतिस्म।

तस्या अन्तरङ्गं सदा सत्येन राजनीतौ वर्तनस्य सिद्धान्तं प्रकाश्य सामयिकान् तथाविधान् व्यवहारान् कर्तुं प्रेरयतिस्म। भारतस्य राजनीतिके तथा सामाजिके स्वरूपे क्रान्तिपूर्णं परिवर्तनमानेतुं काङ्ग्रेसदलेन भारतीयपृष्ठभूमौ समाजवादस्य दर्शनं दत्त्वा नवीनः पन्था दर्शितः। तमेव पन्थानं परिष्कृत्य पुरो वर्धनाय येषां साधनानामावश्यकता आसँस्तासां व्यवस्थितया पद्धत्योपलब्धये शासनपक्षतः सर्वा व्यवस्थाः श्रीमत्या प्रधानमन्त्रिमहाभागया सम्पादिताः। तत एव क्रमेण देशः प्रगतिमकरोत्। अद्यापि तस्या एव प्रयासात् प्रवर्तितानां कार्यकलापानां सम्पादनेनास्माकं देशः सर्वत्र समुचितं सम्मानं प्राप्नोत्येव। श्रीमतीन्दिरागान्धी महाभागा लोकतन्त्रस्यास्तित्वं न्यायतन्त्रे निर्भरं मत्वा तस्य सौलभ्याय संविधानेऽपि संशोधनानि कारयितुं सङ्कोचं नान्वभूत्। किञ्च धैर्य-साहस-मनोयोग-तन्मयत्वात्मविश्वास-सुदृढ-पुरुषार्थैर्भारतस्य नेतृत्वं साधयन्ती स्वर्गीया प्रधानमन्त्रि-श्रीमतीन्दिरागान्धी वस्तुतो भारतीय-राजनीतेर्महत्युपलब्धिरासीत्। स्वस्यान्तरात्मन आह्वानमनुसरन्ती सा सत्यं, सामाजिकं न्यायं, प्रजातन्त्रं, समाजवादं, धर्मनिरपेक्षतां श्रमञ्च स्वकीय-जीवनस्य ध्येयं निरचिनोत्। महाभागायास्तस्या जीवन-दर्शनं प्राच्यावाच्योः संस्कृत्योः सङ्गमवदभवत् तत्रापि च यत् स्वच्छं जन-मङ्गलकारि विश्वशान्तिविधायि तथा भारतीयसंस्कृतेरादर्शानुरूपं ग्राह्यमासीत् तदेव सांस्कृतिकं सार-सर्वस्वं साऽगृह्णात्। महात्मनां श्रीगान्धिनां पं० जवाहरलालनेहरूणां तथा गुरुदेव-श्रीरवीन्द्रनाथटैगोरमहाभागानां प्रभावैः परिष्कृतं श्रीमतीन्दिरागान्धीमहाभागाया व्यक्तित्वं भारतस्य सांस्कृतिकसूर्यस्य देदीप्यमानेन प्रकाशेनोद्योतितं सर्वतो विसारि प्रभावकारि चावर्तत। भारतस्याध्यात्मिकतायास्तथा पाश्चात्यानां यथार्थवादस्य समन्वयं कामयमाना सा तद् द्वयमपि साम्प्रतिकाय युगायावश्यकं मनुते स्म, यतो हि—'भारतीयाध्यात्मिकता मानवस्य वैयक्तिकप्रयासेभ्य उत्साहदात्री तथा पाश्चात्यो यथार्थवादो मानवस्यार्थिक-सामाजिक-राजनीतिकोन्नतिकरोऽस्तीति।'

श्रीमतीन्दिरागान्धी महाभागा साम्प्रतमस्माकं मध्ये वर्तमाना नास्ति परं तस्याः श्रेयांसि कर्माणि मङ्गलानि प्रस्थानानि चात्र चिरं जीवितानि विद्यन्तेऽस्माँश्च तानि निरतं प्रेरयन्ति। संस्कृतभाषां प्रति स्नेहं धारयन्ती सा श्रीलालबहादुरशास्त्रिणां स्वर्ग-प्रस्थानानन्तरं भारतस्य प्रधानमन्त्रिपदममण्डयत्, तदाप्रभृत्येवाखिल-भारतीयसंस्कृतसाहित्य-सम्मेलनस्याध्यक्ष्यमन्यासां बह्वीनां संस्थानां सम्मेलनानामाध्यक्ष्याणि च सम्पाद्य स्वीयं संस्कृतानुरागं प्राचीकटत्। 'श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठं' तस्या एव महाभागायाः संस्कृतं प्रत्यनुरागस्य फलमस्ति। विद्यापीठस्याधिग्रहणे तथा श्रीलालबहादुरशास्त्रिणां नाम्ना तस्य प्रख्यापनेऽपि सैव महाभागा श्रेयस्वती समपद्यत। तस्याः स्वःप्रस्थानोत्तरं प्रथमे वार्षिकश्राद्धे विद्यापीठपक्षतः श्रद्धाञ्जलिमर्पयितुं विहितविचाराः श्रीमन्तः **प्राचार्या डॉ० मण्डनमिश्रमहाभागा** अनुसन्धान-विभागात् प्रवर्तमानायास्त्रैमासिकानुसन्धान-पत्रिकायाः **'शोध-प्रभायाः' श्रद्धाञ्जलि-विशेषाङ्कं** प्रकाशयितुं निरचैषुः। तस्मिंश्च पूर्वविशेषाङ्कवदेव मान्यायाः स्व० श्रीमतीन्दिरागान्धीमहाभागायाश्चरित्रकाव्यनिर्माणायापि मां प्रैरयन्। अहं च सेवा-निवृत्तिकालस्य नैकट्याद् दोलायित-

मस्तिष्कोऽपि महनीयं कार्यमिदं सपरिश्रमं विधायात्मनः साहित्यिक-श्रद्धाञ्जलिरूपं श्रीमतीन्दिरागान्धी-महाभागायां उदात्तं मुख्यत्वेन सांस्कृतिकं स्वाधीनता-सङ्ग्रामस्य पूर्वापरेतिवृत्ताभ्याञ्च समन्वितं चरित्रं पूर्वनिर्मित—'**श्रीराजेन्द्र-चन्द्रोदय-चम्पू**'वदेव निर्मिमित्सया सन्नद्धोऽभवम्। भवन्त्येव विघ्न-बहुलानि श्रेयांसि कर्माणि। तथैव बाह्या आभ्यन्तराश्च विघ्ना अव्यथयन्नेव। सत्यामपि बहुशो हताशायां भगवत्या इष्टदेवताया अनुकम्पया पूरितमेवेदम्— "**इन्दिरा-कीर्ति-कौमुदी**" नामकं चम्पूकाव्यम्।

यद्यपि चम्पू-काव्यस्य निर्माण-परम्परा दीर्घकालात् प्रवर्तिता सती साम्प्रतं यावन्नैकासु धारासु प्रवहन्ती नैकानि स्वरूपाणि प्राप्तवत्यस्ति तथापि तत्र तत्र निर्माण-विधासु नैकैः कौशलं काव्यकलालङ्काराद्यङ्कन-वैभवञ्च पुरस्कृत्य यथा प्रौढताऽऽनीता तथैव सामान्य-साहित्य-सौहित्य-समाकलनेन बहुभिः सरला सरणिरपि समुद्भाविताऽस्ति। प्रस्तुतेऽस्मिञ्चरित्रात्मके चम्पूकाव्ये मया सरलैव सरणिः समादृता किञ्च स्फुटता पदैर्नापाकृता। गद्यविधाने कौशलापेक्षया वस्तुतत्त्व-प्रस्थापने ध्यानं दत्तम्। पद्येषु विशिष्य राष्ट्र-राष्ट्रिय-राष्ट्रियता-कर्तव्याकर्तव्य-विवेक-सदाचार-सदुद्बोधन-कर्तव्य-परायणत्वादि-विषयाश्च विनिवेशितास्तथा प्रसिद्धेषु वृत्तेषु विचाराणां सङ्ग्रथनं तया रीत्या विहितं येन समये समये सुभाषितोपस्थित्या जनानां मनोरञ्जनेन सहैव तत्तन्मार्ग-कर्तव्यादि-प्रबोधनादिष्वपि तानि पद्यान्युपयोगीनि भवेयुः। स्वयम्प्रवृत्त्या समुपेता अलङ्कारा एवात्र स्थानं प्राप्ताः। हठप्रवृत्तिस्तु नास्त्येव।

समग्रं चरित्रं दशसु कलासु विनिविष्टं विद्यते। कलाश्च तन्त्रशास्त्रोक्ता ब्राह्मीकला-रूपाः। प्रत्येकं कलायां यथावसरं विकला अपि सन्ति यासां शीर्षकाणि प्रसङ्गोचितानि विद्यन्ते। स्वर्गतायाः श्रीमत्या इन्दिरागान्धीमहाभागायाश्चरित्रं नाम भारतस्य भारतीयस्य भारत-स्वाधीनता-सङ्ग्रामस्य भारतीय-स्वतन्त्रतायास्तथा भारतस्य प्रधानमन्त्रित्रय्याः प्रशासन-कौशलस्य स्वतन्त्र-भारतस्य जनताया अथ च नेहरूवंशस्य स्वदेशार्थं विहितानां तपस्त्याग-बलिदानानां सम्मिश्रितं शारद-पूर्णचन्द्रोपमं चरित्रं विद्यते। ईदृशस्य महतश्चरित्रस्य लघुनि काव्ये समावेशः सर्वथाऽसम्भव एवात्र कणेहत्य मुख्यत्वेन प्रेरणाप्रदानां सांस्कृतिक-सुरभि-रसितानां सेवा-सौहार्द-संवलितानां संस्कृत-संस्कार-पुरस्कर्तॄणामेव प्रसङ्गानां साहाय्येन चम्पू-काव्यमिदं चित्रितम्। अत्र वर्णने यत्र तत्र प्रचलितानामाङ्ग्लाद्यन्यभाषाणां शब्दा नामानि च यथायथं स्वीकृतानि सन्ति किञ्च नामसु व्यत्ययो नागच्छेदिति धिया व्याकरण-नियम-शैथिल्यमपि सुगमबोधाय समादृतमिति क्षन्तव्यम्।


अहं प्राचार्यवर्य—डॉ० मण्डनमिश्रमहाभागानां प्रधानसम्पादकानामुदारं सौहार्दं स्मारं स्मारं स्नेहाभिभूतस्तेषामुपकारभरं बिभर्मि यैः सर्वविधेन सौविध्येनाहम् '**इन्दिरा-कीर्ति-कौमुदी**'-नामक-चरित्राञ्चित-चम्पूकाव्य-निर्माणाय तथा सुसम्पादनायोत्साहितः। भगवती पराम्बा परिपूरयेदीप्सितानि सर्वेषां सहकर्तॄणामिति च कामयमानस्तस्या एव चरणयोः कृतिमिमां सश्रद्धं समर्पयामि—

विदुषां वशंवदः
—**रुद्रदेव-त्रिपाठी**
सम्पादकः

श्रीमत्या इन्दिरागान्धिमहोदयाया उत्तराधिकारिणे

भारत-प्रधान-मन्त्रिणे श्रीराजीवगान्धि-महानुभावाय

शुभाभिशंसनात्मकः कमलबन्धः



लोक-शोभन-राजीव-

राज्यमिन्दीवरं महत् ।

इन्दिरा-नयने रुच्यं,

द्रक्ष्यामश्च सुमे सुमम् ॥

—रामचन्द्रः पाद्मनाभिः

1

।। ॐ ऐं ह्रीं श्रीं ह्रींङ्कार-कमलेन्दिरायै नमः ।।

श्रीमती-'इन्दिरा-गांधी'-महाभागाया

जीवन-सुषमा-समलङ्कृता

इन्दिरा-कीर्ति-कौमुदी

□□

या राष्ट्रगौरव-वर्द्धिनी शुचि-कर्म-मर्म-विमर्शिनी,
या त्यागमूर्तिरपूर्वपूर्तिरभूद् भुवः **'प्रियदर्शिनी'**।
या मानवत्व-समत्व-शान्ति-प्रीति-रीतीः सन्ततं,
वर्द्धयन्ती बलिमदात् स्वां सा जयतु सुयशा **'इन्दिरा'**।।

नेहरू-वंश-गगनात्, प्रसूता भुवि भासताम् ।
आचन्द्र-तारकं भव्या !, **'इन्दिरा-कीर्ति-कौमुदी'**।।

□□

—डॉ॰ रुद्रदेवत्रिपाठी

मङ्गल-मालिका

□

सुधा-मधुर-बोधनैरमितदोष-संशोधनैः,
कुमार्ग-गति-रोधनैः सततमेव निष्क्रोधनैः।
वचोभिरतिमञ्जुलैस्तिमिरमान्तरं संहरन्-
महः किमपि संश्रये हृदि मुदाऽऽनतः श्रीगुरोः ॥१॥

.वघ्नौघवारण-परायणमाश्रितानां, कल्याण-कारणमहं करुणा-निधानम्।
ग्लौङ्कारबीजमयमूर्जितशक्तियुक्तं, क्षिप्रप्रसादनगणाधिपतिं नमामि ॥२॥

चञ्चच्चन्द्रकलावतंस-विलसज्ज्योत्स्नाप्रकाशोर्जित-
स्वर्णस्वर्णिभ-रत्नराजिखचितं मातुः किरीटं नुमः।
यस्याभा-प्रसराद् विनिःसृतजगज्जीवातुभूताः प्रभा,
जीवानां बहिरन्तरास्तृततमोराशीन् पराकुर्वते ॥३॥

नेत्राणां त्रितयं रवीन्दु-दहनोद्दीप्तं सदप्येकलं,
दीनेभ्योऽमृतरूपमेव नितरां यत् साधु दत्ते फलम्।
तत्कारुण्य-रसार्द्र-पुण्यमसृणं मातुः शरण्यं नृणां,
संसारार्णवतारणाय निपुणं सद्यो भवेच्छ्रेयसे ॥४॥

या माता ममतामयैः शुचितमैः सम्मण्डिता मन्दिरै-
र्यस्या जीवन-धारयेव विमला व्याप्ता विचारा भुवि।
विश्वासा अपि यत्र शादहरिताः प्रेम्णां कलैः कोकिला,
यां नित्यं प्रणमन्ति भारतमही सा भूतले भासते ॥५॥

अध्यात्मं विमलं स्थिरं प्रतिजनं प्रेम प्रकृत्या श्रितं,
शुश्रूषा च विनेर्ष्यया हृदि दया विश्वास ईशे सदा।
कर्तव्ये पथि निर्भयं प्रचलनं तुष्टिः स्वकीये धने,
येषां वास्तविका गुणा इह जनास्ते कैर्न वन्द्याः क्षितौ ? ॥६॥

निःस्वार्थं निजशासनाय विमलां याच्ञां पुरस्कुर्वता-
मस्मद्-भारतवासिनां समुचितां ये संव्यधुर्नेतृताम्।
मार्गं कण्टकपूर्णमात्महविषा सन्दीप्य याता दिवं,
ते धन्या धवलात्मकीर्तिनिवहा आदर्शरूपा जनाः ॥७॥

राष्ट्र-गौरव-रक्षिण्याः प्रेरणाऽऽनन्दचन्दिरा।
'रुद्रेण' रचिता राजेद्-'इन्दिरा-कीर्ति-कौमुदी' ॥८॥

—डॉ० रुद्रदेवत्रिपाठिनः

[१]

सृष्टि-कला

वन्दे भारत-मातरम्

सुत्रामा॑णं पृथि॒वीं द्यामने॒हस॒ꣳ सुशर्मा॑णमदि॑तिꣳ सुप्रणी॑तिम् ।
दैवीं॒ नावꣳ स्वरि॒त्रामना॑गस॒मस्र॑वन्ती॒मा रु॑हेमा स्व॒स्तये॑ ॥

—तैत्तिरीयसंहिता १-५, ११

□

नियति-समर्पित-सुषमा-चर्चित-सुर-नर-कृत-वरिवस्यां,
धरणितल-स्थित-मणिमय-मन्दिर-मूर्तिरिवाप्त-नमस्याम् ।
सरस-सरित्-सृत-सलिलसुधावृत-पूर्ति-प्रथित-यशस्यां,
गर्वोन्नत-गुरु-गिरिवर-रक्षण-वर्धित-परम-रहस्याम् ।
यस्याः शौर्यमयी शुचिगाथा, शूरं कुरुते कातरम् ।
तामिह वरदां जनगण-सुखदां, वन्दे भारत-मातरम् ॥१॥

□ प्राचीनं भारतभुवः स्वरूपम्

स्वस्ति श्रीश्रीचक्रनगरसाम्राज्ञी-कृपापारावार-परिषिक्ता, सत्य-तपो-जनमहः-स्वर्भुवोभूलोकच्छत्रच्छायाच्छादिता पाताल-रसातल-महातल-सुतल-वितलातलानामुपरि विराजिता, देव-ग्रह-नक्षत्र-राशि-नाग-वृक्षाप्सरः-सिद्धमुनीश्वर-यक्षरक्षोगन्धर्व-किन्नर-गायक-गजेन्द्राश्वादि-सभाजिताऽनन्तब्रह्माण्ड-मण्डलान्तर्वर्तिनी वरुणालयाङ्के तरणिरिव सन्तरन्ती गगनाङ्गणगतचन्द्रमण्डलमिव मण्डयन्ती पूर्वोत्तरगोलार्धाभ्यां स्वकीयं भौतिकं स्वरूपं प्रकटयन्ती प्रभूतान् देशान् प्रदेशान् पर्वतान् नदीर्नदान् वनान्युपवनानि क्षेत्राणि जननिकायान् भूयसो जीवाँश्च स्वान्तः पोषयन्ती रम्या सचित्रा विचित्रा विधातुरनुपमा पृथुला पृथ्वी राजतेतमाम् ।

तस्यामेव पूर्वार्धगोलस्य प्रायो मध्यभागेऽङ्गुलीयकान्तः-खचितमहार्हरत्नवदलङ्कृता रत्नसानोर्मूलात् पयोधेः कूलं यावद्विलसन्ती विश्वस्य विश्वासभूमिरिवोपमहाद्वीपपदवीं प्राप्ता व्याप्ता च विविध-ज्ञान-विज्ञान-प्रज्ञानशालि-

महापुरुष-संसेविता कल्याणामृतवर्षिणी सकल-जीवलोक-प्रहर्षिणी भारत-भूमिर्विराजते। या हि —

अध्यात्मं प्रति जिज्ञासया साहित्यं प्रत्यनुरागेण वीरतां प्रति सम्मानेन च विश्वेषां शिरोभूषणायमाना भारतधरणी प्रकृतेरुदात्ततत्त्वोपदेशानां भाष्याणीव विस्तीर्णा मौनमुखरया भाषया मानवतायाः पन्थानं दर्शयति। अत्रैव भगवान् शेषशायी बालमुकुन्दरूपेण सृष्टेर्विलयानन्तरं निखिलां सृष्टिं बीजरूपां धृत्वा वटपत्रे शेते। प्रतिकणमस्या ज्ञानेनोतप्रोतम्। अत्र हि हिमालयस्य प्राङ्गणे सर्वप्रथमं विश्वसंस्कृतेस्तूर्यघोषोऽगुञ्जत्। न केवलं ज्ञानधर्माविवास्या वैशिष्ट्यं व्यङ्क्तोऽपि तु 'रीति-नीति-भुक्ति-मुक्ति-वैराग्य-भक्ति'-प्रभृतयोऽप्यत्र करान् बद्ध्वा सश्रद्धं मानवतायाः सेवार्थं सन्नद्धाः सन्ति। इयं सर्वतो महती परमोपदेशिका विद्यते। सन्ततेः सन्ततिं यावद् यथावज्ज्ञानं वितरन्तीयम्-'एकया गत्या, एकया मत्या, एकेन रूपेण, एकया सहजतया, एकया समरसतया एकया साधारणीकरणप्रक्रियया च दैविकजीवनस्यैकांशभूतं परमात्मनो निःश्वसितेन सह प्रकाशितं समन्ततः सर्वानैक्यं बोधयति, शक्ति-गुण-विशेषता उद्भावयति रूपं वर्णं च ददाति, आकारप्रकारौ यच्छति तथा तानेकीकरोति।

अनया लक्षशो वत्सराणां स्वकीयेतिहासे प्राक्तनकालस्य शक्तिशालिन्यः सभ्यता उन्नमयन्त्योऽवनमयन्त्यश्चावलोकिताः, किन्तु, ताभिः सह नेयं विनष्टा, अपि तु स्वीययोर्नेत्रयोः पुरतस्ताः सभ्यता धराशायिन्यो दृष्टास्तथोत्तमानुत्तमानि सर्वविधानि दिनानि पश्यन्ती स्वीयमस्तित्वं स्थिरमरक्षत्। इत्थम् —

अनन्त-कालाद् विततं स्वरूपं, सम्प्राप्य विभ्राजित-मूर्तिमत्याः।
भुवो हृदब्जे मधुकोशरूपाऽराजच्छुभा भारतभूमिरेषा॥२॥

□ मध्यकालिकं मातृभुवः स्वरूपम्

इयं भूमिरतीतेषु वत्सरेषु वैदेशिकानां मनांस्याकर्षन्ती तेषां लोभदवानलदग्धा सती तदीयाक्रमण-परितप्ता मध्येकालं खिन्नखिन्नाऽवर्तत। उत्पत्स्यते कोऽपि निजमातुः कष्टजिहीर्षुरिति ध्यायन्ती यथा-कथमपि दुष्कालमिव दुःखकालं व्यत्यगमयत्। प्रथमं यवनानां क्रूरैराक्रमणैस्ततः परं चाङ्ग्लानां वैदेशिकानां व्यापारमुखेन प्रवेशाद् भृशं भारतीयानां दासता-पाश-निगडनेन च नितान्तं व्यथमानाऽपि स्वात्मगौरवं न व्यस्मार्षीत्। आयातः स कालः। भारतपुत्राः पुत्र्यश्च मातुर्वास्तविकं कष्टं विज्ञाय तन्निवृत्तये कृतसङ्कल्पा उदतिष्ठन्। स्वातन्त्र्यायोन्मत्ता दास्यपीडाप्रपीडिताः पर-शासनदोषापवारणाय सर्वस्वमपि विहातुमुत्काः पूर्वं विद्रोहभावनया समुत्थिताः सम्भूय सैनिकान् विद्रोहानाचरन्तः शासकैर्निर्दयं ताडिता मारिताश्च। हविषा कृष्णवर्त्मेव जनानां बलिदानेन प्रवृद्धः स्वातन्त्र्य-सङ्गराग्निः सुतरां व्याप्तः। भारतीयानां हृदयानि रक्तानि च

प्रतप्तानि भूत्वा शौर्येण वैदेशिकान् परास्तुमग्रेसराण्यभूवन्। यतस्तदानीम्—

आसीत् कोऽपि न मानवोऽत्र सततं यो भारतीयावनिं,
पाशान्मोक्तुमिमां समर्पणधिया नैच्छत् तदा सर्वथा।
सर्वस्यापि मुखे व्यराजत वरः स्वातन्त्र्यमन्त्रो नवः,
सर्वोऽपि प्रसभं रतोऽभवदहो ! होतुं स्वकीयां तनुम्॥३॥

शासकानां शस्त्रराशिः क्व क्व च शासितानां शस्त्रसङ्ग्रहः ? सैनिकानां रणकौशलं क्व क्व च जनताया रण-प्रवृत्तिः ? दुष्टानां घातनद्वाराणि कियन्ति कियन्ति च सज्जनानां रक्षणसाधनानि ? महच्छासनं क्व क्व च स्वल्पं राज्य-शासनं ? हस्तिना सह शशकस्य युद्धमिव विद्रोह-सङ्ग्रामो भूयोभूय उद्भूयापि न तावत् साफल्यमवाप यावदासीदभीष्टम्।

तदैव भारतभूमिभक्ता **'यादृशो देवस्तादृशी पूजे'**तिलोक-भणितिं संस्मृत्य बुद्धिकौशलेन वैभवमदमत्तान् विजेतुं चेष्टितवन्तः। जनानां मनोबलं सन्नद्धं, प्रतिनगरं, प्रतिजनपदं, प्रतिग्रामं, प्रतिप्रतोलि, प्रतिगृहं प्रतिजनं च स्वातन्त्र्यप्राप्ति-सन्देशाः प्रापिताः। राष्ट्रियाणि सङ्घटनानि सङ्घटितानि। समाचारपत्राणि प्रकाशितानि। अनेके प्रखरा वक्तारः स्वीयैर्व्याख्यानैः परशासनदुर्नीतीः स्वतन्त्रताया अनिवार्यताश्च प्रकटितवन्तः। इत्थमेकतो रणनीत्याऽपरतश्च सङ्घटनपूर्वकं बुद्धि-वैशद्येन ते वैदेशिकान् भारतं मोक्तुं बाधितवन्तः। ईसवीय-१८५७ वर्षात् स्वातन्त्र्य-युद्धमिदं दाढ्येन प्रवृत्तम्। सकलस्यापि देशस्य मानवा अहर्निशं स्वतन्त्रता-प्राप्तये विकला आतुरा अभिलाषवन्त आस्थावन्त आशावन्त उत्साहवन्तः सन्तोऽपि वास्तविकं मार्गदर्शकं प्रतीक्षमाणा इवाभूवन्।

तेष्वेव दिवसेषु भारतीयानां राजनीतिकाकाङ्क्षायाः परिपूर्तये **श्रीमती एनीबीसेन्ट-श्रीतिलक-गोखले**-प्रभृतिभिरान्दोलन-प्रवृत्तिः प्रवर्धिता। स्वदेशस्य सौभाग्यात् तदाऽफ्रीकातः **श्रीमोहनदासकर्मचन्दगान्धिनो** भारतमुपागताः। प्रारम्भे ब्रिटिशसर्वकारेण सह सहयोगनीत्या राजनीतिकमान्दोलनं तैश्चालितम्। भारतीयाः क्रान्तिकारिणस्तया नीत्याऽसन्तुष्टा आसन्। शनैः शनैः स्वयं महात्मगान्धिभिरप्यनुभूतं यदेते 'काष्ठदेवाः पुष्पपूजाया अनर्हाः सन्ति।' नानाविधान् विधेयकान् प्रस्तूय नवनवानधिनियमान् प्रवर्त्य जनताया दमनमेव कुर्वन्ति। अतस्तेऽपि विद्रोहिणः सञ्जाताः प्रतिकर्तुं च विदेशिशासकानां निश्चित्यापि नवीनं कमप्येकमीदृशमस्त्रं गवेषयन्ति स्म येन 'सर्पोऽपि म्रियेत यष्टिकाऽपि न भज्येत।' तदर्थं तैः सत्याग्रहस्य पन्था उद्घाटितः। सत्याग्रहास्त्रेण सङ्गता भारतीयाः शस्त्रहीना अपि विविधैरान्दोलनैरात्मोत्सर्गमय्या दृष्टया निष्ठया निर्भयतया सङ्कल्पशक्त्या च स्वयंसेवकाः कर्मकर्तारः श्रीगान्धिनो नेतृत्वे 'सत्यं सत्यादवाप्यत' इति दृढं मत्वा विरोधप्रकटनैः कार्यावरोधनैरसहयोगैश्च सत्याग्रह-साधनायां सन्नद्धा अभवन्।

अहिंसा-पालन-पूर्वकं सर्वकारस्यानुचितानि कर्माणि विरुन्धद्भिरन्यायान् प्रत्यात्मनो बलिदानानि कुर्वद्भिरहोरात्रमेकमेव स्वतन्त्रता-प्राप्तेर्ध्येयं ध्यायद्भिश्चान्ते भारतीयैः स्वातन्त्र्यं प्राप्तमेव। अस्मिन् महायज्ञेऽनेकेऽध्वर्यव आसन्, केचन पुरोहिता आचार्या अप्यवर्तन्त, ऋत्विजां सङ्ख्या तु गणनातीतैवाविद्यत। तेषु मातॄणां भगिनीनां वधूनां दुहितॄणां सङ्ख्यापि श्लाघनीयाऽऽसीत्। न केवलं युवानो युवत्यो वृद्धा एवापि तु बालिका बाला अपि तेषु स्वशक्त्यनुसारं सहयोक्तारोऽभवन्। भारतस्य स्वातन्त्र्य-प्राप्तेरितिहासोऽतीव महानितिहासः, शौर्य-त्याग-तपसामितिहासः, सात्त्विकानां बलिदानानामितिहास इति कथने नातिशयोक्तिः।

सोढ्वा घर्षण-कर्तन-प्रतपना-सन्ताडनादीन्यलं,
कष्टैर्भाति सुवर्णमुज्ज्वलतरं सर्वप्रियं गर्वितम्।
हिंसाऽऽपीडन-वञ्चनादिजनितांस्तद्वद्बहून् सङ्कटान्,
सोढ्वैव प्रकृतिं श्रितं निजगुणैः शोभारतं भारतम्॥४॥

तत एव च —

स्वतन्त्र-गगनाङ्गणे रविरुदैत् स्वतन्त्रः पुनः,
समस्त-तमसां ततिः परवशा परास्ताऽभवत्।
विदेशिभिरथास्तृता कपट-वागुरा संहृता,
स्वदेश-वशगा कृता सकल-शासन-प्रक्रिया॥५॥

लोकतन्त्रं भारते रक्षितुं तं भूषयितुं दूषणानि दमयितुं च यो महान् भारः कर्तव्यरूपो दायश्च भारतीय-नेतृषु समायातस्तदर्थं बद्धपरिकरा नेतारः सावधाना अभवन्। कूटनीतिकैराङ्ग्लशासकैर्भारतवासिन एव मुस्लिम-सम्प्रदायाभिमानिनः 'पाकिस्तान'-प्रदानेन विभक्ताः। अखण्डा भारतभूमिः कूटनीत्या भ्रातृषु विभेदमुत्पाद्य खण्डिता। १९४७ ई० वर्षस्यागस्ते मासि चतुर्दश-दिवसस्यावसानकाले पञ्चदश-दिवसस्य चागमनकालसन्धौ मध्येरात्रं भारतं स्वतन्त्रमभूत्। तस्मिन्नेव दिने भारतीय-विधानपरिषदः 'सत्ताहस्तान्तरणाधिवेशनं' सम्पन्नम्। **'वन्दे मातरम्'**-इति भारतमातृगीतेन सह स्वतन्त्र-भारतस्य नवीनो युगः प्रारभत।

तदानीं भारत-वसुन्धरा **'तुष्यतु दुर्जन'** इति न्यायदृशा बहोः कालात् क्रमशो दुर्जनानाक्रान्तृवर्गान् स्वभूभागांशप्रदानेन यथायथं तोषयन्ती कालमहिमानं बलवन्तमनुभूय स्वीयमतीव विशालं स्वरूपं स्वयं स्वात्मनि सङ्कुचन्तीवावर्तत। 'हिन्दुस्तान-पाकिस्तान'-रूपेण विहितोऽङ्गभङ्गश्च तदाऽभून्नितरामसह्यः पीडाकरश्च। तथापि माता पुत्राणां हितं काङ्क्षन्ती स्वीयानुदारानाधारान् न विस्मरन्ती पूर्वां परम्परां परिरक्षन्ती सत्यमेव मातत्वं व्याञ्जयत्। माता शरीरेण

वृद्धा जर्जरा रुग्णा शिथिला कृशा वा भूत्वाऽपि न कदापि पुत्रान् प्रति श्लथस्नेहा भवति। अत एव सा तेषु दिवसेषु यादृशीं स्थितिं बिभर्ति स्म तस्यामेव पुत्राणां स्वातन्त्र्यमाशंसमानाऽऽशीर्भिरभिषिञ्चन्ती प्रसत्तिमेवान्वभूत्।

तदा प्रभृति साम्प्रतं यावदनवरत-श्रम-साधना-कर्तव्यनिष्ठा-नाना-विधयोजनानाञ्चाश्रयणेन भारतमातुर्यत् स्वरूपं भारतीयनेतृभिः संसाधितं समलङ्कृतं सज्जितं संस्कृतं तद् वस्तुतो विश्वस्याग्रतो गर्वोन्नतेन मस्तकेनास्माकं गौरवं वर्द्धयति। साम्प्रतमस्या मातृभुवो विकसद् रूपं किमप्यपूर्वमेवाकलयन्ति तज्ज्ञाः।

□ स्वातन्त्र्योत्तरं मातृभुवः स्वरूपम्

इयं भारतभूमिः संसारस्य सर्वतो विस्तृतमत्यन्तमुर्वरशक्तिसमन्वितं समतल-भूभागं बिभर्ति। एतस्याः सम्पूर्णं क्षेत्रफलं द्वात्रिंशल्लक्ष-वर्गकिलोमिटर-मितं विद्यते। विश्वस्य महत्सु देशेषु सप्तमोऽयं महान् देशः। पश्चिमयूरोपस्य चतुर्विंशतिराष्ट्राण्यस्मिन् समाहितानि भवितुं शक्नुवन्ति। अस्या भुवस्त्रिभिर्महतीभिः सरिद्भिर्हिमालयोऽपि जितस्ताः सन्ति सिन्धु-शतद्रुब्रह्मपुत्राभिधानाः। विश्वस्य सर्वतो महदुर्वरक्षेत्रं गङ्गाब्रह्मपुत्रयोरत्रैव विद्यते। शेषादेशियाखण्डादतस्याः पृथग् वैशिष्ट्यं वर्तते। हिमालयोऽस्या भुवो विशालो जलभाण्डागारः, यो हि कश्मीरतः कामाख्यां यावत् पिपासितां भूमिं जलेन तर्पयति। अस्याः प्रतिवेशिनो देशाः पाकिस्तानाफगानिस्तान-चीन-नेपाल-बंगलादेशाः सन्ति। अन्ताराष्ट्रिया व्यापारानुकूला स्थितिरेकतः स्वेजकुल्यातो यूरोपदेशैर्मेलयति, अपरतश्च मलक्का-जलसन्धित आरभ्य पूर्वभागे चीन-जापानाभ्यां दक्षिणपूर्वभागे चास्ट्रेलियातः सङ्गमयति।

भारतभूमेर्दक्षिणसीमान्तो भागः कन्याकुमार्यन्तरीपः। दक्षिणे भागे निकोबारद्वीप उत्तरे भागे जम्मू-कश्मीरः। भारतस्यार्धो भाग उष्णकटिबन्धवानर्धो भागश्चोपोष्णकटिबन्धवान् वर्तते। अरुणाचलोऽस्याः पूर्वसीमा। एतस्यास्तट-रेखाऽरबसागरो बङ्गखातिका च ययोर्लक्षद्वीपोऽण्डमाननिकोबार-द्वीपसमूहावपि सम्मिलितौ स्तः। भौगोलिकेन महत्त्वेन सहैवात्र जल-विद्युदिन्धन-खनिजौषधीनां भाण्डागारा अपि भुवोऽस्याः समृद्धये विकासं प्रापिताः सन्ति। अत एव चाय-इक्षु-ज्वार-बाजाराभिधधान्य-मुद्गफलिका-तिल-सर्षप-लाक्षाणामुत्पादने प्रथमं, तन्दुल-पट्टांशुकोत्तमधान्येषु द्वितीयं, तमालपत्रातस्युत्पादने तृतीयं तथा गोधूम-कार्पास-कार्पासबीज-क्षौमानामुत्पादने च विश्वस्मिन् विश्वे चतुर्थं स्थानं प्राप्य गौरवं वर्धयति। विश्वजनसङ्ख्यायाः षष्ठो भागोऽस्यां भुवि निवसन् परमां मुदमनुभवन्नात्मन औन्नत्याय प्रयतते प्रयतिष्यते च।

स्वातन्त्र्य-समुदयेन साकमेव प्रजातन्त्रस्य वाञ्छितेषु मूल्येष्वास्थावद्भिर्नेतृभिः परम्परागताय समाजायाधुनिकं रूपं प्रदातुं मानवता-धर्मनिरपेक्षता-समाजवाद-सामाजिक-राजनीतिकार्थिकदृष्टिभिः प्रयतितम् । सत्यपि विघ्नबाहुल्ये प्राकृतिकोपद्रवे प्रतिवेशि-पाकिस्तान-चीनयोराक्रमणे तथाऽऽन्तरिकासन्तोषे सर्वैः सह यथायथं सङ्घर्षरता विजयं प्राप्नुवन्तः साहाय्यं वितरन्तः समस्याः समाहितवन्तो राजनीतिकानि समाधानानि मैत्रीवर्धकानि कर्माण्याचरन्तो भारतनेतृकर्णधाराः प्रशासनाधिकर्तारः सर्वकार-सञ्चालन-पटवो मन्त्रिप्रवरा अन्ये सदस्याश्च मातृभूमेः सर्वाङ्ग-रमणीयं रूपं प्रास्तुवन् । यतो ह्यत्र —

प्राकृतिकसम्पदां संरक्षणाय भू-विज्ञानदृशा मिश्रितकृषिविकासः, खनिजखननापतटवेधनेन्धनतैलादीनामुपलब्धिः, भूधारणप्रथावरोधपूर्वकं भू-राजस्वसंवर्धनं रासायनिकसंरचना कृष्यभूमेरुत्पादनक्षमताभिवर्धनमन्ताराष्ट्रियव्यापारविधये विश्वव्यापिना दृष्टिकोणेन कौशलाभिवृत्तिभिश्चोद्योगानां प्राथमिक-द्वितीयक-तृतीयकादिक्रमेण निर्धारणं तथा तेषामायात-निर्यातयोः समुचितं व्यवस्थापनं पत्तनानां पोतानां यानानां कार्य-दाक्ष्यसम्पादनं भूयसीनां योजनानां माध्यमेन क्रमिकविकाससाधनं जनसुविधानां सुरक्षाणां सर्ववस्तुसौलभ्यानां नवनिर्माणानां ग्रामोन्नतीनां नगरोन्नतीनां यथासम्भवमात्मनिर्भरतानां सिद्धयोऽहर्निशं वर्धमाना एव लक्ष्यन्ते ।

श्रमः शमः शाश्वतशर्मकामना, हृदो विशालत्वमुदारदर्शनम् ।
परस्परं प्रेम च यत्र राजते, वहन्ति तत्रैव सुखप्रवाहाः ।।६।।

कियत् कथयामः, कियद् दर्शयामः कियद् वा प्रतिपादयामः ? बहुमुखोऽयं विकासो विश्वं साश्चर्यं बलादाकर्षयति हठान्मुखरीकरोति साग्रहं स्तोतुं प्रशंसितुं च प्रेरयति । तस्मादेव वयं सश्रद्धं तान् नेतृगणान् स्मरामस्तेषां चरणेषु श्रद्धापुष्पाण्यर्पयामश्च —

राष्ट्रं नः सुसमृद्धमस्तु जनता सर्वा सुखं जीवतु,
सम्पत् प्राकृतिकी विकासमयतामर्थोन्नतिर्जायताम् ।
उद्योगो भवतु प्रगाढगतिमानैक्यं चिरं तिष्ठतु,
स्वातन्त्र्यं दृढमस्त्विति प्रतिपदं यैर्वाञ्छितं तान् नुमः ।।७।।

□ नारी-नीराजनम्

शक्तिः शाश्वतिकी समस्तजगतः क्षेमाय या द्योतते,
सैवाभाति भुवः प्रशस्तपटले नारीस्वरूपाञ्चिता ।
शौर्यौदार्य-दया-क्षमा-धृति-मति-प्रीति-प्रतीकायिता,
मूर्तिः सा महिलामयी स्वमहसा नीराजिता राजताम् ।।।८।।

भारतीय-प्रज्ञायाः प्रथम-किरणस्य भूमाववतरणादारभ्याद्य यावत् प्रवर्तमानमितिवृत्तं साक्षित्वं बिभर्ति यद् वयं सर्वदैव नारीं प्रति नतशिरस आस्म, तस्याश्छायायां लालिताः पालिताः पोषितास्तोषितास्तथा समुन्नता अभूम । प्रजायाः संरक्षणं कुर्वती दुर्वहमुत्तरदायित्वं च निर्वहन्ती माताऽस्माकं समग्रेऽपि जीवने व्याप्ता तिष्ठति स्वीयं प्रन्यासं पदे पदे सा प्रेरयति प्रतिक्षणं किमपि विचक्षणं जीवनोन्नयन-सक्षणं शिक्षणं च वितरति, तत एव तस्या गुरु-पदं 'नास्ति मातृसमो गुरु' रिति शास्त्र-गिरा गौरवेण गीयते ।

मातुः शिक्षामवाप्य ध्रुवो गगनाङ्गणे ध्रुवतामगच्छत् प्रह्लादः सर्वमपि भूमण्डलं प्राह्लादयत्, भूयांस ऋषिपुत्रास्तपांस्याचर्य न केवलं लौकिकमेव, अपि तु पारलौकिकमपि समग्रं जीवनं सफलमकार्षुः। महीयसी मातृशक्तिर्महतां महसां भाजनम्। नवनीतमिव कोमलतमं हृदयं मातुः सर्वास्ववस्थासु विद्यमानं विलोक्यानुभूयैव पूज्याः श्रीशङ्कराचार्या अस्तुवन् —

'कुपुत्रो जायेत क्वचिदपि कुमाता न भवती'ति ।

भारतस्य भावना-शक्तिर्मातृतत्त्वं प्रति यावती विनम्राऽवर्तत तावती विश्वस्य कस्मिन्नपि खण्डे नैवातिष्ठत् । अयमेव देशोऽस्ति यत्र युगेभ्यो **'मातृदेवो भव'**[१] इत्युपदेशोऽदीयत। अस्या एव भावनायाः कारणात् प्रकृतिरूषा चन्द्रिका पृथ्वी दुर्गा गायत्री सावित्री सरस्वती लक्ष्मी देवपत्न्यो यक्षिण्यो नागकन्याश्चोपास्यानां देवीनां रूपैर्नारीणां देवीत्वेनोपासना-काण्डं पुष्णन्ति। अत एव देवा अपि निजगदुः —

विद्याः समस्तास्तव देवि ! भेदाः, स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्, का ते स्तुतिः स्तव्यपरापरोक्तिः ।।[२]

वैदिके वाङ्मये नारी **'ब्रह्मवादिनी-मन्त्रद्रष्ट्री-मेधाविनी-वीरसू'**-प्रभृतिभिरभिधानैः सम्मानिताऽऽसीत्। वैदिकमन्त्रद्रष्ट्रीषु **'रोमशालोपामुद्राऽपाला-विश्ववारा-घोषा-कद्रू-वौलोगी-सिक्तोर्वशी-सावित्री'**-सदृशीनामृषिकाणां पुण्यानि नामानि प्रसिद्धानि विद्यन्ते। **'येनाहं नामृता स्यां किं तेनाहं कुर्याम्'** इत्युद्घोषेण ब्रह्म-

---

१. तैत्तिरीयोपनिषदि । २. दुर्गासप्तशत्याम् ।

वादिनीत्वं स्फोरयद् गार्गी-याज्ञवल्क्ययोराख्यानं वैदिक-नार्या अतीवोन्नतं महनीयं स्वरूपं प्रस्तौत्येव।

पत्युः शुभेषु कर्मसु सहभागिनीत्वात् **'पत्नी'** गृहस्य व्यवस्थासम्पादनत्वाद् **'गृहिणी'** गर्भधारणाद् **'धात्री'** जन्मदाना**'ज्जननी'** जातस्याङ्ग-संवर्धनसहयोगिनीत्वाद् **'अम्बा'** शुश्रूषायां सर्वदा प्रसक्त्या **'शुश्रू'**—रित्यादिनामभिः सम्बोध्या नारी कन्या-वधू-पत्नी-मातृ-दारादि-रूपाणि निर्वाहयन्ती केवलमेतैरेवादरणीयतां न प्राप्नोदपि तु सा जन्मदानात् परं स्वीये कोमलेऽङ्के शिशुं पयः पाययन्ती समग्राममृतायमानां शिक्षामप्यदात्। तस्या दुग्धं केवलं शिशो रक्त-मांसयोः सञ्चय-साधनमेव न भवेदपि तु तस्य प्रत्येकं बिन्दुर्बालकस्य स्वर्णिमं जीवनं सज्जयेदथ च जगत्याः प्राङ्गणे यावन्त्युत्तमानि कर्माणि भवितुं शक्नुयुस्तानि ससुखं सम्पादयेदित्यप्यासीत् तस्या महानभिलाषः।

मातरमद्वितीयस्य गौरवस्य प्रतीकं मत्वा पृथिव्याः प्राकृतिकवस्तूनाञ्च पूजनप्रवृत्तौ नार्या इदमेव लोकमङ्गलं स्वरूपं प्रतिष्ठितमस्ति। अस्मादेव कारणान्नार्या भूमाववतरितानां सकलानां जड-चेतनानां स्वागतमभूद् येषु सरितः पशु-पक्षिणो लतादयश्चापि सम्मानभाजः सन्ति। इयमेवादरास्पदता भारतस्य 'भारतमाता' इति सम्बोधने निदानम्। मातृस्नेहं प्रति परमं सम्मानं समर्पयन्तो भारतीयाः शक्तिरूपेणैव तामामनन्ति प्रथयन्ति च।

साक्षाच्छक्तिरूपं धारयन्तीषु यथावसरं च प्रकटयन्तीषु वैदिकनारीषु विद्युदिव स्फूर्तिद्युतिश्चाभूताम्, तासामिङ्गितमात्रे सृष्टिप्रलयौ सम्भवावास्ताम्, न्यायालयानामधिकरणानि ताभिर्दर्शितेन पथा चलन्ति स्म। सति प्रसङ्गे पत्या सह स्कन्धात् स्कन्धं संयोज्य ता युद्ध्यन्ति स्मापि।

☐ राष्ट्र-रक्षा-दक्षा नार्यः

ऐतिहासके पक्षे शासनकर्त्र्यो महिला अपि वैदिके कालेऽवर्तन्त। जैमिनीयेऽश्वमेधे प्रमीलाऽभिधानवत्या महाराज्ञ्या राष्ट्रं प्रशासितमिति वर्णितम्। तयाऽर्जुनेन सह युद्धं विहितं पराजित्य च तया सन्धिः कृतो विवाहश्च स्वीकृतः। इतिवृत्तप्रथिताया राज्यश्रियश्चरितमतिशयमुदात्तं वर्तते। सिन्धो राज्ञो दाहरस्य पत्न्या आदर्शः परमोज्ज्वलोऽस्ति, अरबाक्रान्तृभिर्युध्यन् दाहरो दिवङ्गतस्तदा तत्पत्नी सङ्ग्राममकरोत्, भोज्यादीनां समाप्तौ च साऽन्याभिर्महिलाभिः सह चिताप्रवेशमकार्षीत्। इत्थं देशे निरुपद्रव-व्यवस्थायाः सञ्चालनस्य श्रेयोऽपि नारीणां पक्षे बहुधा प्रतिष्ठितं विद्यते।

इयमेव परम्परा भारतीय-संस्कृतेः सुर-सरितायां प्रवहन्ती साम्प्रतं यावदुपागच्छत्। कर्मठा धीराः सेवापरायणा महिलाः स्वीयं गौरवपूर्णं योगदानं व्यदधुः।

प्रवर्तिते च भारतस्य स्वाधीनता-सङ्गरे साग्रहं सगर्वं सर्वस्वं समर्पयन्तीनां नारीमणीनां संस्मरणानि सत्यमेव बलान्नमयन्ति नः शिरांसि । अस्य देशस्य महतीनां नारीणां गाथाः सुदीर्घा विद्यन्ते । या प्राचीना संस्कृतिः परम्परा चावर्ततात्र देशे तां भारतस्य सुपुत्र्योऽस्थिरयन् न्यासरूपेण च ता अङ्कुरायमाणाभ्योऽग्रिमप्रजाभ्योऽपि तामदुः । इतिहासोऽस्य साक्ष्यस्ति यन्नारीभिः प्रत्येकं क्षेत्रे परमश्लाघनीयः सहयोगोऽदायि । यथा हि —

अनाशि दुर्गया द्विषश्च चण्डिका-स्वरूपया,
करे कृपाणिकाद्वयी धृता ययाऽऽजिधीरया ।
अकारि चाँदबीबि-संज्ञयाऽतिशूरवीरया,
प्रतीप-सैन्य-मर्दनं स्वदेश-रक्षण-क्षणम् ॥९॥

रणाङ्गणेऽसिमुष्टिका रराज झाँसि-शासिका,
शिशुं निबद्धच पृष्ठतः स्वदेश-रक्षणातुरा ।
गुरुण्डगण्डखण्डने प्रचण्डशौर्य-मण्डना,
स्वतन्त्रता-महारणे प्रधाननेतृतां श्रिता ॥१०॥

पतिं सुतं धरां धनं स्वकीय-बन्धु-बान्धवान्,
स्वमातृभूहिताय वै सुखेन या व्यसर्जयन् ।
स्वयं प्रियानसूनपि स्वदेश-वेश-रक्षणे,
विहस्य सङ्गरे बलिं व्यधुर्न शीलतामदुः ॥११॥

एतदेव नैव, जीवनस्य सर्वस्मिन् क्षेत्रे नार्या अपूर्वो योगः साहस-शक्ति-तपस्त्याग-विराग-विजृम्भितः प्रत्यभात् । यदा स्वदेशस्यास्य दास्यापास्तये शस्त्रास्त्रयुद्धवृत्तिं विसृज्य भारतीया महात्मगान्धिनो नेतृत्वे सत्याग्रहेण स्वातन्त्र्यसङ्घर्षं उपक्रान्तास्तदा देशस्य नारीशक्तिरपि पृष्ठपदा नातिष्ठत् । शिक्षाविशारदा उदात्तादर्शशालिन्यः परमप्रवीणा अस्य देशस्य नार्यो दुर्गायाः शक्तेः पार्वत्यास्तपसः सीतायाः प्रीतेः सावित्र्याः प्रतीतेर्दमयन्त्या धैर्यस्य तथा शकुन्तलाया दुर्धर्ष-सहिष्णुताया गुणानात्मसात् कृत्यात्मनो बलिदानाय सन्नद्धा अभवन् । धार्मिक-सांस्कृतिक-सामाजिक-परिवेशेषु विद्यमाना अपि राष्ट्रमेवैकं महनीयं लक्ष्यं मन्वाना राष्ट्रियान्दोलने सम्पृक्ताः । निःसन्देहं या महिलाः सुकुमाराः सुकोमलाः स्नेहस्य स्रोतस्विन्य आसँस्ता एवाङ्ग्लानां दुर्दान्तानत्याचारान् सहमानाः कारासु निपातिता दण्डप्रहारैर्जर्जरीकृता घुष्टि-मुष्टिप्रहारैर्नितरां ताडिताः पशुमारं मारिता अपि राष्ट्रस्य स्वातन्त्र्याय सत्याग्रहसङ्गरमात्मसादकुर्वन् । किञ्च —

न देशस्य सीमा न जातेर्विचारो, न वा सम्प्रदायाग्रहस्तत्र कश्चित् ।
न हीनोन्नता दृष्टिरेकं हि लक्ष्यं, पराधीनतापाशमुक्तेर्व्यराजत् ॥१२॥

स्वचिन्ताः समस्ताः पराकृत्य नित्यं, स्वमातुर्महत् कष्टमेव स्मरन्त्यः।
स्वराष्ट्रं समस्तेषु राष्ट्रेषु गर्वोन्नतं मस्तकं वीक्षितुं सप्रयत्नाः ॥१३॥

स्वकीयाधिकारस्य सम्प्राप्तये याः, समालम्ब्य सत्याग्रहास्त्रं वरेण्यम्।
सदा साकमेवात्र पुम्भिः प्रयाताः, स्त्रियोऽप्यस्य देशस्य रक्षार्थमुत्काः ॥१४॥

यदा च देशोऽयं पुनर्जन्मप्राप्त इव नवजीवनदायिनीं स्वतन्त्रतां प्रापत् तदा विशृङ्खलितं छिन्न-भिन्नमिमं देशं सर्वविधया दृष्ट्या सज्जयितुं संवर्धयितुं जातीयान् भेदभावान् विस्मृत्य विस्मार्य चान्तरात्मना स्वदेशस्य नेतारः संलग्ना अभवन्। विदेशिशासने स्त्रीषु पुरुषेषु बालकेषु च यद् नैर्बल्यं व्याप्तमभूत् तदपहर्तुं तेष्वात्मविश्वासं प्रबोधयितुञ्च सर्वेषु क्षेत्रेषु तत्परा अभूवन्। भारतीय-संविधाने नारीभ्यः 'समानोऽधिकारः' स्वीकृतः। तासां चतुरस्रेण सहयोगेन राष्ट्रमिदं सगौरवं नतमस्तकं विद्यते। अत एव —

धन्यं कन्यात्वमाप्य प्रथिमनि पथि प्रीतिपूर्वं चलन्त्यो,
हृद्या विद्या अधीत्य श्रुतिविषयगुणानात्मसात् कर्तुकामाः।
लोकं शोकप्रहीणं निजकृतिततिभिः संविधाय प्रकामं,
रामा रामाभिरामा नतिविषयगताः सन्ति नीराजनायाः ॥१५॥

इदानीमपि परम्परेयमविच्छिन्नतयाऽऽगच्छन्ती स्वच्छतयाऽस्माकं मातृषु, पत्नीषु पुत्रीष्वन्यासु च सम्बद्धास्वसम्बद्धासु वा महिलासु निरन्तरं वर्धमाना विराजमाना च विलोक्यते। अत एव च वयं कामयेमहि —

निखिल-मनुज-जातेर्जीवनस्योन्नतौ या,
विधृत-विविधरूपा, सर्वतो राति योगम्।
उदधिरिव गभीरा, काश्यपीवत् स्थिरा सा,
वितरतु भुवि भक्तिं राष्ट्रियां मातृशक्तिः ॥१६॥

माता राष्ट्रं राष्ट्रमेतच्च माता,
कश्चिद् भेदो नैतयोरस्ति विज्ञाः!।
तस्माद् राष्ट्रं मातरञ्चापि नित्यं,
श्रद्धा-बद्धाः सादरं पूजयेम ॥१७॥

☐

[२]

ऋद्धि-कला

तीर्थराजः प्रयागः

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महेरणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

—यजुर्वेद० ३६।१४-१५-१६॥

आयान्त्यौ ये हिमाद्रेः शुचिशिखरवरात् पावयन्त्यौ वहन्त्यौ,
भिन्नं भिन्नं श्रयन्त्यावथ विकटपथौ प्राप्नुतो यत्र सङ्गम् ।
ते गङ्गा-सूर्यपुत्र्यौ सकलजनगणायैकतां सन्दिशन्त्यौ,
राजेते सङ्गमः स क्षयति कलिमलं तीर्थराजः प्रयागः ॥१॥

भारतं '**नदीनां देश**' इति प्रथितं नामापि धारयति। पर्वतानां पावनेऽभ्योऽङ्केभ्यो निःशङ्कमारङ्कराजं पुनन्त्यः सरितो 'लोकमातर' इति मत्वा समाद्रियन्ते। दैनिकोपयोगादतिरिक्तं कृषिक्षेत्रसेचन-व्यवहारमार्गौद्योगिक-साधन-मत्स्य-समुत्पादन-जलविद्युदुत्पादन-पर्यटन-नौकाविहार-सन्तरणादिषु परमोपयोगितयैतासां लोकमातृत्वं सिद्धमेव। आद्य-मानवसंस्कृतेः पोषणं नदीनां तट एवाभवत्। कतिपय-मरुभागमतिरिच्य प्रत्येकं प्रदेशस्य प्रायः प्रतिशतं सप्ततिमितो भागो नदीनां प्रत्यक्षेण परोक्षेण वा प्रभावेण प्रथितोऽस्ति। आयामाकार-जल-प्रवाहादीनां दृष्टचा सरितां भौगोलिकं राष्ट्रियमन्ताराष्ट्रियं च महत्त्वमपि वर्धते।

वेदेषु महतीनां नदीनां स्तुतिमन्त्राः सन्ति तेषु 'तिष्ठन्त्यः स्रवन्त्यः स्यन्दमानाः कूप्याः सूद्या धार्या'-प्रभृतीनि सम्बोधनानि महत्त्वपूर्णानि विद्यन्ते। एतेषु नामसु सरांसि निर्झराः प्रपाता ह्रदा अपि गुण-धर्मैः समाविशन्ति। भारतस्य महत्यो नद्यो यद्यपि भूयस्यः सन्ति तथापि गङ्गायमुनयोर्नामनी सर्वविदिते स्तः। इमे द्वे अपि भगिन्यौ हिमालयान्निःसृत्य पूर्वं पृथक्-पृथङ्मार्गमनुसरन्त्यौ भारतभुवं परिषिञ्चन्त्यौ प्रयागे पुनर्मिलिते। अनयोर्मेलनस्थली '**सङ्गम**' इति प्रथितिं जगाम। परःसहस्रवर्षेभ्यो भारतीयाः पुण्यशालिनस्तपस्विनो महर्षयो राजान आस्तिकाश्च पुण्येषु पर्वसु दूरदूरादुपेत्यात्र स्नात्वा चात्मानं कृत्यकृत्यं मन्वते।

कविकुलगुरुः कालिदासो भगवतः श्रीरामचन्द्रस्य मुखेनास्य सङ्गमस्थलस्य कियन्मनोहरं वर्णनमकारयदिति मनाङ् निपीतव्यमेव —

"क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ।।
क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ।।
क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः-प्रदेशा ।।
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि ! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ।।
समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ।।"[1] इति ।

□ नेहरू-कुल-कीर्तयः

एतादृशेऽतिमहनीये तीर्थराजे प्रयागे—

समृद्धेः सौख्यस्य प्रसृति-रसितं ज्ञान-गरिम-
प्रशस्तं स्वाराज्योदयभुवमिवानन्द — भवनम्
निधानं नीतीनां यदलमभवद् भारतभुवः,
प्रधानामात्यानां त्रितयजनुषो गौरवयुतम् ।।२।।

तच्चानन्दभवनं नेहरू-कुल-कमल-दिवाकरस्य श्रीमतः **पण्डितमोतीलाल-नेहरू**-महाभागस्य निरन्तर-श्रम-साधना-प्रतिभा-साफल्यस्य विमलं परिणति-फलमभूत् ।

नेहरूपरिवारः किल मूलतः कश्मीराभिजन आसीद् यत्र नैसर्गिकी सुषमा स्वच्छन्दममन्देनानन्देन विलसति । समुन्नता हिममण्डिताः पर्वताः, सलिल-सीकरैर्नृत्यन्तो निर्झराः, समन्ततो रसयन्तः सरसानि सरांसि, सुमनोभिः सुरभितानि विपिनानि तथा कुङ्कुम-क्षुप-मण्डितान्युपवनानि यत्रानुपमं किमप्यपूर्वं सौन्दर्यं किरन्ति ।

ईशवीयाष्टादश्याः शत्याः प्रारम्भे सारस्वत-साधनासम्पन्नानां सङ्ख्यावतां गौरवेणापि कश्मीरस्य महती ख्यातिरासीत् । सन् १७१६ ई० वर्षस्य नैकटिके काले मुगलसम्राट् **'फर्रुखसियरः'** कश्मीरानागच्छत् । तत्र वसत्सु ब्राह्मण-परिवारेषु

---

१. रघुवंश-महाकाव्यस्य १३ सर्गे, पद्यानि ५४ तः ५८ ।

पण्डितस्य **'राज-कौल'**स्य वैदुष्यं प्रतिभावैशिष्टयञ्च दृष्ट्वा सम्राट् तं प्रत्याचकर्ष। सादरं स्वस्यां राजसभायां सम्मानार्हं पदं दातुं सम्प्रार्थ्य स तं राजधान्यां दिल्ल्यामागन्तुं वस्तुं च निवेदितवान्। आगतवन्तं च महत्त्वपूर्णोच्चाधिकारिपदे नियुज्यावासाय तदानीं नगरस्य मध्यतो गच्छन्त्याः कुल्यायास्तटे भवनमेकं तस्मा अदात्। राजकौलस्य सन्ततयः कश्मीरवास्तव्येषु 'नहर'स्य निकटे निवासकारणात् **'कौल-नेहरू'**-रथवा **'नेहरू'**रितिरूपेण ख्यातिं प्राप्नुवन्। मुगलसम्राजः सकाशाद् राजकौलाय भूस्वामित्वरूपेण केचन ग्रामा अपि प्राप्ता आसन् परं दुर्भाग्यवशात् तेषां संरक्षका बहुदिनानि यावज्जीविता नातिष्ठन्। अग्रिमेषु वर्षेषु सम्राजामधिकाराणां ह्रासेन सहैव भूस्वामिताधिकारा अपि क्षीणतां गता अन्ते च नाममात्रायां भुवि भूधारकाधिकारः सीमितोऽतिष्ठत्। पण्डितस्य राजकौलस्य पौत्रौ **'मोसीरामकौल-साहबरायकौला'**वेतेषामधिकाराणामन्तिमौ भोक्तारावभूताम्।

मौसीरामकौलस्य पुत्रः **श्रीलक्ष्मीनारायणनेहरू**र्मुगलशासने-**'ईस्टइण्डियाकम्पन्याः'** प्रथमो वाक्कीलोऽभवत्। तदीयः पुत्रः **श्रीगङ्गाधरो**ऽभूत् स च १८५७ तमेशवीयवर्षस्य विद्रोहकाले देहल्या आरक्ष्यधिकारिपदे कार्यमकरोत्। विद्रोहे तस्मिंस्तस्य सर्वाऽपि सम्पदपहृता वृत्तिश्चापगता। यत्र तत्पूर्वजाः प्रायः सार्धशतवर्षेभ्यः कृतावासा आसन्, सा दिल्ली हठान्मोचिता, स हि सौभाग्यशाल्यवर्तत यतः परिवारं संरक्ष्य शरणार्थिभिः सह निःसृत्य सुरक्षाया अन्वेषणायां स **'आगरा'**-नगरं स्थितः। अस्यैकं कारणमिदमप्यासीद् यन्नेहरूपरिवारः स्वस्थः सुन्दरो गौरवर्णवांश्चासीत्, अतो जनास्तमपि विदेशीयं गौराङ्गं मन्वते स्म। वृषभशकटेनागरानगरं गच्छतोऽप्यस्य परिवारस्यैकां बालिकां गौराङ्गीं दृष्ट्वाऽऽङ्ग्लसैनिकास्तामपहृतां मत्वा गङ्गाधरं पीडितवन्तः परमाङ्ग्लभाषाज्ञानवशात्ततो मुक्तिरभूत्। इत्थं पण्डितो गङ्गाधरनेहरूस्तत्र निवासमारभत। आगरानगरे स्वीयं भाग्यं सौभाग्ये परिणमयितुं चेष्टमानस्य श्रीगङ्गाधरस्यासमय एव चतुस्त्रिंशद्वर्षाणामल्पीयस्यायुषि सन् १८६२ तमवर्षस्य प्रारम्भिकेषु दिनेष्वेव मृत्युरभवत्। तदीया धर्मपत्नी **'जियोरानी'**तेनाघातेन भृशं दुःखिता सती 'विपद् विपदमनुधावती'ति भणितिं स्मरन्ती विगतानागतभय-चिन्तनैर्व्याकुलतामनुभवति स्म। विपदियमीदृश्यासीद् यस्या भारेण भुग्ना अनेके प्राचीनपरम्परानुसर्तारः परिवारा विस्मृतिं प्रापिता अभूवन्। सौभाग्यवशात्तस्या ज्यायांसौ पुत्रौ वंशीधर-नन्दलालौ साहसिनौ प्रबुद्धौ चाभूताम्। परिवारस्य पारवश्यात् पितृपादानां चाकाल एव स्वर्गमनात् स्वयं स्वपदयोरुत्थाय तौ किमपि कर्तुमचेष्टताम्।

परेशानुकम्पया श्रीवंशीधरस्तत्रैवागरानगरे स्वप्रतिभाप्रयासयोराधारेण ब्रिटिश-शासने भूराजस्व-सम्बन्धिनि न्यायालये 'निर्णय-लेखक'स्य पदे नियुज्य कार्यमारभत। स चाग्रे स्वस्य श्रमेण कर्मकौशलेन च वर्धमानः सहायक-न्यायाधीश-

पदं यावदुन्नतिमवाप्नोत्। द्वितीयः श्रीनन्दलालश्च पूर्वं राजस्थानस्य **'खेतड़ी'**-राज्येऽध्यापकपदे नियुक्तः सन् कर्माकरोत् ततः परं च राज्ञः **'श्रीफतेहसिंहस्य'** 'नैज-सचिव'पदे नियुक्तः कालान्तरेण च स मुख्य-मन्त्रित्वमप्याप्नोत्।

यो वै परिश्राम्यति बुद्धियोगात्, कृत्ये प्रयस्यँश्च पुरः प्रयाति।
कुर्वन् सदा कर्म विना प्रमादं, नाप्नोति किं सोऽत्र पदं प्रशस्यम्? ॥३॥

श्रीमतो गङ्गाधरस्य दिवङ्गमनान्मासत्रयानन्तरं सन् १८६१ तमेशवीय-वत्सरस्य मईमासीये षष्ठे दिने श्रीमती जियोरानी तृतीयं पुत्रं प्रासूत। अतः श्रीगङ्गाधरः स्वस्यास्य तृतीयपुत्रस्य मुखं द्रष्टुं नापारयत्। जातकस्याभिधानं ज्योतिःशास्त्रानुसारं **"मोतीलाल"** इति निर्धारितम्। अयमेव पण्डितो मोतीलाल-नेहरूः स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिणः **श्रीजवाहरलालमहोदयस्य** पिता, द्वितीयप्रधानमन्त्रिपदे विराजमानायाः श्रीमत्या **'इन्दिरा गान्धी'**-महाभागायाः पितामहस्तथा तृतीयस्य वर्तमान-प्रधानमन्त्रिणः **श्रीराजीवगान्धिनः** प्रमातामह आसीत्।

श्रीवंशीधरनेहरूः शासकीयः कर्मचार्यभूत्। अतः स्थानान्तराशङ्कावशात् परिवारस्य दायित्वनिर्वाहस्तस्मै न समभाव्यत। तस्मादेव श्रीनन्दलालः श्रीमतो मोतीलालस्य लालनं पालनं खेतड़ी-नगर्यां स्वसन्निधावेवाकरोत्। अयं खेतड़ी-निवासस्यैव प्रभाव आसीद् यन्मोतीलाले बाल्यादेव वैभव-पूर्णस्य जीवन-यापनस्य तथोत्तमोत्तमवस्तूनामुपयोगस्य भावनाऽतितरां बलवत्यभूत्। मातुः स्नेहोऽपि नासीन्न्यूनः। खेतड़ीराज्ये राज्ञः फतेहसिंहस्याध्यापकः **काजीसदरुद्दीन**स्तमपाठयत्। द्वादशवर्षाणां वयोऽवधि श्रीमोतीलालः केवलमारबीं फारसीं चाध्यगीष्ट। फारसी-भाषायास्तदीयं ज्ञानमियद्विशिष्टमासीद् यत्ततोऽधिकवयःशालिनोऽपि तं सम्मान-यन्ति स्म।

श्रीनन्दलालनेहरूमहोदयः प्रायो दशवर्षाणि खेतड़ीराज्ये सेवां कुर्वाणः सुयोग्यप्रशासकत्वेन प्रसिद्धिमगच्छत्। सन् १८७० तमवत्सरस्य नवम्बरमासि त्रिंशत्-तारिकायां राजा फतेहसिंहः स्वान् प्राणानत्यजत्। तदा श्रीनन्दलालेनापि खेतड़ी त्यक्ता। आगरानगरमागत्य स विधिशास्त्रमधीतवान् तत्रैव च प्राड्विवाक-व्यवसायमकार्षीत्। यदोच्चन्यायालय इलाहाबादनगरं गतस्तदा तेन सह सोऽपि तत्रैवागच्छत्।

श्रीमोतीलालः सोत्साहं वर्धमानः श्रीवंशीधरमहानुभावस्य निकटे कर्णपुरे, यत्र स नियुक्त आसीद् एकस्मिन्नुच्चविद्यालयेऽध्ययनमारभ्य प्रथमश्रेण्या उच्च-विद्यालयीयां परीक्षामुदतरत्। अध्ययन-नैपुण्येन सहैव श्रीमोतीलालः क्रीडायां व्यायामे मल्लक्रीडायाञ्चानुरागवानासीत्। आत्मविश्वासेन साहसेन च स वैदेशिकीं

विधाय—**'आनन्द-भवन'**—मित्यभिधानं कृतम् । भरद्वाजाश्रमस्य निकटे राजमानमिदं भवनं सर्वाभिरावश्यकताभिः परिपूर्णं नैसर्गिक-सौन्दर्य-विराजितं गृहारामादिसङ्कुलं राजप्रासाद इवातिरमणीयं सुखकरञ्चावर्तत।

प्रचुरगुणशालिता वाक्पटुत्वं कार्यकौशलं च धारयद्भिः श्रीमोतीलालमहाभागैरसीमितं धनमुपार्जितं तथा तदनुपातेनैव तैर्व्ययोऽपि विधीयते स्म। आनन्दभवनस्य स्वागत-प्रकोष्ठः कस्यापि राज्ञः प्रकोष्ठान्न्यूनो नाभूत्। प्रत्यहं देशीया वैदेशिकाश्चातिथयस्तत्रागत्य यथेप्सितं स्वागतमुपहारञ्चावाप्य नितान्तं मोदन्ते स्म । आङ्ग्लसभ्यतायामापादमस्तकं निमग्ना आङ्ग्लानां योग्यतायां कार्यक्षमतायां चास्थावन्तस्ते 'जीवनं जीवनाये'ति सिद्धान्तमात्मसात्कृत्य जीवन्ति स्म। द्रव्योपलब्ध्या सन्तुष्टास्ते स्वपुत्रमेकदाऽऽत्मनः साफल्यरहस्यं पत्रद्वाराऽसूसुचन्। तैर्लिखितं यन्मम द्रव्योपार्जनसाफल्यमूलमिदमस्ति —

द्रव्यं वाञ्छन्ति भूयः कतिपयमनुजाः किन्तु ते नैव ताव-
च्चेष्टन्ते कर्म कर्तुं श्रम-दम-सहितं, तेन नेष्टं लभन्ते।
कार्यं कुर्वन् नितान्तं परमिह मनुजो यः श्रमं साहसञ्च,
स्वायत्तीकृत्य लक्ष्ये व्रजति भवति तत् तस्य साफल्यमूलम् ॥६॥इति।

आशावाद आत्मविश्वासश्च श्रीपण्डितनेहरूमहाभागानां जीवनस्य महनीयं तत्त्वद्वयमासीत्। परिश्रम-विश्रामयोः कलां जानानास्ते मल्लक्रीडायामश्वारोहणे मनोरञ्जनेऽपि तथैव रसं गृह्णन्ति स्म यथा स्वीयानां विवादोपस्थापकग्राहकाणां विषये पक्षोपस्थापने समर्थने च दत्तचित्ता भवन्ति स्म। स्वाभाविक्या स्वतन्त्रवृत्त्या बहुधा विदेशयात्राः सम्पाद्य वैदेशिकानि सौख्यसाधनानि तथा मृत्तैलयानानि सङ्गृह्य तदानीन्तनेषु प्रसिद्धेषु वाक्कीलेषु प्रथमं स्थानं तेऽलभन्त।

यद्यपि श्रीमोतीलालमहाभागाः अन्तर्मुखेनाभिजात्येन परितुष्टा आङ्ग्लपद्धतिकजीवनेन सम्पन्नाः स्वजातीयानामत्याचारातङ्कयोरुल्लङ्घनकर्तारश्चावर्तन्त, परं ते भारतीयाया आत्मसंस्थायाः संयुक्तपरिवाराद् वियुक्ता नाभूवन्। तेषां भ्रातुर्नन्दलालस्य यद्ऋणमवशिष्टमासीत् तत् ततोऽप्यधिकरूपेण प्रतिदत्तम्। स्वकीयभ्रातृव्यानां लालन-पालनं स्वसन्ततीनामिवैव विहितम्, तेषां धर्मपत्नी स्वरूपरानी परम्परागतसंस्कारवत्यासीत् सा यूरोपीयान् व्यवहारान् स्वीकृत्यापि रूढिगतान् संस्कारान् कथमपि न व्यसृजत्, सा तीर्थयात्रादिषु सादरमनुरज्यति स्म, परं तां पराकर्तुं कदापि श्रीमोतीलालैर्दुराग्रहो न कृतः। एवमेव तेषां भ्रातृजाया-श्यालिकादीनां पुरातन-विचार-व्यवहारेष्वपि हस्तक्षेपस्तैर्न विहितः। एतदासीत् तेषां स्मरणीयं वैशिष्ट्यम्।

सन् १८८९ ई० वर्षे श्रीजवाहरलालस्य जन्मनोऽनन्तरं, १८ अगस्तस्य १९०० ई० दिने स्वरूपरानी द्वितीयां सन्ततिं कन्यां प्रसूतवती, तस्या अभिधानं

निर्धारितम्। हिन्दू-परिवारे पुत्रस्य तथोत्तराधिकारिणो जन्म सुखस्य सर्वाधिकं श्रेष्ठं चिह्नं मन्यते स्म। अतः प्रथमविवाहस्य दुःखदावसानकारणादयमवसरः श्रीमोतीलालायापि प्रसन्नता-वर्धकोऽभूत्।

तेष्वेव दिनेषु कानपुरस्य जनपदीय-न्यायालये त्रिवर्षावधिक-प्रत्याशितायाः कालस्य पूर्तौ तदीया महत्त्वाकाङ्क्षा बलवती समजायत। तदनुसारमेव स इलाहाबादनगरे तत्रत्योच्चन्यायालये स्वव्यवसायं कर्तुं निर्णीतवान्, यत्र ज्येष्ठभ्रातुः श्रीनन्दलालस्य वाक्कीलता-व्यवसायः समुन्नतः समुचितायप्रदश्चासीत्। तत्र गत्वा श्रीमता मोतीलालेन कार्यमारब्धं तथा क्रमश उन्नतिं चाकरोत्। स्वकीयाध्ययन-पटुता-प्रस्तुतिप्रवीणता-स्वाभाविक-निपुणतादीनां वैशिष्ट्याद् मोतीलाल-महाभागस्य वाक्कीलता-व्यवसाये निरन्तरं प्रभावशालित्वमागच्छति स्म। तदैव पुनर्नियत्याः क्रूरप्रहारोऽभवत्। द्वाचत्वारिंशद्वर्षाणां लघीयसि वयसि श्रीनन्दलाल-महोदयस्य सन् १८८७ तमे वर्षे सहसा देहावसानं जातम्। स हि स्वकीयां पत्नीं नन्दरानीं, पुत्रीद्वयं पञ्च पुत्रांश्च विमुच्य दिवङ्गतः। पञ्चविंशतिवर्षायुष्को मोतीलालोऽनेनाघातेनैकवारं पुनरसहाय इवाभूत्। परिवारस्य महद् दायित्वं तस्मिन्नापतत् किन्तु परमेण पुरुषार्थेण कर्तव्यं पालयन् प्रगतिं साधयन् प्रियस्य भ्रातुरभावेऽपि स्वीया महत्त्वाकाङ्क्षाः सफलयन् द्रव्योपार्जनाय स्वं व्यवसायमुन्नमयंश्च भृशं पर्यश्राम्यत्। यतो हि--

श्रम-रुचि-कृतिनिष्ठा आत्मकर्म-प्रतिष्ठा,
समुचित-विधि-बोधः कौशलं नो विरोधः।
प्रतिपदमुदयेच्छा हार्दिकी वृत्तिरच्छा,
मनुजमहरहस्ता उन्नतौ संनयन्ति ॥५॥

तरुणो विधिविशेषज्ञः श्रीमोतीलाल उन्नतिशिखरारोहणे सौभाग्यवानासीत्। दीर्घसङ्घर्षं विनैव स आत्मव्यवसाये परामुन्नतिमलभत। विधिशास्त्रीयाणां नियमानां ज्ञानं तदीयमुत्कृष्टमासीत् तथोत्तराधिकारसम्बद्धानां हिन्दू-विधीनां सोऽद्भुतं प्रावीण्यमधारयत्। लाखन-राज्यस्योत्तराधिकारविषयके व्यवहार[1] एव स पर्याप्तं धनं प्राप्तवान्। सन् १८९० तमे वर्षे प्राचीनमावासं त्यक्त्वा स **'सिविल-लाइन्स'**-स्थिते भवने वस्तुमागच्छत्, यत्र यूरोपीया यूरेशियनाश्चावसन्। सन् १९००तमे हायने श्रीमोतीलालनेहरूमहाभागो विधिशास्त्रव्यवसाये चरमं सीमानमारूढः, आयस्य स्थितिर्या प्रारम्भिके व्यवहारे पञ्चरूप्यकात्मिकाऽऽसीत् सैव तदानीं प्रतिमासं दशसहस्ररूप्यकप्रदायिनी संवृत्ता। तदानीमेव स एकं विशालं प्राचीनं भवनमक्रीणात्। तस्य भवनस्य स्वरुच्यनुसारं परिष्करणं परिवर्धनं च

---

१. लाखनराज्यात् प्रतिमासं सार्धद्विसहस्रमुद्राः प्राप्यन्ते स्म।

भाषां मनोयोगपूर्वकं पठति स्म। जिज्ञासा तथा जीवनं प्रति तस्याभिरुचिः परिपूर्णाऽवर्तत । इलाहाबादनगरस्य 'म्योर-महाविद्यालये' तदीयं छात्रजीवनं किमपि शैक्षणिकदृष्टया महत्त्वपूर्णं नासीत्। उपाधिपरीक्षायां प्रविश्यापि स प्रथमपत्रं प्रत्यसन्तुष्टो भूत्वाऽग्रे परीक्षादानेऽनुत्साहितोऽभूत् । एवं महाविद्यालयस्याध्ययने निरुत्साहवानपि स प्राचार्य'**हेरिसन**'स्य तथाऽन्येषामाङ्ग्लप्राध्यापकानां सम्पर्केण निर्माणकारि-प्रभावेणाभिभूतः सुतरां स्वजीवनं प्रति विवेकपूर्णां तार्किकीं संशयशीलां दृष्टिं तथाऽऽङ्ग्लसंस्कृतिं वैदेशिक-संस्थाः प्रति च गभीर-प्रशंसाभावं सम्प्राप्तवान् । विश्वविद्यालयस्य शिक्षा मोतीलाले पुस्तकीयज्ञानस्य भारमारोपयितुं यद्यपि समर्था नाभवत् तथापि तया पश्चिमस्य व्याप्तायाः संसृतेर्गवाक्षोद्घाटने साहाय्यमवश्यं दत्तम् । यतो हि --

सम्पर्कोऽज्ञजनानामवगमयति मानवं सदा सत्यम् ।
सम्पर्कः सुजनानामुन्नयति च जीवनं सत्ये ।।४।।

एकस्मै नवयुवकाय, य उत्तराधिकारे न धनं न च भूमिं प्राप्नोत्, तस्मै — स्वाध्ययनं प्रति क्रीडनमिदं समुचितं नासीत्, किन्तु सौभाग्यान्मोतीलाल आत्मानं यथासमयं समधारयत् । स विधिविद्रो व्यवसाये गन्तुं निरचिनोत्, यतस्तस्मिन् ज्यायसा सहोदरेण श्रीनन्दलालेन साधारणं साफल्यं प्राप्तमासीत् । मोतीलालनेहरूविधिशास्त्रस्याध्ययने कठिनं परिश्रमं कृतवान् फलतः परीक्षायां सफलेषु च्छात्रेषु स प्रथमं स्थानं लब्धवान्। स स्वपरिवारस्य सुहृदस्तथा वरिष्ठस्य विधिशास्त्रज्ञस्य छत्रच्छायायां सन् १८८३ तमे वत्सरे कानपुरनगरे वाक्कीलता-व्यवसायं प्रारभत ।

कश्मीरवासिब्राह्मणेषु तदानीं बालविवाहस्य प्रथाऽवर्तत । श्रीमोतीलालस्य विवाहोऽपि तथैव बाल्य एवाभूत् किञ्च विंशति-वर्षायुषि तस्यैकः पुत्रोऽपि समुत्पन्न आसीत् परं तस्य विवाहस्यान्तः दुःखदावस्थायामभवद् यस्मिन् मातुः पुत्रस्य च मृत्युरभूत् । तदनन्तरं श्रीमोतीलालस्य द्वितीयो विवाहोऽपि शीघ्रमेव समपद्यत । '**स्वरूप-रानी**' तस्य द्वितीया पत्नी नेहरू-जनेभ्यो भिन्ना 'ठुस्सू'-परिवारस्यासीद्, यस्तेष्वेव दिवसेषु कश्मीरान् परित्यज्य समतलायां भूमौ प्रवास्यवर्तत। शरीरेण स्वस्थाऽऽकृत्या रमणीया प्रकृत्या मृदुला च सा पूर्णरूपेण मनोहरा सर्वाङ्गेण च समाऽविद्यत।

रमणीयसर्वाङ्ग्याः कोमलाङ्ग्याः स्वरूपरानीमहाभागायास्तथा प्रसन्नचेतसः स्वस्थस्य श्रीमोतीलालस्य युगलमतीव सुखदमभूत्। कियन्तिचिद् वर्षाणि तयोः सुखेन व्यतीतानि। ततः परं स्वरूप-रानी स्वस्या अस्वस्थतायाः कारणाच्चिरं खिन्नेवातिष्ठत् । तस्य प्रथमः पुत्रो जीवनं न प्रापत्। १४ नवम्बर १८८९ तमे वर्षे तस्या द्वितीयस्य शिशोर्जन्माभवत् । तस्याभिधानं '**जवाहरलाल**' इति

'सरूप' इति निश्चितं किन्तु गृहव्यवहारस्य नाम **'नन्नी'** इत्यासीत् तदेव यूरोपीय-संरक्षिकाया आकारणया **'नन'** इति सम्पन्नम्। सन् १९०५ ई० वर्षेऽत्यधिकमानन्दोत्सव आयोजितः, यदा विचित्रसंयोगवशाज्जवाहरलालस्य जन्मतिथावेवैकस्यान्यस्य पुत्रस्य जन्माभूत् किन्त्वयमानन्दश्चिरं नास्थात्, स शिशुरेकमासाभ्यन्तर एव दिवमगच्छत्। वर्षद्वयानन्तरं सन् १९०७ ई० वर्षे नवम्बरमासस्य द्वितीये दिने पुनः कन्याजन्माभवद् यस्या नाम **'कृष्णा'** इति निर्धारितं गृहनाम च "बेट्टी"ति स्वीकृतमासीत्।

विश्वस्तो निजकर्मणि प्रतिदिनं कर्तव्यनिष्ठो जनः,
प्रत्यङ्गं स्वकृतेर्मुदा विमलयन् यो जीवनं जीवति।
तस्येप्सा-रहिताः स्वयं समुदिताः श्रेयोमयाः सर्वतः,
पूर्यन्तेऽत्र मनोरथा अथ वृथा संयान्ति विघ्ना लयम्॥७॥

□ श्रीमोतीलालनेहरूणां राजनीतौ प्रवेशः

स्वान्ते यस्य विजृम्भते निजभुवो भक्तिर्दृढा सन्ततं,
योऽन्यायान् सहते न मौन-मनसा निष्कारणं निन्दितान्।
आत्मानं मनुते मनागपि च यः कर्तव्यकोटौ स्थितं,
दृष्ट्वा सोऽत्र भुवः प्रपीडनमथो तिष्ठेत् कथं निश्चलः?॥ ८॥

आत्मन उन्नतौ व्यवसाये च संलग्नमानसानां श्रीमोतीलालनेहरूणां तेषु दिनेषु भारतीय-राजनीतिं प्रति कोऽप्युत्साहो नासीत्। तेषां व्यस्ततैवेयत्यभूद् यत्ते तस्यै समयं दातुं नाशक्नुवन्। प्रारम्भे ते यदा-कदा राष्ट्रिय-काङ्ग्रेसस्य केषुचिदुपवेशनेषु भागमगृह्णन् परं तत्र तेषां मनो नारमत।

राष्ट्रिय-काङ्ग्रेसस्य स्थापना सन् १८८५ तमे वत्सरे—**'एलन ह्यूम'**-नामकेनैकेनाङ्ग्लेन (आई० सी० एस०) अधिकारिणा विहिता। ततो लार्डकर्जनोऽप्यस्या आशीर्वादमदाद् यः १८९९ तमे वर्षे भारतस्य महाधिशास्ता नियुक्तः। तस्य सम्मतौ भारतीयानामसन्तोषाभिव्यक्तये संस्थेयमेकमुत्तमं माध्यममासीत्। भारतस्याङ्ग्लभाषाभाषिणो भाषाविदश्च मध्यमवर्गीयाणां संस्थामुचितामम-न्यन्त। श्रीमोतीलालमहाभागाः १८८८ तथा १८९२ वर्षयोरस्या उपवेशनेषु प्रतिनिधिरूपेणोपातिष्ठन् १९०२ तमे वर्षे च ते कार्यसमितेः सदस्यत्वेन वृताः। १९०५ ई० पर्यन्तं ते मृदुप्रस्तावस्वीकरणं तथा प्रार्थना-पत्रप्रेषणमतिरिच्य विशिष्टां कामपि रुचिं नादर्शयन्। तेषां सम्बन्ध उदारवादिभिरासीदतस्ते समुत्पन्नानां काठिन्यानां समाधानं वैधानिकेन मार्गेणैवावाञ्छन् किञ्चोग्रवादिनां क्रान्तिकारिकर्मणां च प्रबलं विरोधमप्यकुर्वन्।

इत्थं मध्यवर्तिनि दशके काङ्ग्रेसं प्रति सत्यामपि निष्ठायां विशिष्यात्मोन्नतौ यतमानानां पण्डितमोतीलालनेहरूणां सुखिनि जीवने बङ्गविभाजनान्दोलनेन भूयोऽपि राजनीतिकेन तापमानेनोष्णताऽऽनीता। ते सङ्घर्षाङ्गणमवतरिताः। तदानीं मृदु-दले ताः सुप्रसिद्धा विभूतय आसन् याः काङ्ग्रेसस्योद्भवकालादेव सम्बद्धा अभूवन्। **फीरोजशाहमेहतासदृशाः** सङ्घटकाः, **दीनशावाचा-**समाः प्रचारकाः **सुरेन्द्रनाथबनर्जी-**समानाः कुशला वक्तारस्तासु विभूतिष्वशोभन्त। परं राजनीतिकस्य मृदुदलस्य सर्वतो योग्या व्याख्यातारः **श्रीगोपालकृष्णगोखले**महोदया आसन्। श्रीगोखलेमहानुभावा रानाडेमहोदयस्य शिष्याः श्रीगान्धिनां परामर्शदातारस्तथा श्रीमोतीलालमहाशयानामादर्शा अवर्तन्त। काङ्ग्रेसस्य प्रथमवंशधराणां भावनाभ्य आशाभ्यस्तथा कल्पनाभ्यः श्रीगोखलेमहोदया वाणीं ददाना आसन्। ते प्रभुजातये प्रजावर्गं 'केवलं पादपीठं' मन्वानस्य **'सङ्कीर्ण-साम्राज्यवाद'-**स्य स्थानेऽपेक्षाकृतमेकम् **'उदात्तं साम्राज्यवादं'** वाञ्छन्ति स्म तथैव विधातुं च जनान् सम्बोधयन्ति स्म।

बङ्ग-विभाजनस्य घोषणानन्तरं सन् १९०५ ई० वर्षे वाराणस्यां 'भारतीय-राष्ट्रिय-काङ्ग्रेस'स्य प्रथमोपवेशनं श्रीगोखलेमहानुभावानामाध्यक्ष्ये सम्पन्नम्, तत्र तेषामाग्रहेण श्रीमोतीलालमहाशया अपि सम्मिलिताः। आसीत् तत्र मृदूग्रदलयोः सङ्घर्षस्य सम्भावना, परं संयतेनानुशासितेन स्वरेण विहितया कर्जनस्य नीतीनामालोचनया तथा न सम्पन्नम्। ततः परं सन् १९०६ ई० वर्षे कलकत्तानगर्यां काङ्ग्रेसस्याधिवेशनं **श्रीदादाभाई नौरोजी**—महोदयानामाध्यक्ष्येऽभवत्। तत्रापि मृदूग्रदलयोर्विचारवैमत्याज्जायमानं विघटनं रोद्धुं तथा सम्भूय स्वातन्त्र्यान्दोलनप्रवृत्तये प्रवर्तितम्। तदानीं लालालाजपतरायाः श्रीबालगङ्गाधरतिलकास्तथा केचन प्रभावशालिनो नेतार उग्रदलेऽवर्तन्त। तेष्वपि श्रद्धधानाः श्रीमोतीलालमहाभागा आत्मीयां मृदुपद्धतिं परिहातुं नैच्छन्। यतः—

ये बुद्धिमन्तो निजकार्यदक्षाः, स्वयं विमृश्यैव पुरः प्रयान्ति।
पश्चात्पदास्ते न भवन्ति नूनं, न वा कदाप्यत्र पराभवन्ति॥९॥

ईदृश्यां स्थितौ श्रीजवाहरलालः पित्रपेक्षया पूज्या मातुः परमं प्रेम प्रारम्भिकीं शिक्षां पारिवारिकान् व्यवहारान् साधारणं सामाजिकं ज्ञानञ्च लभमानोऽप्येकादशवर्षायुःपर्यन्तं गृह एकमात्रं बालकत्वेन जीवनं व्यतिगमयत्। तथापि स्वस्यावकाशसमयं स क्रीडन-कूर्दयोर्व्यत्यापयत्, ययोः तरणं यष्टि-कन्दुकक्रीडनं फ़लक-चटकिकाखेला अश्वारोहणं च तस्य प्रियाणि क्रीडनान्यासन्। यदा कदा गङ्गास्नाने पारिवारिकेषुविवाहेषु सुदूरे वर्तमानानां नगराणां यात्रासु तथा बहुसंख्याकेषु हिन्दू-संस्कारेषु पर्वसु तस्य मनोऽरज्यत। स्वपितॄन् प्रति सदा समादरकर्त्ताऽऽज्ञापालकश्च सन् स पित्रोरतिशयेनानुरागेण परिषिक्तस्तयोः साह-

सिकता-दक्षता-दृढताश्च स्वस्मिन् स्थिरयितुमचेष्टत। स पितॄणामतिव्यस्ततया पूज्यया स्वरूप-रानी-जनन्या पोषितो बोधितस्तथा स्नेहातिरेकेण तोषितः सुतरां सुखेन शिक्षणे प्रावर्तत तेन च पितरौ भृशमतुष्याताम्।

प्रभूतमैश्वर्यमवाप्य केचिद्, बाला यथार्थाद् विमुखा भवन्ति।
परं न ये स्वां सरणिं त्यजन्ति, सत्यं सुतास्ते भुवि सन्ति धन्याः ॥१०॥

□ श्रीजवाहरलालस्य व्यक्तित्वोदयः

गार्हस्थ्ये समुदारता समुचिता सर्वेषु सत्स्नेहिता,
सर्वेषामनुशासने च दृढता दुःखेष्वनुद्विग्नता।
आज्ञापालन-कर्मणि प्रतिपदं स्वीकारिता नम्रता,
नित्यं यत्र वसन्ति तत्र सकलं व्यक्तित्वमुद्योतते ॥११॥

समुन्नत-विचारणा-समुपादिताः क्रिया नित्यशः,
परिश्रम-समन्विता भुवि जना यदा कुर्वते।
तदैव नियतेरपि स्वसहयोगतः सन्ततं,
भवन्ति सफलाः समे शुभ-मनोरथाश्चिन्तिताः ॥१२॥

श्रीमोतीलालनेहरूणां सङ्कल्प आसीद् यत् परिवारे वर्तमानाः सर्वेऽपि शिशवः श्रेष्ठातिश्रेष्ठां शिक्षां प्राप्य प्रत्न-नूतनविचारैः परिचिताः भवेयुः। जीवनस्य प्रत्येकं क्षेत्रे तेऽग्रग्रामिनः स्युः। स्वस्याः संस्कृतेः परिधौ वर्तमाना जगतः सकलमपि श्रेष्ठं तत्त्वमात्मसात् कुर्युः। तेषां परिवारे तदीय एकमात्रं प्रियः पुत्रो जवाहरलालस्तु बहूनामाशानां कल्पनानां केन्द्रमेवाभूत्। अतस्ते तस्मै प्राचीनपरम्परापोषितां सामान्येषु विद्यालयेषु प्रवर्तमानां शिक्षां सर्वथाऽपर्याप्ताममन्यन्त। सन् १९०४ ई० वर्षे यदा श्रीवंशीधराभिधा ज्येष्ठा भ्रातरो यूरोपं गतास्तदा तेषां पुत्रेण श्रीधरेण सह जवाहरलालं स्थानीये **'सैण्ट मेरी कान्वेण्ट'**-विद्यालये प्रवेशितवन्तः। षण्मासानन्तरं श्रीधरस्येलाहाबादतोऽन्यत्र गमनानन्तरं जवाहरलालं तस्माद् विद्यालयात् पृथक्कृत्यानन्दभवन एवाङ्ग्लाध्यापकैस्तदध्ययनाय निर्णीतवन्तः। ततः पूर्वं श्रीजवाहरलालः १९०२-१९०४ ई० वर्षाणां मध्ये **'फर्डिनेन्ड टी० ब्रुक्स'**-सदृशादध्यापकादपि स्वगृहेऽध्ययनमकार्षीत्। तेष्वेव दिनेषु श्रीमोतीलालनेहरूणां धारणेयं स्थिरतामयासीद् यज्जवाहर आङ्ग्लाध्यापकैरध्ययनानन्तरं क्वाप्याङ्ग्लजनता-विद्यालये पठेत् ततः परं च इङ्ग्लैण्डस्यैव विश्वविद्यालये पठनाय गच्छेत्।

अयमभिलाषस्तेषां १९०५ ई० वर्षे पञ्चमवारं पत्नी-पुत्री-जवाहरलालैः सह विदेशयात्रायां सफलोऽभवत्। भाग्यवशात् स्वीयानामाङ्ग्लमित्राणां

साहाय्येन श्रीमोतीलालमहाभागैः श्रीजवाहरस्याध्ययनाय हैरो-स्थिते विद्यालये प्रवेशव्यवस्था सम्पादिता। ततः परमन्यान्यस्थलेषु भ्रान्त्वा ते २६ अक्टूबर-१६०५ वर्षीये दिने मार्सेईनगरे स्वातिथिगृहं प्राप्ताः। जवाहरलालस्य वियोगस्तानतीव व्यथयति स्म। तत्र रात्रावावेगपूर्णेन हृदयेन तैरेकं विदाय-पत्रं लिखितम्। तस्मिँल्लिखितमासीत् —

"त्वयेयं वार्ता मस्तिष्केऽवश्यं रक्षणीया यदस्मिन् संसारे यत् सर्वतोऽधिकं मूल्यवन्निधानमस्माकं निकटे विद्यते तथा कदाचिदागामिषु संसारेष्वपि यदस्माकं समीपे सर्वतो मूल्यशालि भविष्यति, तत्तव रूपे वयमत्रैव त्यक्त्वा गच्छामः। तवात्मनो हिताय वयमस्य पार्थक्यस्य पीडया पीडिता भवामः। इदं त्वत्कृते धनस्य केवलं व्यवस्थापनाय नास्ति, यामहं कदाचिदात्मन एकस्य वर्षस्यायात् कर्तुं शक्नोमि। वस्तुतोऽयं तवैकस्य वास्तविकमनुष्यस्य निर्मितेः प्रश्नोऽस्ति, यत् त्वया सर्वात्मना भवितव्यम्। इयमस्मभ्यमत्यधिकरूपेण स्वार्थपूर्णा वार्ता भविष्यति—अपि त्वियं पापपूर्णा कथनीया विद्यते—यत् त्वामात्मनो निकटे स्थापयेम तथाऽन्तेऽत्यल्पां शिक्षामथवा शिक्षां विनैव केवलं धनं मुक्त्वा व्रजेम।

ममाशयोऽस्ति यदहं स्पष्टतया गर्वोक्त्या कथयितुं प्रभवामि यदहं नेहरू-परिवारस्य वैभवस्याधारशिलायाः संस्थापकोऽस्मि। मम प्रियसूनो ! अहं त्वां तस्या व्यक्ते रूपे द्रष्टुमिच्छामि या मया स्थापितायामाधारशिलायां निर्माणं करिष्यति तथैतस्या वार्तायाः सन्तोषं प्राप्स्यति यद् यशस एकं भव्यं भवनमाकाशे शिर उन्नमय्य स्थितमस्ति।

वयं त्वां शारीरिकरूपेण मुक्त्वा गच्छामः, परं मनसा सदैव तव निकटे स्थास्यामः। दशमासेभ्योऽपि न्यूने समयेऽहं पुनस्त्वन्निकटे भविष्यामि तथाऽनुमानतो द्वयोर्वर्षयोस्त्वमस्यां स्थितौ भविष्यसि यत् त्वमिलाहाबादस्य स्वीये पुरातने परिचिते वातावरणे कतिपयान् मासान् व्यतिगमयिष्यसि। यद्यप्यहं स्वल्पायैव कालाय पृथग् भवामि, परं त्वत्तो वियोगात् पूर्वं मया कदापि न विचारितमासीद् यदहं त्वामियत् स्निह्यामि। कदाचिदेष मम निर्बलहृदयस्य कारणादस्ति। परं त्वां प्रति कर्तव्यस्य मम बोधस्तावानेव दृढोऽस्ति, यावान् हि पूर्वं कदाचिदासीत्; किञ्च यावन्मम दीनस्य दुर्बलहृदयस्य प्रश्नोऽस्ति, तत् तव समीपे विद्यते। अस्मिन् विषये मम मनागपि संशयो नास्ति, यत् त्वं ममाशानुकूलम्, अपि तु ततोऽप्यधिकमुन्नतो भविष्यसि। तव व्यस्ततायै तव समीपे भूयांसि कार्याणि सन्ति—स्वास्थ्यस्य रक्षाऽपि कार्येष्वेव सम्मिलिताऽस्ति। त्वत्त आत्मनः पृथक् त्रोटनस्य प्रतिदाने वयं केवलमियदेव वाञ्छामो यत् स्वस्य शरीरेण मस्तिष्केन च त्वं पूर्णो भवेति।"

अस्मिन् पत्रे या भावनाः प्रकटितास्ताः श्रीमोतीलालमहाभागानां मनः-

स्थितेर्भाविनो जीवनस्य समुन्नतेस्तथा प्रियस्य पुत्रस्य सार्वत्रिकविकासस्य वास्तविकं तथ्यं प्रस्तुवन्ति।

ततः परं सन् १९०७ ई०वर्षे संयुक्तप्रान्तस्य प्रादेशिकं प्रथमं राष्ट्रियकाङ्ग्रेससम्मेलनमायोजितं तस्याध्यक्ष्यं श्रीमोतीलालेभ्य एवार्पितम्। तदाऽध्यक्षपदात् स्वच्छन्दतया प्रथमवारं स्वीयेऽभिभाषणे तैरात्मनो विचारा मृदुदलीयपद्धत्या प्रस्तुताः। तेषु श्रीगोखलेमहानुभावानां बुद्धिमत्तापूर्णानां शब्दानां स्पष्टमुल्लेखनमप्यभूत्। श्रीगोखलेमहाभागं ते **'सन्तुलितराजनीतेर्मसीहा'** इत्यकथयन्। द्वादशसहस्रशब्दानां तस्मिन्नध्यक्षीये भाषणे भारतीय-राष्ट्रिय-काङ्ग्रेसाय स्वीयः श्रद्धाञ्जलिः समर्पितः कथितञ्च यत् संस्थेयं—'राष्ट्रियराजनीतेर्महान् विश्वविद्यालयोऽस्ति।' तत्रैव प्रसङ्गत उग्रदलीयानामुपहासोऽपि विहितः, यतो हि ते यं मार्गं श्रितवन्त आसन् स नासीत् समीचीनः साफल्यप्रापकश्च। इत्थं तेषां विचाराणां बहुधा समर्थनमेवाभूत्, परमुग्रराष्ट्रवादीनि समाचार-पत्राणि भृशमालोचनमकार्षुः। श्रीजवाहरलालस्तदा केम्ब्रिजनगरे ट्रिनिटी-महाविद्यालये पठन्नासीत् सोऽपि पितरं पत्रद्वारा समालोचयत् तान् 'घोरा उदारवादिनो भवन्तः सन्ती'त्यपि चाकथयत्। तेन ते रुष्टा अप्यभवन्। तेष्वेव वासरेषु श्रीमुन्शीनामष्टादशवर्षीयः पुत्रो 'मञ्जर-अली' आतङ्कवादिनामान्दोलने सम्मिलितः। तमपि शीघ्रमेव सम्बन्ध-विच्छेदायादिष्टवन्तस्ते। परं स दृढास्थाशाली युवा परिष्कारक आसीद् विदेशिशासनाच्च भारतस्य विमुक्तये दृढं कृतनिर्णयश्चावर्तत। तेन श्रीमोतीलालनेहरूणामादेशो नाङ्गीकृतो गृहं च विहाय सोऽन्यत्रागमत्। एतेनापि पण्डितमोतीलालमहानुभावाः खिन्नतामन्वभवन्।

सन् १९०७ ई० वर्षस्य दिसम्बरमासे 'सूरत'नगरे काङ्ग्रेसस्य त्रयोविंशतितमेऽधिवेशने ते पुनः सम्मिलिताः। तदनन्तरं तु भारतीय-राजनीतेः प्रवाहस्तादृशः प्रवृद्धो यस्मिन् न केवलं प्रबुद्धा भारतीया एव संसक्ता अभूवन् परं विदेशीया अपि भारतवासिभ्यः स्वातन्त्र्यप्रापणाय सहभाज आसन्। विदेशस्था भारतीया अपि वैदेश्यानामन्यायप्रवृत्त्या खिन्नाः सन्तो विविधान्दोलनेषु सुसङ्गताः। श्रीमोतीलालनेहरूणां तथा श्रीजवाहरलालनेहरूणां राजनीति-विषये गहना रुचिः परस्परं पत्राचारैर्विचाराणामादान-प्रदानानि च भाविने जीवनाय राजनीतिमयं वातावरणं स्रष्टुमतीव सहभागीन्यभवन्। मृदूग्रदलयोर्विचारयोः कारणात् पितृ-पुत्रयोर्मध्ये राजनीतिकः सङ्घर्षोऽपि प्रथमं तदैवाभूत्। पुत्रस्य निरन्तरं वर्धमानां परिवर्तनवादितां प्रति श्रीमोतीलालनेहरूणां प्रतिक्रिया क्रमशः क्रोध-विरोध-सङ्घर्षपरिणतीनामन्ततश्च वीरपूजाया आसीत्।

आत्मा वै तनयो भवत्यविरतं श्रुत्येत्थमाघोषितं,
तद्वत् पुत्रमवेक्ष्य को नु मनुजस्तोषं लभेतात्मनि ?

किञ्च स्वेप्सितकल्पना अपि यदा स्युर्मूर्तिता भाविनी-
स्तस्मिँस्तर्हि सुखस्य या परिणतिस्तस्यास्तदा का कथा ?॥१३॥

श्रीजवाहरलालस्यार्धसत्रस्याधिकारिकं विवरणमतीव प्रशंसनीयमभवत्। पुत्रस्य शैक्षिकोपलब्धौ सन्तोषमनुभवद्भिर्मोतीलालनेहरूभिरग्रे बहूनि शिक्षा-दायिन्युत्साहवर्धकानि पत्राणि लिखितानि। क्रीडा-प्रवृत्तेर्वर्धनाय स्वास्थ्याभिवृद्धये च बहवो निर्देशाः प्रदत्ताः। मध्ये मध्ये परामर्शा राजनीतिकाः प्रवृत्तयो भगिनीनां क्रियाकलापाश्च नियमितेन रूपेण प्रैष्यन्त। भारतीयानि वृत्तपत्राण्यपि यथासमयं तत्र प्रेष्यन्ते स्म। इत्थं श्रीजवाहरो यथा स्वीयाध्ययने प्रावीण्यं प्राप्तवान् तेन साकमेव १९०६ तथा १९०७ ई०वर्षयोर्भारते घटितानां घटनानां—यासु पञ्चाम्बु-प्रान्ते लालालाजपतरायस्य तथाऽजीतसिंहस्य देशान्निःसारणं, बङ्गविभाजन-जन्याऽशान्तिः, तिलकस्य सिद्धान्तवादिनो विरोधाः स्वदेश्यान्दोलनं विदेशिव-स्त्राणां निरासादय आसन्—समाचारा अपि तेन गम्भीरतयाऽधीताः।

हैरोतः सत्रपूर्तेः पूर्वमेव स कैम्ब्रिज-विश्वविद्यालयस्य **ट्रिनिटी महाविद्यालये** प्रविष्टः। तदा तस्यायुरष्टादशवर्षाणामासीत्। कैम्ब्रिजे वसन् स विस्तृतं विश्वं पर्यचिनोत्। विविधान् वैज्ञानिकान् विषयानपठत्। संसारस्य महतां साहित्य-काराणां ग्रन्थानवाचयत्। आनन्दस्य मनोमोहकानामनुभवानाञ्च जीवनं वर्षत्रयं यावत् तत्र तेन यापितम्। तेषां सर्वेषामुपरि तेन यदभिलषितं तदासीद् 'भारतस्य राजनीतिके सङ्घर्षे साहसपूर्णायां भूमिकायामवतरणम्।' सन १९०८ ई० वर्षे जवाहरलालः कतिपयदिनेभ्यो भारतमायातस्तथा श्रीमोतीलाल-महाभागास्तदैव यूरोपं गताः। पितृ-पुत्राभ्यां स्वीये नूतने वायुयाने 'काउण्टजेपलिन' आगच्छन विलोकितः। पेरिसनगरे च वायुयानानां साहसिकानि कार्याण्यपि ताभ्यां दृष्टानि।

यदा श्रीजवाहरलालः कैम्ब्रिज-विश्वविद्यालयाद् द्वितीयश्रेण्या उत्तीर्य **'आनर्स'** उपाधिं लब्धवान् तदा स विंशतिवर्षायुष्क आसीत्। भारतीय-नागरिक-सेवा (आई० सी० एस०) यास्तदानीमतिमहत्त्वमभूत्, तस्याः प्रशिक्षणार्थं प्रवेशाय पितृपादैः काङ्क्षितमपि, परं वयसो न्यूनत्वात् प्रवेशो न स्वीकृतः। सन् १९१२ ई० वर्षस्य ग्रीष्मर्तौ **'बैरिस्टर'** (इंग्लैण्डदेशस्य वाक्कील) परीक्षाम् उत्तीर्याधिकारं च सम्प्राप्य वर्षसप्तकमिंग्लैण्डे व्यतिगमय्य स भारतं सम्प्राप्तः। सन् १९१२ ई० वर्षस्यागस्ते मासि मसूरीनगर्यां पारिवारिकं पुनर्मिलनमभूत्। माता सत्यामपि रुग्णावस्थायां चमत्कृतिपूर्णया प्रक्रियया स्वस्था सञ्जाता। पिता प्रसन्नो गौरवा-न्वितश्च दृश्यते स्म। भगिन्यौ सरूप-कृष्णाभिधे चकिते भ्रातुर्मिलनानन्देन पूरिते अभूताम्। तेष्वेव दिवसेषु श्रीमोतीलालनेहरूमहाभागाः स्वकीयानां वादिनां विधिसम्बद्धं कार्यं निरीक्षमाणा इलाहाबादे कियतेचित् कालाय स्थिता आसन्

तथा समस्तः परिवारो मसूर्यामवकाशानन्दं लभते स्म । तदाऽऽत्मनो वादिनो रावमहाराजस्य धनादेशेन पञ्चशतरूप्यकाणि प्राप्तानि, स हि तरुणं नेहरूं स्वीयं वाक्कीलं नियोक्तुमवाञ्छत्, तस्यैव शुल्कमिदमभूत् । एतेनातीव सन्तुष्टाः श्रीमोतीलालमहाभागाः पुत्राय श्रीजवाहरलालाय पत्रं प्रैषयन् लिखितवन्तश्च—"प्रथमं शुल्कं यत्तव पित्रे प्राप्तमासीत् तत् पञ्चरूप्यकात्मकमासीत्। स्पष्टमस्ति यत् त्वं स्वपितुः शतगुणः श्रेष्ठोऽसि। अहं स्मरामि यदहं स्वयं न भूत्वाऽऽत्मनः पुत्रोऽभविष्यम्……।"

श्रीजवाहरलाल उच्चन्यायालये वाक्कीलतामारभत किन्तु तस्मिन् व्यवसाये तस्य मनस्तावन्तमानन्दं नालभत । दैनिकेन संयतेन कार्येण शैथिल्यमेवान्वभवत् सः। वाक्कीलानां पुस्तकालये तेषां संसदि तथा प्रकोष्ठे सर्वत्रैकैव वार्ता तस्मै नारोचत। मानसिक्या उत्तेजनाया अभावस्तं मनस्येव मनसि किमपि कर्तुं प्रैरयत्। स काङ्ग्रेसे सम्मिलितः सक्रियतायै च कठोरं श्रममप्यकरोत्। श्रीगोखलेद्वारा संस्थापिते 'भारत-सेवक-मण्डले'ऽपि तदीया प्रविविक्षाऽभवत् परं तत्सदस्यानां नीतिर्मृदुदलीयाऽवर्तत, अतस्तस्मिन् न सममिलत् । यतो हि—

तारुण्ये वितताऽऽत्मतुष्टिरनिशं तेजस्विता सक्रिया-
शक्तिर्बुद्धिविलास-कौशलरुचिः स्वाभाविकी चेतना।
सङ्घर्षः स्वविचारपोषणकरी वृत्तिश्चिरं चिन्तनं,
सङ्कल्पा युवकोचिताश्च सरसा भावा भवन्त्युद्गताः ॥१४॥

सन् १९१४ ई० वत्सरस्यागस्ते मासि प्रथमं विश्वयुद्धं प्रारब्धम्। यस्मिन् भारतस्य रुचिर्नासीत् किन्तु विनैव स्वीकृतेस्तस्य सहभागित्वं साधितम्। तदानीं राजभक्तेरनेका घोषणा विहिताः परमाङ्ग्लशासकेषु जनानां सहानुभूतिरतीव न्यूनाऽविद्यत। शार्मण्यदेशं प्रत्यपि नावर्तत कश्चनानुरागः। श्रीजवाहरलालस्य सहानुभूतिरभृत् फ्रान्सं प्रति, य आङ्ग्लानां पक्षधर आसीत्, शार्मण्यदेशेन च तदुपर्याक्रमणं विहितमभवत्। भारतीया जनताऽऽङ्ग्लानां साहाय्यमकरोत् किन्तु सा तेषां शासनान्मुक्तिमप्यकामयत । विदेशि-शासनान्मुक्तेर्याच्ञायै श्रीमत्या एनीबीसेण्टमहाभागया **'होमरूललीग'** नाम्ना सङ्घटनमेकं स्थापितम्। समग्रेऽपि देशे प्रभावशालीनि भाषणानि समवर्तन्त । काङ्ग्रेसस्य मुस्लिमलीगस्य च संयुक्तान्यधिवेशनान्यभूवन् तैरतीवोत्तेजना प्राप्ता। वातावरणे पर्याप्ताऽऽकृष्टिरासीत्। तदैव श्रीमती एनी-बीसेण्टमहाभागा दृष्टिकारायां निगृहीता तेन च मृदुदलीया अप्युत्तेजनां गताः।

श्रीमोतीलालनेहरूमहोदया अपि मृदु-दलीया आसन्। अन्ये तद्दलीयास्तु होमरूल-सङ्घटनात् त्यागपत्राणि दत्त्वा परागताः किन्तु ते तथा नाकुर्वन्। ते स्वभावादेव विद्रोहिण आसन् शनैः शनैश्च राष्ट्रवादिनोऽभूवन्। श्रीमोतीलाल-

नेहरूणामासीत् तर्केषु विश्वासः श्रीजवाहरो युवा भावुकश्चावर्तिष्ट । श्रीमोतीलालमहोदया वैभवशालिपद्धतिका आसन् श्रीजवाहरलालश्च जनतायाः साधारणं जीवनं स्वीकर्तुं वाञ्छति स्म। उभावपि श्रीमती एनी-बीसेण्ट-महाभागया प्रभावितौ। यदा सा मृदुदलीया सम्पन्ना तदा श्रीगान्धिनः प्रभावस्तामात्मसादकार्षीत्।

श्रीजवाहरलालः शनैः शनैः राजनीतिक-गतिविधौ भागमगृह्णात् । जनतायां भाषणे स सङ्कोचमनुभवति स्म, सहैव सोऽनुभवति स्म यज्जनतायां भाष्येत तदाङ्लभाषायां न भवेत् । सन् १९१५ ई० हायने तेन सर्वप्रथममिलाहाबादनगरे नवीनस्यैकस्य नियमस्य विरोधे संक्षिप्तमाङ्ग्लभाषयैव भाषितम् । सभासमाप्तौ प्रमुखा मृदुदलस्य नेतारः **श्रीतेजबहादुरसप्रू**महाभागाः श्रीजवाहरलालमभिनन्दयन्तस्तं वक्षसाऽमेलयन् चुम्बनेन च प्रीतिमदर्शयन् । पितृ-पुत्रयोर्मिथो मृदूग्रदलवादित्वेन वाद-विवादावपि प्राचलताम्, उभावपि स्वे स्वे पथि च दृढाववर्तताम् ।

सन् १९१६ ई० वर्षस्य जनवर्यां यदा लखनऊनगरे काङ्ग्रेसस्याधिवेशनमायोज्यत तदा श्रीजवाहरलालः प्रथमवारं श्रीगान्धिनः साक्षात्कारं प्राप्तवान् । यद्यपि श्रीगान्धिनां ख्यातिरतीव व्याप्तिमगच्छत् परं श्रीजवाहरस्तावद् दूर एवासीत् । कालान्तरेण श्रीमोतीलालजवाहरलालयोस्तैः सह गाढः परिचयोऽभवत्, तैः साकं नैकट्येन च कार्याणि सम्पादितानि । अस्तीदं सत्यं सत्यमेव —

सत्यपि यदि मतभेदे, भुवि नैव भवेन्मिथो मनोभेदः ।
कार्ये तर्हि विचार्ये, नैव विपद् बाधते लोकम् ॥१५॥
अथ मानसमुल्लसितं, कलयति सत्कर्म कौशलोद्वलितम् ।
इष्टं भवति च फलितं, सरति ततो जीवनं ललितम् ॥१६॥

यदा श्रीजवाहरलालमहाभागो हैरोस्थे विद्यालये पठति स्म तदा तस्य विवाहसम्बन्धिनी चर्चाऽपि पत्रमाध्यमेन श्रीमोतीलालनेहरूभिर्विहिताऽऽसीत् । यद्यपि ते शीघ्र-विवाहं नेच्छन्ति स्म परं ते वाञ्छन्ति स्म यत् स्वल्पतमे काश्मीरिकसमुदाये कन्याचयनस्य सौविध्यं सीमितमस्त्यतो वाग्दानमावश्यकमस्तीति । अन्यथा जवाहरलालस्य भारते प्रत्यावर्तनकालं यावद् याः काश्चनोपयुक्ताः कन्याः सन्ति तासां वाग्दानानि सम्पत्स्यन्त एव । सौन्दर्यस्य शिक्षायाश्चैकत्र समन्वयं कामयमानाः श्रीमोतीलालमहाशयास्तद्विषये सचेष्टा आसन् । देहल्या एकस्य व्यापारिणः पण्डितजवाहरमल-महोदयस्य पुत्री '**कमला कौल**'-नाम्नी प्रान्तेऽरोचत । सन् १८९९ ई० वर्षे समुत्पन्ना 'कमला' सुशीला सौन्दर्यान्विता स्वस्था समुचिताकार-प्रकारशालिनी चासीत् । नेहरू-परिवारापेक्षया तदीये भवने वैदेशिकः प्रभावोऽल्पोऽभूत् किन्तु स्वस्य वाग्दानावसरे यदा सा प्रयागे स्वेषां

सम्बन्धिनां गृहें स्थिता तदा वरोपयुक्ततायै भाविनो वरस्य भगिनीनां यूरोपीय-संरक्षिकाभिः सह सङ्गमिता ।

८ फरवरी १९१६ ई० दिने वसन्तपञ्चम्यां देहलीनगर्यां श्रीजवाहरलाल-महाभागस्य विवाहः सम्पन्नः। विशेषेण धूम्रयानेन श्रीमोतीलालनेहरूणां मित्राणि सम्बन्धिनो देहलीमुपागताः। सप्ताहं यावद् वारयात्रिका अतीवानन्देन मनोरञ्जन-पूर्वकं सम्मानिताः। विवाहमण्डपं सर्वेषामानन्दानां केन्द्रमभूत्। इलाहाबादनगरं प्रति प्रत्यावर्तनात् परमपि नैकसप्ताहान् यावन्मनोरञ्जन-सामूहिकभोजन-क्रीडोत्सवानां कार्यक्रमाः प्राचलन् । पञ्चपञ्चाशद्वर्षायुष्केभ्यः श्रीमोतीलाल-नेहरूभ्यः स्वस्यैकलस्य पुत्रस्य विवाहस्तदीयजीवनस्य चरमा सिद्धिरासीत् ।

ग्रीष्मकाले समस्तोऽपि परिवारः काश्मीरेष्ववकाशदिवसान् व्यत्यापयत्। अवकाशानन्तरं परिवार इलाहाबादं प्रत्यायातः। श्रीजवाहरलालनेहरूश्च स्वपितुः कनिष्ठसहयोगिनो रूपेणानन्दभवने कार्यमारब्धवान् । न्यायालयस्य प्रकोष्ठानां विधिवित्पुस्तकालयस्य तथा विधिज्ञानां सभायाः प्रवृत्तयः कदाचित् स्थानीया कवोष्णा राजनीतिश्चेति श्रीजवाहरलालमहाभागस्य व्यस्ततायाः साधनान्यभूवन्। किन्तु स्वदेशार्थं तदीया कर्तव्यनिष्ठा तं भूयोभूयोऽनुरुणत्ति स्मैव।

निश्चेष्टं नहि जीवनं सुखकरं यूनः कृते जायते,
तारुण्याच्च विजृम्भिते मनसि नो शान्ता स्थितिर्युज्यते।
सामुद्रोर्मिरिवोच्छलद्गतिमते वीराय वीरोचितं,
किञ्चित् कार्यमपेक्षते यदि न तत् स्याच्छान्तिलाभः कुतः? ॥१७॥

तरुणिमनि तु तितीर्षा वर्धते वारिनाथे,
नभसि च परिमुक्ता उड्डिडीषा भवन्ति।
उदयति च कदाचित् पर्वतेष्वारुरुक्षा,
कुह च न शिथिलत्वं रोचते नैव तस्मिन् ॥१८॥

यूनां मनांसि निश्चेष्टं तिष्ठन्ति प्रतिकुर्वते।
कर्म-मग्नानि संसिद्धिं लभन्ते सर्वतः शुभाम् ॥१९॥

☐ राष्ट्रभक्तेरपूर्वः प्रवाहः

गेहे गेहे प्रगुञ्जन्नभिनवगतिदो भारतीयेभ्य आसी-
दाशानां यः प्रतीकः सपदि सुखकरो 'होमरूला'ख्यशब्दः।
राजद्रोहस्वरूपः स हि पुनरभवत् किन्तु गौराङ्गकेभ्य-
स्तेनाभूद् राष्ट्रभक्तेः प्रसृतिविलसितः कोऽप्यपूर्वः प्रवाहः ॥२०॥

सन् १९१४ ई० वर्षे श्रीगङ्गाधरतिलकाः षड्वार्षिकं कारादण्डं समाप्य बर्मातो भारतं प्राप्ताः। विदेशेषु स्थिता अनेके भारतीया अपि क्रान्तेरुद्देश्येन

भारतमुपागताः। भारतीयान् सैनिकान् क्रान्तये सन्नद्धान् कर्तुं सैनिकशिबिरेष्वपि ते कथञ्चित् प्रविष्टाः। विदेशेष्ववशिष्टाः क्रान्तिदूता भारते शस्त्रास्त्राणि प्रेषयितुं सयत्नाः सञ्जाताः। जर्मनी-टर्की-देशयोः सहयोगेन **'आजाद-हिन्द-सर्वकार'स्य** स्थापनाऽपि संवृत्ता परं तावत् किमपि साफल्यं नाधिगतम्। अतो जनता कस्यापि नवीनस्यान्दोलनस्य प्रतीक्षां कुर्वाणाऽवर्तत। श्रीतिलकानां समागमनेन नवस्फूर्तेः सञ्चारोऽभवत्।

श्रीमोहनदासकरमचन्दगान्धी १९१५ ई- वत्सरस्यारम्भे दक्षिणाफ्रिकातः साफल्यं प्राप्य भारतं प्रत्यायातः। २ अक्टूबर १८६९ ई०, दिने **गूर्जरत्ना-भूमेः** पोरबन्दरनगरे **'पुतलीबाई-करमचन्द'**योः पुत्रत्वेन प्राप्तजन्मा श्रीमोहनदास-गान्धी पितृभक्तः परिश्रमशील आत्मसम्मानी चासीत्। ४ सितम्बर १८८८ ई० दिवसे उच्चविद्यालायीयाध्ययनं समाप्याग्रिमाध्ययनाय यूरोपं गतस्ततश्च विधिशास्त्र-विशेषज्ञतारूपां **'बैरिस्टर-'** परीक्षामुत्तीर्य जुलाई १८९१ ई० वर्षे भारतं प्रत्यागतः। प्रसङ्गतो दक्षिणाफ्रीकायां स्वकीयज्येष्ठभ्रातुर्मित्रस्यैकस्मिन्नधिकरणे वैधानिकावेक्षणायामन्त्रितश्चतुर्विंशतिवर्षायुः स तत्रागच्छत्।

दक्षिणाफ्रिकायां स्थितवता श्रीगान्धिमहाभागेन भारतीयानामपमानपूर्णा स्थितिरवलोकिता स च स्वयमपि यातना बहुशस्तिरस्काराँश्चासहत। तैः क्षुब्धः श्रीमोहनदास-करमचन्दगान्धी भारतीयानां हिताय सत्याग्रह-सङ्ग्राममारब्धवान् बहूनि कष्टानि सहमानो निरन्तरं प्रयतमानश्च स सत्याग्रहे साफल्यमवाप्तः। गौराङ्गाणामत्याचाराः कृष्णानि विधानानि च निःशेषतां गतानि। अन्ततो २१वर्षाणि दक्षिणाफ्रिकायां निवासानन्तरं स्वदेशं पुनरायातोऽभवत्।

दक्षिणाफ्रिकायां **'ट्रान्सवाल'**स्य तथा **'नेटाल'**स्य भारतीय-वसतिषु व्यवह्रियमाणाया भेदनीतेर्दुर्व्यवहारस्य च विरोधे जनरल-स्मट्स-शासनस्य विरुद्धम्—**'अहिंसात्मकं निश्क्रिय-प्रतिरोधकमान्दोलनं'** प्रवर्तितमासीत्। भारतवासिन्या जनतया तदीयमतितरां स्वागतं व्याहृतम्। भारतीयाः स्वमनस्सु श्रीगान्धिनः कार्यप्रणालीं दृष्ट्वा निश्चयमकुर्वन् यदिदानीं देशाय 'महात्मा गान्धी' एक ईदृशो नेता प्राप्तः; यस्य निकटे वीरतापूर्णेन वर्त्मनाऽन्यायानामत्याचाराणाञ्च प्रतीकारं कर्तुं राजशक्तेराभिमुख्यायैकममोघमस्त्रं विद्यमानमस्तीति।

अत्रागत्य श्रीगान्धिमहाभागाः श्रीगोपालकृष्णगोखलेमहोदयानात्मनो राजनीतिकान् गुरूनमन्यन्त। तेषामेवाग्रहेण भारतस्य स्थितेः परिचयायानेकेषां स्थानानां ते यात्रा अकुर्वन्, काङ्ग्रेस-नेतृभिः सह स्वीयं सम्पर्कमसाधयन्, उचितं कालं प्रतीक्षमाणाश्च प्रायो वर्षमेकं तटस्थद्रष्टेव मौनमतिष्ठन्।

तदानीं भारतस्य राजनीतौ श्रीमत्या **एनी-बीसेण्ट**-महाभागया सञ्चालितस्य होमरूलान्दोलनस्य तीव्रया गत्या प्रयागस्य घटनाचक्रमतितीव्रताम-गृह्णात्। २० जून-१९१७ ई० दिनस्य **'लीडर'** पत्रेण घोषितं यत् "माननीयाः

पण्डितमोतीलालनेहरूमहोदयाः, डॉ० तेजबहादुरसप्रू-मुंशीनारायणंप्रसाद-अस्थाना-सी. वाई. चिन्तामणिमहाभागास्तथाऽन्ये राष्ट्रवादिनो मद्रास-शासनस्य निरङ्कुशायाः कार्यप्रणाल्या विरोधे होमरूलसङ्घटने सम्मिलिता इति ।" '**लीडर**'-पत्रस्य तस्मिन्नेवाङ्के जूनमासस्य द्वाविंशतितमे दिवसे 'इलाहाबादस्य भारतीय-नागरिकाणामेकस्याः प्रकटसभाया अपि घोषणाऽवर्तत, यस्या आध्यक्ष्यं श्रीमोती-लालमहोदयैः कर्तव्यमासीत् ।

रामप्रसादोद्याने विशाला सभाऽऽयोज्यत तत्र श्रीमोतीलालमहाभागैर्भाषितम्—"अस्माकं देशः साम्प्रतं सङ्क्रान्तिकाले वर्तते। सर्वकारेणास्माकं राष्ट्रियलक्ष्याणि प्रति प्रत्यक्षं युद्धं घोषितमस्ति।...... किं वयमेतेषामधिकारिणामप्रसन्नतायाः समक्षं विनम्रा भविष्यामः ? ...... आगच्छत, वयं सर्वेऽपि होमरूल-सङ्घटनस्य ध्वजमुच्चैरुत्तोलयामस्तथा त्रयस्त्रिंशत्कोटिकण्ठा होमरूलस्य नाद-मुच्चैर्घोषयामः। वेतनभोक्तृता जन्मनः प्रागेव होमरूलाय मृत्युशय्यां सज्जयति...। आगच्छत, वयं सर्वे दृढैर्हृदयैः सह कवेः साकमिदं कथयन्तोऽग्रे वर्धामहे —

"आगन्तुमिच्छेत् किमपीह यत् तत्,
स्वेच्छं समागच्छतु नैव भीतिः ।
अस्माभिरेषा तरणिः समुद्रे,
निःशङ्क-भावादवतारिताऽस्ति ॥२१॥" इति।

अग्रिमे दिवसे होमरूल-सङ्घटनस्योपवेशने श्रीमोतीलालनेहरूमहाभागा अध्यक्षा निर्वाचिताः किञ्च तत्पुत्रः श्रीजवाहरः संयुक्तमन्त्रिष्वेकः। स्वपुत्रस्य सहयोगेन श्रीमोतीलालनेहरूभिः स्थानीये सङ्घे नवीनस्य जीवनस्य सञ्चारः पूरितः। उत्तरप्रदेशशासनेन भारतशासनाय प्रहिते विवरणे सूचितमासीद् यद्—इलाहबादस्था होमरूल-सङ्घस्य शाखा 'समर्था शक्तिपूर्णा' च वर्तत इति। ततः परमगस्तमासस्य दशमे दिने लखनऊनगरे प्रान्तीयकाङ्ग्रेसस्य विशेषा-धिवेशने ५४८ मिताः प्रतिनिधयः सम्मिलिताः। आध्यक्षं च पण्डितमोतीलाल-महोदयैरेव निर्व्यूढम्। अधिवेशनस्य साफल्यं तदा प्रकटितं यदा दशदिनाभ्यन्तरमेव 'माण्टेग्यू-चेम्सफोर्ड-घोषणा' समक्षमुपागता । शासनेन स्वीकृतं यत् प्रशासनस्य प्रत्येकं शाखायां भारतीयानां सहयोगो वर्धेत स्वशासिताः संस्थाश्च क्रमिकान् विकासान् प्राप्नुयुरिति। श्रीमती एनी-बीसेण्टमहोदयाऽपि कारातो विमोचिता। अतीव श्लाघनीयेन स्वागतेन साऽभिनन्दिता। इदमासीत् साफल्यं पण्डितश्री-मोतीलालनेहरूणां तत्पुत्रश्रीजवाहरलालस्य राष्ट्रवादिन्या जनतायाश्च ।

यस्मिन् कर्मणि सात्त्विकी विलसति श्रद्धा तथा स्वात्मनो,
निःस्वार्था प्रकृतिः परोपकृतये सम्प्रेरयत्यञ्जसा।
विश्वासश्च विराजते जनगणस्यापि स्वयं प्रेरित-
स्तत्रायान्ति नहि द्रुतं सफलताः स्वेच्छानुरूपाः कथम् ? ॥२२॥

□

[३]

स्मृति-कला

इन्दिरा-प्रियदर्शिनी

एषा शुभ्रा न तन्वो′ विदानोर्ध्वेव′ स्नाती दृशये′ नो अस्थात् ।
अप द्वेषो बार्धमाना तमां′स्युषा दिवो दु′हिता ज्योतिषागा′त् ॥

—ऋ० ५।८०।५

सानन्दं नन्दयन्ती परिजनमखिलं मातुरङ्के लसन्ती,
सिन्दूराभां सृजन्ती मृदु-मुदित-मधु-स्मेरवक्त्राब्जकान्तिः ।
सान्द्रा स्वारस्यसिक्ता ह्यचिर-विकसितेन्दीवरश्रीसनाथा,
पीयूषं संस्रवन्ती सुखयति सकलान् सन्ततिः सर्वदैव ॥१॥

गङ्गा-यमुनयोस्तथा पौराणिक्याः सरस्वत्याः सङ्गम-परिसरभूमौ भारतस्य प्रमुखेषु सांस्कृतिकेषु प्रशासनिकेषु च केन्द्रेषु कदाचिन् महनीयं स्थानं प्राप्तवतः **प्रयागा**परनाम्न **इलाहाबाद**नगरस्य सुप्रसिद्धम् '**आनन्द-भवनं**' नेहरू-परिवारस्य **वैभवेन** सहैव राजनीतेः प्रवेशात् समाजस्य सर्वेषु वर्गेषु सम्मानास्पदं भाविनो-नामाशानां केन्द्रञ्चावर्तत। समृद्धेः स्वदेशभक्तेश्च सङ्गमायिते तस्मिन् भवने भारतस्य स्वातन्त्र्याय चिन्तयन्तो नेतारः कार्यकर्तारश्च प्रायः प्रत्यहमेव गोष्ठी-मुपवेशनं मित्यङ्गं वा संयोज्य योजना निर्णयांश्च कुर्वन्ति स्म। शनैः शनैः सम्पदो मोहं विमुच्य भारतस्वातन्त्र्याय स्वीयं कर्तव्यं प्रति जागरूकता नेहरूपरिवारमात्मसात् कुर्वती व्यलोक्यत।

श्रीजवाहरलालनेहरूर्विदेशादागत्य स्वपितृपादानां पण्डितश्रीमोतीलाल-नेहरूणां सांनिध्यादात्मनश्चिरकाङ्क्षितां भावनां मूर्तिमतीं व्यदधात्। विदेशे निवसन् स मातृभूमेः स्वातन्त्र्याय सङ्घर्षयुक्तानि जीवनचरित्राणि पठन् प्रायोऽ-चिन्तयद् यद् "अहमपि भारतमातुः स्वतन्त्रतायै सुसज्जः सेवकः सन् योत्स्यामि ।" इति । तदनुरूपमेवात्र श्रीमोतीलालमहोदयैः सह भारतस्य महद्भिर्देशभक्तैः स मिलितः सङ्घर्षाणामान्दोलनानाञ्च स्थितेः परिचयं प्राप्नोत्। स्वीयं कर्त्तव्यं व्यचारयत् प्रान्ते सर्वाणि सुखानि विमुच्य भारतमातरं विदेशिशासनान्मोक्तुं स्वा-धीनता-यज्ञे स्वीयामाहुतिमर्पयितुं कृतसङ्कल्पोऽभवत् ।

श्रीमती कमला-नेहरू: स्वकीय-स्वभावात् कोमला लज्जावती सरला चावर्तत। श्रीजवाहरश्च तारुण्योचितां वीरवृत्तिं धारयन् विश्वस्य घटनानां तथा देशे प्रवर्तमानायाः स्वातन्त्र्यप्रवृत्तेर्विषये सावधानस्तादृश्य एव वार्ताः श्रुत्वा प्रसीदति स्म श्रीमतीं कमलामपि च श्रावयित्वा स्वदेशसेवायै प्रेरयति स्म। शनैः शनैः साऽपि प्रसुप्तप्रायं स्वदेशाभिमानं प्रबुद्धमिव कृत्वा परिवारेण सह स्वातन्त्र्यसङ्घर्षे वीररमणीव सहयोगिन्यभवत्। सा स्वभावाच्छान्ता सत्यपि समस्ते परिवारे प्रभावशालिनाऽङ्केन सर्वेषां सम्मानभागवर्तत। तस्या हृदये राष्ट्रं प्रति कर्तव्यपालनस्य यावती दृढताऽविद्यत यादृशी च निष्ठाऽवर्तत तस्याः परिचयस्तया बहुधा प्रस्तुतः। यदा श्रीजवाहरलालमहोदयः श्रीगान्धिनामान्दोलने संयुयुक्षुरासीत्, परिवारस्य वैभव-शालि जीवनं परिवर्तयितुमभ्यलषत् तथा स्वीयं वाक्कीलता-व्यवसायमपि त्यक्तुमैच्छत् तदा सर्वेऽपि पारिवारिकास्तदीयं विरोधं कर्तुमुद्यता आसन्, किन्त्वेकैव श्रीमती कमला तादृश्यवर्तत या सोत्साहं तस्मिन् कर्तव्ये कर्मणि पूर्णं सहयोगमदात्। यदा श्रीजवाहरलालस्तथाऽन्ये परिजनाः स्वतन्त्रता-सङ्ग्रामे सक्रिया आसंस्तदा सा महाभागाऽपि कारावासेष्ववसत् कष्टान्यसहत किञ्च बहिःस्थिता स्वयंसेवकानां सङ्घटनानां तथा विरोध-प्रदर्शनानां नेतृत्वमपि निरवहत्।

एकतो यूरोपस्य महायुद्धमतीव विस्फोटकं प्रवृत्तमासीत्, समग्रं विश्वं चिन्तायाः पीडाया आशङ्कायाश्च शिखरे स्थितं युद्धस्य विभीषिकां पदश्यदभूत्। अन्यतश्च पराधीनतायाः शृङ्खलास्त्रोटयितुं भारतस्य यौवनमाकुलमवर्तत। विदेशिवस्तूनां बहिष्कारैः स्वदेशि-वस्तूनां स्वीकारैः सह भारतीया देशभक्ताः शिरःसु शवचीराणि बद्ध्वा प्राङ्गणे निःसृता आसन्। क्रान्तेः स्वरः कस्मिन्नप्येकस्मिन् क्षेत्रे सीमितो न भूत्वा नगराणि ग्रामान् यावच्च व्याप्तिमगच्छत्। विदेशिनः प्रति समग्रेऽपि देशे आक्रोशोऽविद्यत। स्थाने स्थाने आन्दोलनानि जागरितानि। जनसभा भवन्ति स्म; निग्रहणानि जातानि, काराः पूरयितुं जनता सोत्सुकाऽभूत्। बोल्शेविक-क्रान्तिः साफल्यमाद्यान्यान् क्रान्तिकर्तॄन् वीक्षते स्म। भारतस्य क्रान्तिकारिषु तस्याः प्रभावः स्पष्टतया दृष्टिपथमायाति स्म। श्रीजवाहरलालः प्रत्यक्षतया स्वाधीनता-सङ्ग्रामेऽवातीतरत्। आनन्द-भवने तदा देशभक्तानां गोष्ठ्यः प्रचलन्ति स्म तस्मात् कारणादानन्दभवनं राष्ट्रमुक्तेरान्दोलनस्य गतिविधीनां प्रधानं केन्द्रमभवत्।

आसीदयं वर्षः १९१७ तम ईशवीयस्य। नवम्बरमासस्यैकोनविंशे दिनाङ्के श्रीमतां मोतीलालनेहरूणां पुत्रवधूः श्रीजवाहरलालस्य पत्नी श्रीमती कमला निशीथे सुकुमारामेकां बालिकां प्रासूत। कमलवत् कोमला तथा पाटलवर्णा सा बालिका कोमलतामान्तरिकीमूर्जाशक्तिं च नीत्वा सर्वेषां ग्रहाणामानुकूल्य-

शालिनि समये जनिमलभत। आनन्दभवनममन्दानन्देन तुन्दिलमभवत्। सर्वेषामपि मुखानि परमोत्साह-संवलितस्मिति-सोदराणि समालोक्यन्त।

सद्योजाताय जातकाय सर्वतः प्रथमं भवनस्थितेषु वृद्धेषु वृद्धतमस्य **'मुबारक-अली'** महाभागस्य शुभाशिषः प्राप्ताः। स हि महाभागो **'बदायूं'** वास्तव्य आसीत्। १८५७ ईशवीये स्वाधीनता-सङ्ग्रामे सक्रियभागग्रहणात् तदीयः परिवारोऽप्याङ्ग्लानां क्रूरस्य दमनस्याखेटतां गत आसीत्। सकलोऽपि परिवारो भङ्क्त्वा विकीर्णः। पं० मोतीलालनेहरूणां स कथनाय तु लिपिकोऽभूत् परं दीर्घकालिकस्नेहसेवावशात् परिजनेषु मान्यः सहोदरकल्प आनन्दभवनस्य व्यवस्थापकश्चासीत्। श्रीजवाहरलालस्य तथा तदीयानामन्यासां भगिनीनां लालनं पालनञ्चापि मुबारकअलीमहाशयस्याङ्के समवर्तत। नेहरूपरिबारस्य शिशवस्तत्सान्निध्येन राष्ट्रिया ऐतिहासिका लौकिकाश्च गाथाः श्रुत्वा वर्धमाना अभूवन्। वार्धक्यविवशस्य-'कैन्सर' रोगाक्रान्तस्य तस्य बलवतीच्छाऽऽसीद् यत् स श्रीजवाहरलालस्य सन्ततिमेकवारमात्मनोऽङ्के पश्येदिति।

श्रीमती कमला शिशुं प्रसूतवती, तदैव सं काश्मीरिकोर्णाप्रावरणेनाच्छाद्य मुंशी-मुबारकअलीमहाभागस्य समीपमानायिषत। श्रीमोतीलाला अपि सहैवावर्तन्त। शिशुं दृष्ट्वैव तस्य जराजर्जरितयोर्नयनयोर्दीप्तिः प्रास्फुरद् हर्षाश्रुबिन्दव उद्गतास्तथा गद्गदेषु स्वरेषु स आशीर्वचांस्युदचरत्—"भ्रातृवर ! (श्रीमोतीलाल !) हार्दिक्यो वर्धापनाः। अयं जातक ईदृश एव योग्यो महाँश्च भवतु यथा हि भवदीयो जवाहरः।" इयत्कथनेन सहैव स सहसा चिर-निद्राया अङ्के व्यलीयत। कोऽपि तावन्तमवकाशं नासादितवान् यः कथयेद्—"श्रीजवाहरस्य सन्ततिरियं नास्ति **'पुत्रः'** परं **'पुत्री'** विद्यत इति।" तदीया आशिषः सत्या एवाभूवन्।

शुद्धो विकाररहितः प्रणयाभिभूतो,
निःस्वार्थभावसुभगः स्वयमन्तरात्मा।
या आशिषो वितरति प्रकृतिः समस्ता—
स्ताः पूरयत्यविरतं परितः प्रशस्ताः॥२॥

प्रातस्तरामेवानन्दभवने सर्वानन्दसंवर्धिन्याः श्रीमोतीलालनेहरूणां पौत्र्याः श्रीजवाहरलालमहोदयस्य पुत्र्या जन्माभूदिति समुदन्तः कस्तूरिकासौरभवत् सततं सर्वत्र प्रासरत्। सकला अपि स्नेहभाजो वर्धापनाभ्य आयातुं प्रवृत्ताः। यदा तेषु वर्धापकेषु केनापि श्रीमती स्वरूपरानी पौत्रीजन्माभिलक्ष्याभिनन्दिता तदा मनाक् खिन्नेव सावादीत्—'अये ! अपेक्षितं तु जन्मासीत् पुत्रस्यैव……।' अर्धोदितमिदं श्रुत्वैव मध्येवाक्यं श्रीमोतीलालनेहरूभिर्निरुद्ध्योक्तं 'मैवं वोचः।' 'वयं पुत्रे पुत्र्यां वा भेदं न गणयामः। अस्माकं परिवारे सर्वेऽपि समाना एव मन्यन्ते। इति श्रुत्वैव सा मौनमस्थात्।

नाम-निर्धारण-वेलायामपि कश्चिदीदृश एव विचित्रः संयोग उपातिष्ठत्। पितामही-पितामहश्च नवजातायास्तस्या अभिधानम् **"इन्दिरा"** इति निर्धारयितुमकामयतां परं माता-पितरौ तस्याः परमाह्लादप्रदं स्वरूपं दृष्ट्वा **'प्रियदर्शिनी'**इति नाम निश्चेतुमचीकमताम्। स्वल्पोहापोहयोरनन्तरं सर्वेषामपि सम्मिश्रितस्य प्रेम्णः कारणाद् **"इन्दिरा प्रियदर्शिनी"**ति शुभं नाम निरधारि। वस्तुतः सा दर्शनेऽतीव प्रिया वपुषा कोमला कमलवदरुणारुणविग्रहा चावर्तत। आत्मीयानां हितैषिणां सुहृदाञ्च वर्धापनानि सर्वत आपूरयन्ति स्मानन्दोदधिम्। वर्धापनासन्देशेषु श्रीमत्या **सरोजिनीनायडू**-महाभागया पण्डितायाभिनन्दनेन सह लिखितमासीत्—**"कन्येयं भारतस्य नवीन आत्माऽस्ती"**ति। एवमेवान्यैरपि 'क्रान्तिदूती', 'स्वातन्त्र्य-सहचरी' 'स्वाधीनता-सङ्ग्राम-पताका' प्रभृतिभिर्विविधैराशंसनैर्नितरामभिनन्दितः श्रीनेहरूपरिवारः।

भविष्यतो गर्भगतं किमस्तीत्येतत् कथं कः परिवेत्तुमीष्टे ?।
परं परेशस्य कृपा-प्रसादात् सत्यं भवत्यत्र सतामभीष्टम्॥३॥

'प्रियदर्शिनी' प्रसन्नया मुखश्रिया सर्वान् समाह्लादयन्ती बाल-सुलभेन चापलेन स्फुरन्ती मङ्गलदीपिकेवाभूदानन्द-भवनस्य। दृढाया मनोवृत्तेः पितामह्याः पावनायाः प्रीतेः प्रसवित्र्याः सर्वातिशायिनः सारल्यस्य पितुः साहससम्पृक्तस्य गाम्भीर्यस्य तथा भ्रातृष्वसॄणां मोदमसृणस्य स्नेहस्य प्रभावाश्चातितरां तां प्रभावयितुं प्रारभन्त। तपसस्त्यागस्य निष्ठायास्त्रिवेणीव तीर्थराजेऽपरत्रिवेणीव जन्म प्राप्ता प्रियदर्शिनी सा पितामहेषु सुतरां स्निह्यति स्म। यदा तेऽट्टहासं कुर्वन्ति स्म तदाऽऽनन्दभवनस्य सकलमभ्यन्तरङ्गं हासेन गुञ्जितं भवति स्म किञ्च यदा ते कमपि विचारं पुरः स्थापयन्ति स्म तदा तं परमेण दाढर्येनोपस्थापयन्ति स्म। इन्दिराया लालनं सामान्य-बालकानामिव केवलं विनोदायाश्वासनायैव वा नाभूत् तस्मिन् हार्दिकेन स्नेहेन सहैव दासतापाशमोचनपूर्वकं स्वतन्त्रता-समवाप्तेश्चिन्तनवीचीनां प्रवेकोऽपि सममेवाभूत्। अत एव तस्याः प्रत्येकमङ्गं देशसेवा-संस्कार-संस्कृतं सत् परिपोषं प्राप्नोति स्म।

बाल्ये सेचयतः शिशोः सुसरणौ पित्रोः कुले भास्वरान्,
संस्कारानथ पारिवारिकगणा अङ्कूरयन्ते गुणान्।
वृत्तिं पल्लवयन्ति तस्य परितः प्राप्तप्रसारा जनाः,
कर्माण्याशु च पुष्पयन्ति सुकृतीस्तैः शोभते बालकः॥४॥

☐

□ शैशव-संस्काराङ्कुरणम्

श्रेष्ठा यत्र परम्परा कुलमथो सर्वात्मना निर्मलं,
शुद्धा दीप्तिमती विचारसरणिः संवेदनोत्कं च हृत्।
आदर्शाः परमोन्नताः प्रतिजनं प्रीतिर्मतिः सात्त्विकी,
तत्रैवावसति स्वयं विकसिता संस्कारिता सन्ततम्॥१॥

इन्दिराया जन्म तस्याः पितामहीपितामहयोर्मातापित्रोः ज्येष्ठ-कनिष्ठ-भ्रातृव्याभ्रातृव्यानां पितृस्वसृणां तथाऽन्येषां परिजनानां महत आनन्दस्य जनकमभूत्। सर्वेषां मनःसु तस्याः कमनीयं रूपं कमप्यनिर्वचनीयमुल्लासं तनोति स्म। तदीयानि कल-मधुराणि वचांसि मनोमन्दिरे मङ्गलवाद्यानीव नदन्ति स्म। चञ्चले विलोचने निसर्गत एव स्वान्तमाकर्षयन्ति स्म। तस्या मुखाकृतिर्नयन-लोभनीयाऽवर्तत। मन्दस्मितसमुदञ्चितं वदनं मनो मोहयति स्म। गृहेऽतीव स्नेहेन सा लालिता पालिता च। लालने पालने च तत्रापि पूज्याया मातुर्विशिष्टं स्थानमासीद् यथा हि प्रायेण मातृणां भवति।

भारते विदेशि-शासनं प्रति सर्वत्रान्दोलनानि प्रवृत्तान्यभूवन्। यदा प्रियदर्शिनी वयसो द्वितीये वत्सरेऽवर्तत तदैव ब्रिटिश-लोकसभया **"रौलट एक्ट'**-नामकं कृष्णं विधानं स्वीकृतम्। यद्यपि साम्राज्यवादिनीनां शक्तीनां सहयोगः सामाजिकशोषणायान्यायस्य च प्रोत्साहनायैवासीत् परं स्वातन्त्र्यप्राप्तेरभिलाषतो युद्धे सर्वविधः सहयोगो भारतीयैर्विहितः। तथाप्याशाया विपरीतं रौलट-विधानं भारतीयैः प्राप्तं यस्मिन् 'कमपि जनं संशये सति कारायां निपातयितुं तथा-ऽऽवृते प्रकोष्ठे तस्मिन्नभियोगं चालयितुं शासनं स्वतन्त्रमभूत्।' सहैव **'जलियां-वाला'**ऽभिधस्योद्यानस्य क्रूरतम-नरहत्याकाण्डमपि तेनोपहृतम्। दमनचक्रस्य तां चरमां स्थितिं विमृश्य भारतीया अतीव खिन्ना आसन्। श्रीगान्धिनो नेतृत्वे-ऽसहयोगान्दोलनं प्रवर्तितम्। श्रीमोतीलालनेहरूमहाशया — ये प्रारम्भे सत्याग्रहेण देशस्य स्वतन्त्रता-प्राप्तेः प्रयोगमुपहासास्पदं मन्वते स्म, तेषामेवानन्दभवने प्राय एतादृशीणां घटनानां विचारणाः योजनानां निर्मितयस्तासां क्रियान्वयनानि च प्रस्तूयन्ते स्म।

रौलटविधानेन ब्रिटिशशासकेभ्यो भारते 'राजनीतिक-प्रक्रियाणां दमनस्य निर्बन्धोऽधिकारः' प्रदत्तः। तदाधारेणारक्षिणः स्वतन्त्रतया निग्रहणं कारागारे स्थापनं पूर्वसूचनां विनैव सभानां भञ्जनं तत्र समवेतेषु यष्टिकानां प्रहरणं गुटिका-प्रक्षेपणं चाकार्षुः। तस्य कृष्ण-विधानस्य विरोधाय भारतीयास्तीव्रं सङ्घर्षं प्रारभन्त। श्रीमोहनदासकर्मचन्द्रगान्धिनं सङ्घर्षः स राष्ट्रनेतारं व्यदधात् तथा देशवासिनां महताऽऽदरेण स **'महात्मा गान्धी'**ति संज्ञामलभत।

महात्मा श्रीगान्धी रौलट-विधानस्य विरोधाय **'सत्याग्रहसभा'**मस्थापयत् किञ्च तस्याः सदस्यत्वाय जनान् न्यवेदयत्। तस्याः सभायाः सदस्यैरिदं प्रतिज्ञातमभूद् यत् 'तेऽन्यायपूर्णानि विधानानि न स्वीकरिष्यन्ति तथा सविनयावज्ञायै कारावासादपि विमुखा न भविष्यन्ती'ति। इत्थं सन् १९१९ ई० वत्सरे प्रवर्तितस्यान्दोलनस्य विवरणानि वृत्तपत्रेष्वपि प्रकाशितानि तानि च श्रीजवाहरेणापि पठितानि। असहयोगेन राजनीतिक-परिष्कृतेस्तथा सर्वकार-परिवर्तनस्य वार्तया श्रीजवाहरः सुतरामाकृष्टोऽभूत्।

विषमायां परिस्थितावन्ततः पन्था निःसृतः —एकः प्रकारो यः सरल उद्घाटितः समुचितश्चावर्तत। नेहरू-परिवारस्य केचन सदस्यास्तस्मिन्नान्दोलने समावेष्टुमुत्सुका अभूवन्, श्रीजवाहरलालस्तेषु प्रथम आसीत्। श्रीमोतीलालमहाभागानामन्तःकरणमिदं स्वीकर्तुं सज्जितं नाभवद् यन् मुष्टिमेयानां जनानां कारावासाद् देशस्य किमपि हितं भवितुमर्हतीति ? विषयमिममुपनीय पितृ-पुत्रयोः परस्परं विवादाश्चलन्ति स्म येषां कारणाद् गृहस्य शान्तिरपि भग्नप्राया व्यलोक्यत। प्रत्येकं स्थितौ मार्गनिःसारणे प्रवीणाः श्रीमोतीलालनेहरूमहाशयाः समाधानमेकं गवेषयन् यत् सरलं स्पष्टञ्चावर्तत। ते श्रीगान्धिमहाभागान् स्वकीय आनन्दभवन एवाकारयन्। तैः सह सुदीर्घां चर्चां विधाय भारतस्य समस्यानां विविधानि समाधानानि प्रास्तुवन्। अन्ते तेषां चर्चा श्रीजवाहरे केन्द्रिताऽभवत्, तेऽवाञ्छन् यत् केनाप्यकाट्येन तर्केण जवाहरः सत्याग्रहसभायां प्रवेशाद् निरुध्येत। श्रीगान्धिनोऽपि नेच्छन्ति स्म यत् पितृपुत्रयोर्मध्ये किमपि मनोमालिन्यमागच्छेत्। अत एव ते श्रीमोतीलालनेहरूणां सम्मत्या सहमता अभूवन् यद् "जवाहरेणातुरतया कोऽपि निर्णयो न विधातव्य"इति। परं श्रीगान्धिनामयं परामर्शो निरर्थक एव संवृत्तो यतो हि शीघ्रमेव घटनाक्रमेणेदृशं वलनं प्राप्तं यतः सर्वोऽपि विचारः परिवर्तनं प्राप्नोत्, सा हि घटनाऽभूदतीव लोमहर्षिका पञ्चाम्बुप्रान्तस्थामृतसरनगरे निःशस्त्रेषु भारतीयेषु गौराङ्गशासकानां रक्तपूर्णमाक्रमणम्। तया घटनया न केवलं जवाहरलाल एव सत्याग्रहग्रहिलोऽभूदपि तु स्वयं श्रीमोतीलालमहाभागा अपि श्रीगान्धिनां नीतेः प्रवृत्तेश्च सर्वथाऽनुयायिनः संवृत्ताः। यतः —

> **दुर्नीति-दुःशासन-दुःखदग्धा, मुग्धा अपि स्फूर्तिमुपाश्रयन्ते।**
> **उद्बुद्धभावा नृपनीतिविज्ञास्तिष्ठन्तु कस्मात् पुनरत्र शान्ताः॥७॥**

श्रीगान्धिनो देहलीं प्रस्थिताः। आन्दोलनं वेगवदभूत्, रौलट-विधानस्य समाप्तेर्याच्ञायाः समर्थने ३१ मार्च १९१९ ई० दिने देशव्यापिनः कर्मावरोधस्य घोषणाऽभवत्। जनतायाः स्फूर्त्या ब्रिटिशशासकाश्चिन्तिता व्याकुलाश्चाजायन्त श्रीगान्धिनश्च तैर्निगृहीताः दिल्ल्यां तथान्येषु नगरेषूपद्रवः प्रारब्धः। सभासु

चलसमारोहेषु च शीघ्रं प्रतिबन्धा घोषिताः । स्वीयं प्रबलं विरोधं प्रकटयितुं 'जलियाँवाला'-नामक उद्याने सभायां २३ अप्रैलदिवसेऽनेकसहस्रसंख्यकाः स्त्रियः पुरुषाश्च सोत्साहमेकीभूताः । सर्वतः समुन्नतेन प्राकारेण परिवृतस्य तस्योद्यानस्य यातायाताभ्यामेकमेव द्वारमवर्तत । **जनरल-डायरस्तां** सभां भङ्क्तुं गुटिकास्त्राणां भीषणं वर्षणमकारयत् । तेन परःसहस्रा जना मृताः । क्षते क्षारं पूरयितुमिव 'इङ्ग्लैण्ड-महिला'-नामकेन केनापि समूहेन शुल्कसङ्ग्रहपूर्वकं स्वर्ण-खड्गोपहारेण च स सत्कृतः । परं तदीयैः क्रूरकर्मभिः स डायरः — **'हिंस्रः स्वपापेन विहिंसितः खल'** इति किंवदन्त्यनुसारमन्ते स्वपदात् त्यागपत्रदानाय स्वयं विवशोऽभूदेव ।

अन्यायिनामुद्धत-शासकानां, क्रूरक्रिया-वर्तनतत्पराणाम् ।
पापानि सम्भूय दुराशयाँस्तानन्ते समूलं विनिपातयन्ति ॥८॥

श्रीगान्धिनोऽप्यतितरां खिन्नाः सत्याग्रहान्दोलनं न्यरुन्धन् परं तस्यैकः सुखदः परिणामोऽयमभूद् यद् भारतीयं राष्ट्रियकाङ्ग्रेसदलं तेषामसहयोगनीतेः पोषकमभूत् । निःशस्त्राया निरीहाया जनताया इत्थं कृतया हिंसया श्रीमोतीलाल-महानुभावानां विचारेऽत्रामूलं परिवर्तनं विहितम् । ते श्रीगान्धिनां प्रबलाः प्रशंसकाः श्रीजवाहरलालस्य मतं प्रत्यनुकूलाश्चाभूवन् । तेषां विचारपरिवर्तन-मियत्या नाटकीयपद्धत्या सम्पन्नं यत् ते समुचितं प्रचलन्तं वाक्कोलताव्यवसायं परित्यज्य प्राण-प्रणेन राजनीतावतीर्णाः । यदा काङ्ग्रेसेन जलियांवालाकाण्ड-स्याधिकृतज्ञप्तये **'परीक्षणसमितिः'** समायोजिता तदा तस्यां श्रीमोतीलालनेहरू-महाशयाः श्रीजवाहरलालस्तथा श्रीगान्धिनः सममेव सदस्यानां रूपेण तत्र गता आसन् ।

श्रीनेहरूपरिवारस्य बालकानां जीवनस्य धारा अपि घटनाक्रमेण सह परिवर्तयितुं प्रारब्धाः । आनन्दभवनस्य वैभव-परिपूर्णं वातावरणमपि सरलायां जीवन-पद्धतावतीर्णम् । न चिरादेव जीवन-प्रवाहः परिवृत्तः । यत्रैश्वर्यस्योन्मुक्तो विलास आसीत् तत्रैव सारल्यस्य निवासोऽभवत् । भोजन-मञ्चकेषु यत्र देशि-विदेशिभोज्यानां सर्वोत्तमाः प्रकाराः पुरस्क्रियन्ते स्म तत्रैवातीव सामान्यता-शालीनि भारतीयानि भोज्यानि स्थालीषु लसन्ति स्म । रोटिका द्विदली द्वित्राः शाका दधीनि चट्टनिका ओदनमन्ते मिष्टान्नमिति भोज्यं सर्वैः स्वीक्रियते स्म । बालिका प्रियदर्शिनी मूकदर्शिनीव परिवर्तनमिदं दर्शं दर्शं किं मनसि व्यचारय-दिति तु न शक्यते गदितुं, परं तस्यां वैभवस्य सामान्यायाः स्थितेश्च शिक्षाऽवश्य-मेव गृहं कृतवती । सर्वास्ववस्थासु समानभावस्य प्रथमः पाठस्तया तत्रैव पठितः किञ्च यत्रानन्दभवने मनोरञ्जनालापा हासपरिहासाश्च भवन्ति स्म तत्रैव प्रपुष्टानां राजनीतिकचर्चाणां गभीरेण वातावरणेन स्थानं प्राप्तमासीत् । अति-

थीनामागमनानि तेषां स्थितयः परस्परमान्दोलनसम्बन्धिनो विचार-विमर्शाश्च राजनीतिकं स्वदेशस्य स्वाधीनतायै त्यागस्य बलिदानस्य च शिक्षणमनायासेनैवाशिक्षयन्।

आगन्तृषु प्राघुणिकेषु तत्र खद्दरवासोधराः श्रीगान्धिनामनुयायिनो नेतारः कार्यकर्तारः स्वयंसेवका राजनीतिविशारदा उत्तमोत्तमकोटिकाः सामान्या असामान्याश्च सर्वेऽप्यभूवन्। तेषां सर्वेषां वैचारिकाः प्रभावा बालिकाया इन्दिराया जीवनं घटयितुं मनोभूमिं सज्जयितुं तथा कर्तव्यबोधं परिणमयितुमुपयोगिनोऽभवन्। तदानीमिन्दिराया बाल्यं संरक्षिकां धात्रीं विना निर्बन्धमेवावर्तत, तस्मात् स्वच्छन्दतया भ्रमन्ती गभीरेण भावेन महतां वार्ताः सकुतूहलं शृण्वती व्यराजत्। देशस्येतिवृत्तनिर्मितौ महत्त्वपूर्णां भूमिकां निर्वोढुं संलग्नमानसानां तासां वार्तानां महदङ्कनमिन्दिराया मानसेऽपि गभीरतया स्थिरतामलभत। पितामहाः स्वस्यां पौत्र्यामतीव गर्वमावहन्ति स्म। ते तामतितरां मन्वते स्म किञ्च सर्वेषामतिथीनामग्रे तस्या भूयसीं प्रशंसामप्यकुर्वन्।

एकदैकस्याधिकरणस्य प्रसङ्गेन कलकत्तानगर्यां यात्रायां श्रीमोतीलालमहाशयाः स्वस्या द्विवार्षिक्याः पौत्र्या इन्दिरायाः कृते 'मैसर्स व्हाइट्वे लेडला'-विपण्यै बाल-शकटिकायाः क्रयादेशमदुः। तदा स्वीये पत्रे ८ मार्च १९२० ई० दिने तैर्लिखितमासीत् —

"अहं सदैवेन्दिराया विषये चिन्तयामि। निश्छलताया मूर्तिमत्यास्तस्या विचारः सदा मां सान्त्वयति। अतीव सारल्येनेयं प्रवृत्तिमूर्तिपूजां प्रति तथा ताः सर्वा वार्ताः प्रत्याकर्षयति या आधुनिकी सभ्यता बुद्धिरहितेष्वन्धविश्वासेषु गणयति। इन्दिराया विशिष्यावधानमपेक्षितं विद्यत" इति। एतेन तेषामिन्दिरां प्रति कियान् दृढोऽनुराग आसीदिति स्पष्टं प्रतीमहे।

श्रीगान्धिमहाभागानां प्रखरा बुद्धिर्नैतिकी संवेदनशीलता न्यायोन्मादः सुदृढेच्छाशक्तिः सचेतना विनम्रता विवाद-प्रचारयोर्विवेकश्चेत्यादयो गुणा विचित्राः किन्तु प्रभावशालिन आसन्। इदं सम्भवं नासीद् यत् ते 'वायवीय-स्वप्नद्रष्टार' इति कथयित्वोपेक्ष्येरन्। तेषां मस्तिष्कस्य धार्मिक्या रचनया तदीय-व्यावहारिक-बोधस्य निर्बलकारणापेक्षया सबलत्वमेव सम्पादितमासीत्। १९१९ ई० वर्षस्य प्रारम्भे श्रीजवाहरलालः प्रागेव महात्मगान्धिनां वर्गीकरणे स्थानं प्राप्त आसीद् वर्षस्य समाप्तिं यावच्च तदीयाः पितृपादा अपि श्रीगान्धिभ्यः सम्पूर्णरूपेणादरभावान् व्यकासयन्। इदमेव कारणमभूद् यत् पुत्रः पिता चोभावेवैकस्यां पङ्क्तौ समानत्वेनोपागच्छताम्।

पञ्चाम्बु-प्रान्ताय श्रीमोतीलालमहाभागाः राष्ट्रियसेवादृष्ट्या वैधानिकं

राजनीतिकं च महत्त्वपूर्णं कार्यं समपादयन्, तत्परिणतिरूपेण च तेऽमृतसर-काङ्ग्रेसस्याध्यक्षा निर्वाचिताः। महता समारम्भेण ते राष्ट्रियनेतॄणां गौरवपूर्णायां मण्डल्यां मण्डिता अध्यक्षीयं भाषणमदुः। तस्मिन्नेव भाषणे श्रीमद्भिर्मोतीलालनेहरूभिः 'श्रीगान्धिनस्तदानीन्तनेषु भारतीयेषु सर्वाधिकमादरणीया भारतीया' अथ च तेषां सत्याग्रहान्दोलनं 'प्रचुरसम्भावनाशालिन्येका नवीना शक्ति'रस्तीति प्रोक्तमासीत्। तरुणो नेहरूः प्रायो महात्मगान्धिभिः सहावालोक्यत तदीया ख्यातिश्च वासन्तिकसौरभवत् सर्वत्र प्रसृतिं लब्धुं प्रावर्तत। श्रीगान्धिभ्यः सोऽसाधारणं लालनं स्नेहञ्च प्राप्नोत्।

१९२० ई० वत्सरस्य शरत्कालिकेऽधिवेशने श्रीगान्धिनामसहयोगनीतेरङ्गीकारानन्तरम् असहयोगस्य कार्यक्रमे-सर्वकारीय-पदवीनां, सर्वकारीयाणामथवा सहायताप्राप्तानां विद्यालय-महाविद्यालयानां न्यायालयानां विधानसभानां तथा विदेशिवस्तूनां बहिष्काराः सम्मिलिता आसन्। अन्यायपूर्णानां विधानानां विरोधस्तथा शान्तिपूर्वकं कारायात्राणां सज्जताया घोषणाऽपि स्वीकृताऽभूत्। सा घोषणा नेहरूपरिवारं सहसाऽऽत्मसाद्विधायात्मानं साक्षादुपास्थापयद्। बहिष्कारः कारावासश्च द्वावेव परिवारे प्रवेशं प्राप्य तस्य जीवनपद्धतिमेव परिवर्तन-पथे प्रेरितवन्तौ। यतो हि —

यस्मिन् रज्यति मानसं वितनुते वृत्तिं तथाऽऽमज्जति,
प्राशस्त्यं मनुतेऽङ्कपालयति यं यत्रात्मना मोदते।
यञ्च स्वीकुरुते प्रतीच्छति धिया यस्मै चिरं स्पर्धते,
तत्प्राप्तौ च समं विहाय मनुजस्तत्रैव विश्राम्यति॥९॥

☐ परिवर्तनस्य पराकाष्ठा

यत्र त्यागमयी मतिः कृतिरथो निःस्वार्थभावाञ्चिता,
चारित्र्यं च समुज्ज्वलं शुचियुतं सौहार्दसम्पन्नमयम्।
भव्ये मानसमन्दिरे सुविततं यत्रास्ति सिंहासनं,
सत्यस्य प्रतिमा विराजतितरां तत्रैव पुण्योर्जिता॥१०॥

श्रीमतां गान्धिमहात्मनां धीरा गभीरा सत्योपासन-सरणिः सरला सारावगाहिनी विस्मयकारिणी चावर्तत। दर्शनेन चिन्तनेन च सा जनान् स्वयमाकर्षयति स्म, परं तस्या जीवनेऽवतारणमतिक्लिष्टमेवासीत्। यतस्तेषां महामनस्विनां ज्ञानाग्निदग्धकल्मषाणां कुशल-कर्मयोग-विजृम्भितानां नैतिका आदर्शा अहिंसा-सत्यास्तेय-शौचेन्द्रियनिग्रह-प्रभृतीनाध्यात्मिकसिद्धान्तानधिकृत्यैव राष्ट्रजीवन-धारायामुपास्यन्ते स्म। विच्छिन्नरूपतां प्राप्ताया भारतीयजनतायाः प्रतिरोध-

शक्तेस्त्रोटन-स्फोटन - मारण-दारण - प्रवृत्तीरसहयोग-सत्याग्रहयोरभिनव-प्रणाल्या संयोज्य श्रीगान्धिनो वास्तविकान् राष्ट्रियतायाः साधकान् दीक्षयन्ति स्म। तथाविधेषु दीक्षितेषु प्रयागस्थः काश्मीराभिजनो विद्यावैभवविभूषितः श्रीनेहरू-परिवारोऽपि सश्रद्धं सुपरीक्ष्य विना कदाग्रहं स्वात्मप्रेरणया दीक्षितोऽभूत्।

राष्ट्र-सेवा-व्रतमाराधयतां श्रीमतां मोतीलालनेहरूणां वाक्कीलता-परित्यागान् महानायोऽवरुद्धस्तथा सर्वेऽपि परिवारसदस्याः आडम्बरविरह्तिया स्थित्या वस्तुं प्रवृत्ताः। भृत्यानां सङ्ख्या न्यूनीकृता। अतिमहर्घाणि काच-पात्राणि चीनीयानि मृत्पात्राणि वाजिशालायाः श्रेष्ठा अश्वाः श्वानस्तथा विविधप्रकारिका मदिराप्रभृतयो विलास-सामग्र्यो विक्रीताः, श्रीमतीस्वरूपरानी श्रीमती कमला च स्व-स्वसमीपे यानि महर्घशालीनि हीरक-मुक्ता-माणिक्यादिरत्नैः खचितानि सौवर्णान्याभरणान्यासन्, तेषु कानिचिदत्युपयोगीनि स्वस्वसमीपे संरक्ष्य शेषाणां विक्रयाय सहमते अभूताम्।

श्रीमोतीलालमहाभागाः स्वीयमानन्दभवनं काङ्ग्रेसाय समार्पयन् नवीनं किन्तु लघु भवनं यावन्निर्माय सज्जं नाभवत् तावत् तस्मिन्नेव पूर्वभवने स्थित्वा पश्चात् तत्रावासाय गताः। तस्य भवनस्याप्यभिधान'मानन्दभवन'मित्येव प्रतिष्ठापितम्। ततः पूर्वतनस्यानन्दभवनस्य **'स्वराज्यभवन'**मिति नाम प्रवर्तितम्।

स्वाधीनतायै तथा स्वदेशाय सर्वस्वमुत्स्रष्टुकामाः श्रीनेहरूणां सर्वेऽपि स्वजनाः सारल्य-संयम-साधनासु लीना अभूवन् तत एव च हस्तनिर्मितानां खादीवस्त्राणां धारणेऽपि तेषां रुचिरवर्धत। इन्दिराऽपि समग्रमिदं परिवर्तनं दर्शयन्ती बहुधा तथैव वर्तयितुमवाञ्छत् परं परिवारस्य ज्येष्ठास्तथा कर्तुं निषेधयन्ति स्म। लघीयस्या बालिकायास्तथाविधं परिवर्तनं तेभ्यो नारोचतानावश्यकं च तेऽमन्यन्त तस्यै। तथापि तत्रानन्दभवनस्य जीवने सम्पन्नमाकस्मिकं रूपान्तरणं प्रियदर्शिनी न व्यस्मरत्।

यदीय-मतिरुज्ज्वला विगत-भेद-भावं मनः,
क्वचिच्च नहि चिन्तनं ह्यनुचितं विचारेष्वपि।
सदा स्फटिकवद् भवेद् हृदयमप्यलं निर्मलं,
तदा न किमुताङ्कितं भवति नैव जातं पुरः॥११॥

सन् १९१९ ई० वर्षस्यान्तिमेषु सप्ताहेषु लाहौर-प्रवासे श्रीमतां मोतीलालनेहरूमहोदयानां श्रीगान्धिनां च मध्ये यत् सम्पर्कसूत्रं स्थापितमभूत् तदेवोक्तस्य परिवर्तनस्य साहजिकः परिणाम आसीत्। आनन्दविलासानां तथा शारीरिक-सुखानामुपभोक्तारः श्रीमोतीलालमहोदयाः साधुवृत्तीनां विराग-भाजां धर्मात्मनां जीवनेऽतिसाधारणतया सुखदुःखेष्वनुद्विग्नमानसानां श्रीगान्धि-

महाभागानां सांनिध्येन पारस्परिकेण श्रद्धाभावेनेयन्तः प्रभाविता आसन्, येनानन्दभवनस्य स्थितिराश्रमरूपतामेवाश्रयत् । तत्रेलाहाबादजनपदवासिनां केषाञ्चित् सम्भ्रान्तजनानां सायङ्कालिकमनोरञ्जनस्थान(क्लब)स्यापेक्षया खादीधारिणां राष्ट्रसेवाव्रतिनां यात्रायाः काले 'विश्रामस्थल'-रूपतैवाधिक्येनादृश्यत।

तत्र भूयोभूयः काङ्ग्रेसदलस्य कार्यकर्तॄणां गतागतैर्विभिन्नानां समितीनामुपवेशनादिभिश्च सम्पूर्णा गार्हस्थ्य-व्यवस्थाऽपि विपरिणतिं प्राप्तवती । परिवारस्य महिलाभ्य इदं कष्टकरं त्ववर्ततैव। ता अनुभूतवत्यो यत् सहसा तासां सुखानि विच्छिन्नतां गतानि येषां ता अभ्यस्ता आसन्, ययाः शान्त्यात्मभावेन च तासां नैरन्तर्यमासीत् तदखिलमपि ताभ्यो हृतमभूत्, परं हिन्दूनारीत्वस्य च्छायायां विद्यमानायास्त्यागवृत्तेरेव प्रभावात् स्वरूपरानी पुत्र्यः कमला च तत्परिवर्तनं प्रति शीघ्रमेव सामञ्जस्यमस्थापयन् । सामञ्जस्यस्यास्याः प्रक्रियाया मूले कारणमिदमभूद् यदस्य परिवर्तनस्य प्रेरक एको 'महात्मा'ऽवर्तिष्ट।

धनं प्रत्यनासक्तिं धारयतां श्रीमोतीलालनेहरूणां विचार आसीद्-'यदद्य यावदहं धनेन गवेषयन्नासं परमिदानीं मया बलात् तस्मै द्वारं पिहितमस्ती'ति। खद्दर-वस्त्रस्य शाटिका-कञ्चुकदुकूलानि वसानानां श्रीमोतीलालानां स्वजीवन-प्रवृत्तेर्विषये सन् १९२१ ई० वर्षस्यैकस्मिन् पत्रे श्रीगान्धिमहाभागेभ्यो लिखितं-मासीत् तैः —

"द्वयोर्भोजनालययोः स्थानमेकेन पैत्तलिकेन स्वयम्पाचनसाधकेन (कुकराभिधेन) प्राप्तमस्ति, एको भृत्यो विद्यते सोऽपि पूर्वभृत्यानामपेक्षयाऽकुशलः, अश्वानां पृष्ठेषु समूह्यागच्छतां तन्दुल-द्विदलीवेसवाराणां स्थाने केवलं त्रीणि सम्भरणसाधनानि सन्ति । प्रातराश-मध्याह्नभोजन-रात्रिभोजनानां वैदेशिक्या व्यवस्थायाः स्थाने विशुद्धं भारतीयं भोजनमास्वाद्यते तदप्येकवारमेव। आखेटस्य स्थाने भ्रमणं क्रियते । भुशुण्डीनां गुटिकास्त्राणां च स्थानं पत्र-पत्रिकाभिस्तथा पुस्तकैरुपलब्धम् । मम प्रियं पुस्तकं (सांगसेलेशितल) देवीगानमस्ति यस्याहं तृतीयवारं पारायणं करोमि। इदं विचित्रं परिवर्तनं विद्यते परं सत्यमेव मयेतः पूर्वं जीवनस्येयानितश्च श्रेष्ठ आनन्दः कदापि नैवानुभूत"इति।

इदं लेखनं समुचितमेवासील् तेषाम् । यतः —

हर्म्याणां रचनात् सुरत्नखचितालङ्कार-सन्धारणाद्,
बाह्याडम्बरतः प्रदर्शनविधेर्मिथ्या-प्रचारादपि ।
आनन्दः किल शक्यते न न चिरात् प्राप्तुं जनैर्भूतले,
प्राप्तोऽपि क्षणकस्तथा स वितथो दत्ते सुखं नो चिरम् ॥१२॥

इत्थमेव ५ फरवरी १९१९ ई० दिने स्थापितस्य **"इण्डिपैण्डेण्ट" नाम्नः समाचार**पत्रस्य सञ्चालन-व्यवस्थाया अपि काठिन्यं श्रीमोतीलालमहाशयानव्यथयत् । निर्धारितोद्देश्यानां पूर्तये प्रवर्तितमिदं वृत्तपत्रं नियतं प्रकाशयितुं तेऽतीव चिन्तातुरा अभूवन् । सम्पादकस्य स्थैर्यं धैर्यं, व्ययभारस्य व्यवस्थां, लेखानामुद्देश्यानुकूलतां प्रबन्धगतसुलभतां च व्यवसाययितुं कैश्चन सम्पादकैः सह श्रीजवाहरलालनेहरुणाऽपि सहयोगोऽदायि । यथाकथञ्चित् सा व्यवस्था प्रवृत्ता, अन्ते वृत्तपत्रं तदवरुद्धमेव, परं तस्य सम्पादनेन श्रीजवाहरलालस्य साहित्यिकीभ्यो राजनीतिकीभ्यश्च रुचिभ्य उत्तमोऽवसरः प्राप्तः । एकोपयोगिनी महत्त्वपूर्णा चाभिव्यक्तिर्मिलिता । १७ सितम्बर १९२० ई० दिने श्रीमोतीलालनेहरूभिः सगौरवं श्रीगान्धिभ्यो लिखितमासीद्—"भारते इदमेकमात्रमाङ्ग्लभाषाया दैनिकं पत्रं विद्यते यदसहयोगस्य पूर्णं समर्थनं करोति" इति । श्रीजवाहरलालस्य सम्पादकीयान् विचारपूर्णान् लेखांश्च पठित्वा श्रीमोतीलालमहानुभावा अतीवानन्दमनुभवन्तः प्रशंसा अप्यकुर्वन् ।

एतदन्तराल एव तरुणनेहरूः श्रीजवाहरलालः शासनस्यैकस्मिन् कुचक्रे पतितः । यदा स स्वीयां पितामहीं तथा धर्मपत्नीं रुग्णतायाः कारणाच्चिकित्सकपरामर्शानुसारं नीत्वा मसूरी-स्थले पर्यटितुं गतोऽभूत् तदाऽस्य 'सेवाय-विश्रामालय' एवैकमफगानशिष्टमण्डलमप्येकस्य कस्यापि सामान्यस्याफगान-ब्रिटिश-विवादस्य समाधानाय रात्रावबसत् । शासकीयेन गुप्तचरविभागेन तद्विषये किमप्याशङ्क्य श्रीजवाहरलाल आदिष्टो 'यत् स स्पष्टरूपेणेदं प्रतिवचनं दद्याद्-यदहं 'मफगानप्रतिनिधिभ्यो न मिलिष्यामि न च कमपि सम्बन्धं स्थापयिष्यामीति ।' तस्यादेशस्यास्वीकृतौ तत्कालमेव निर्वासनाऽऽज्ञाप्रदानस्याप्युल्लेखस्तत्रावर्तत । श्रीजवाहरेण कथितं—अहं तेषु प्रतिनिधिषु कमपि न जानामि न वा मम तैः सह सम्बन्धस्थापनस्यापीच्छा विद्यते । परं सिद्धान्तत एवंविधप्रतिवचनदानस्याहं विरुद्धोऽस्मि ।' तदनन्तरं तत्रत्यां स्थितिं समीक्ष्य मध्यमं मार्गमाश्रित्य स इलाहाबादं प्रत्यागच्छत् ।

तेष्वेव दिवसेषु निकटस्थाः प्रतापगढजनपदस्य शताधिकाः कृषकाः स्वीयानां कष्टानां विनिवेदना-विषये जनताया ध्यानाकर्षणायेलाहाबादनगरमागत्य यमुनायास्तटे स्थितिं विधायातिष्ठिपन् । श्रीजवाहरलालस्तेषां कष्टं ज्ञातुं तैर्मिलितः । ते सर्वेऽपि तमन्वरुन्धन् न्यवेदयँश्च जनपदमागत्य स्थितेः साक्षात्काराय । यतो हि तेषां ग्रामा राजनीतिकानां घृष्टेभ्यः कुट्टितेभ्यो मार्गेभ्यः पृथगवर्तिषत । न पत्रप्रैषालयाः, न चिकित्सालयाः, न धूम्रशकटीविरामस्थानानि न च यातायातसौविध्याय व्यवस्थिताः पन्थानः । प्रार्थनया द्रवीभूतस्तथा वास्तविकं ज्ञातुं समुत्सुकः श्रीजवाहरलालो भीषणे ग्रीष्मे शिरस्यार्द्रं प्रोञ्छनवस्त्रं निधायावधस्य ग्रामेषु पदयात्रयैव गतः । श्रीमतां मोतीलालमहोदयानां विदेशेषु शिक्षितं तरुणं पुत्रमा-

त्मनां मध्ये सम्प्राप्तं दृष्ट्वा कृषकाः पुलकिताः कृतज्ञाश्चाभूवन् ।

श्रीजवाहरेण तैः सह भोजनं कृतम्, मृन्निर्मितेषूटजेषु तेषां दुरवस्थायाः शासनस्य दुर्नीतिस्तदीयानां दैन्यस्य चालोकनाद् हृदये महती वेदना समुदभूत् । कृषकाणां प्रेम्णा कार्तज्ञ्येन चात्मनः संशयं विच्छिद्य स स्वकीयान् विचारान् भाषणेन प्राचीकटत् । ग्रामेषु विहितमिदं साहसिकं कार्यं श्रुत्वा तदीयाः पितरस्तं प्राशंसन् स्वयञ्चान्वभवन् यत् —

कृषका एवास्माकमन्नदातारः । यदि नाम ते सुखिनो न भवेयुस्तदा प्राप्यमाणेऽन्नेऽन्यस्मिंश्च भरण-पोषणात्मके साधने सौख्यं कुतो लभ्येत ? अस्माकं देशे कृष्युद्योगयोः सम्पन्नताया अभावो नास्ति किञ्च जलसाधनैः सुसम्पन्नत्वेऽपि कृषका धनिकानाम् ऋणभारेण भुग्ना वैदेशिकानां दुर्नीत्या पीडिताः सन्ति । तस्मादेव ते स्वयमुत्थातुं स्वोन्नतिं कर्तुं च सर्वथाऽक्षमा एव विद्यन्ते । अत एव —

यावन्नः परतन्त्रतावरणजाद् दुष्पञ्जरात् सत्वरं,
मुक्तिः स्यान्नहि तावदत्र कृषका अन्ये च सामाजिकाः ।
सम्प्राप्यापि सुसाधनानि नियतिं प्रस्तानि पीडान्विता,
ग्रामीणाः स्वविचार-चार-रहिताः किञ्चिन्न कर्त्तुं क्षमाः ॥१३॥

किञ्च विलोक्यात्म-देशस्य दैन्यं च दास्यं,
बुभुक्षामवस्थाञ्च नग्नां जनानाम् ।
मनः कस्य दूयेत नो, मातरं कः,
सुतो द्रष्टुमीष्टेऽथवा शोकमग्नाम् ? ॥१४॥

निदानं दास्यमेवास्य तन्निरस्तुं प्रयस्यताम् ।
क्रियेत यावती शंसा, साऽल्पैवात्र भविष्यति ॥१५॥ इति ॥

☐

[४]

मेधा-कला

साहजिक-शिक्षायाः शुभारम्भः

मे॒धाम्मे॒ व्वरु॑णो ददातु मे॒धाम॒ग्निः प्र॒जाप॑तिः ।
मे॒धामिन्द्र॑श्च व्वा॒यु॑श्च मे॒धान्धा॒ता द॑दातु मे॒ स्वाहा॑ ॥

—यजु० ३२।१५

प्रकृतिः परिवेशजा स्थितिः, शिशु-शिक्षार्थमुभे सुसाधने।
स्वयमेव पुरस्कृते क्षितौ, ददतः शिक्षणमुत्तमं मुदा ॥१॥

प्रकृति-जनन्या भवने सकला अपि व्यवसाया आनन्दमया वर्तन्ते । प्राकृतिक्यां शालायां प्राप्यमाणं दुःखमपि वस्तुतोऽनुभवैः परिपूरितं भवति तत एव तदप्यानन्दरूपमेव जायते तेनैव च यौवने यानि वस्तूनि त्रासप्रदानि वैरस्योत्पादकानि किं वा भयावहानि प्रतीयन्ते तदपेक्षया तानि बालकेभ्यो विशिष्यानन्दोत्साहदायकानि सम्पद्यन्ते। एवमेव परिवेशस्यापि ज्ञानोपलब्धौ महान् दायोऽस्ति। यत्र गृहे पारिवारिकाः सर्वेऽपि ज्ञानसम्पन्नाः स्युः, ज्ञानप्राप्तये संलग्नमानसाः श्रमशीलाः स्वच्छाचाराः सद्व्यवहाराः परिजना भवेयुस्तत्र ज्ञानं स्वयमेव मस्तिष्के प्रवेष्टुं चेष्टते। यत्र च दैन्यं दारिद्रयं पीडा तर्जनानि भर्त्सनानि च नरीनृत्यन्ति तत्राज्ञानाद् ऋते को वस्तुमीहेत ? इत्थं स्पष्टमेव प्रकृतिः परिवेशश्च शिक्षागुरू स्तः । किञ्च —

क्रीडा ज्ञानं च नैव क्वचिदपि भजतः साधु पार्थक्यभावं,
क्रीडातो ज्ञानलाभः क्वचन च भवति ज्ञानतः क्रीडनं वै।
भाषैवैकाऽत्र विघ्नं जनयति यदि सा नो भवेत् तर्हि बाला,
निर्विघ्नं सर्वबोधं नियति-वितरितं प्राप्तुमीशा भवेयुः ॥२॥

बाल्ये यावज्ज्ञानमपेक्षितं भवति नतमां तावता न्यूनं क्रीडनमपेक्षितं मन्यते। अन्योन्याश्रयवती ज्ञान-क्रीडने बालकेभ्यः सुतरां सापेक्षे विद्येते। ये नामेमे द्वे अपि पृथक् पृथङ् मन्यन्ते न तत्रौचित्यं प्रतिभाति। भाषा ज्ञानप्राप्तौ विघ्नरूपतां बिभर्ति बालाश्च भाषां न विदन्ति तस्मादेव ते प्रकृति-परिवेशाभ्यां निःसङ्कोचं ज्ञानमर्जयितुं क्षमा भवन्ति।

प्रियदर्शिनीन्दिराऽपि प्रकृति-परिवेशाभ्यां ज्ञानमर्जयितुं प्रारभत। एकत आनन्द-भवनस्य समक्षं सङ्गमाय विकलतामनुभवन्तो गङ्गायमुनयोर्वीचिनिचयास्तयोस्तटयुगलं सेवमानास्तरुराजयो जलकेलिरिवाचरन्त्यो नौकाः फल-

पुष्प-पत्र-मण्डिता गृहारामा ऋतवः सूर्याचन्द्रमसोर्गतागते सन्ध्ययोः सुषमाश्च बालाया इन्दिराया मनसि किमपि चित्रं विचित्रमङ्कनं विदधानास्तदीयमौत्सुक्यं जिज्ञासां वर्धयन्ति स्म । अन्यतश्च तत्रैव जन्मनः प्रभृति विराजमाना वैभवविलासाः सुखसौविध्यसंसक्ताः सम्भारा महिलानां पुरुषाणां व्यवहारा आत्मनीनानां स्नेह-प्रवृत्तयश्च तदीयं हृदयमानन्देनोल्लासयन्ति स्म । तस्याः क्रीडनाय देश-विदेशेभ्य आनीतानि क्रीडनकानि पुत्तलिका अवर्तन्तः । धारणाय बहुविधानामभिनव-वाससां नासीन्नैयून्यम् । तत्सर्वं तस्या मनोरञ्जनाय ज्ञानप्रदानाय चालमभूत् । तया विधीयमानाः खेलाः, पितामह-पितामही-जननी जनक-जनकस्वसृ-प्रभृतिभिस्तत्प्रश्नानामुत्तररूपेण बोधितानि वचांसि च तदीयज्ञानोपबृंहणाय सहयोगीन्यजायन्त । अत एव प्रियदर्शिन्या बाललीलैव वस्तुतस्तदानीमुत्कृष्टजीवन-नैसर्गिक-पोषण-पूर्ण-शिक्षणानामाधारभुवः संस्थापने दृढीकरणे च साधीयस्यभवत् । अस्तीदं सत्यमपि —

उत्कृष्टं जीवनं च प्रकृति-विरचितं पोषणं शिक्षणं वै,
पूर्णं बाला लभन्ते सुसरलविधिना बाललीलाभ्य एव ।
अभ्यासानां क्रमस्याप्यथ नहि भवति क्लिष्टता तत्र, तस्मात्,
सर्वेऽप्यायान्ति मौनं क्षितितलविषयाः शिक्षणे निर्विरोधम् ॥३॥

अयं प्राथामिक-ज्ञानस्य प्रथमसोपानारोहणमङ्गलारम्भो गुरूणां मौनाख्यानरूप एवासीत् शिष्या च प्रियदर्शिनी छिन्नसंशया सती प्रयोगपक्षेण तज्ज्ञानं द्रढयितुं विह्वलेवावर्तिष्ट । आनन्दभवनस्य राजनीतिकं वातावरणं प्रत्यहं सम्पद्यमानानां स्वयंसेवकानां कार्यकर्तॄणां क्रियाश्चलसमारोहास्तथा विरोधसभानां विवरणाकर्णनानि यथाज्ञानमिन्दिराया मनस्यसामान्यानपूर्वान् विचारानुत्पादयन्ति स्म । परिवारे सर्वथैकाकिन्या बालिकायाः कारणात् सा स्वीयाभिः पुत्तलिकाभिः सह राजनीतिकानि क्रीडनानि क्रीडति स्म । काष्ठमञ्चके सा कदाचिद् बहुवर्णानि कदाचिच्च निराडम्बराणि वस्त्राणि धारयित्वा पुत्तलिकानामेकां पङ्क्तिं यष्टिका-गुटिकास्त्रयष्टीश्च धृतवतां पुत्तलकानां पङ्क्तेः पुरतोऽस्थापयत् । कृषकवेषधारिणीनां पुत्तलिकानां हस्तेषु कर्गदस्य पताका अभवन् नेत्रीत्वं विभावयन्तीन्दिरा च तेषामग्रे भाषणमकार्षीत्— 'स्वीयान् पितॄन् पितामहान् श्रीगान्धिमहात्मनश्चैवमेव भाषणं ददानान् साऽवलोकयति स्म । सत्याग्रहिणः सा कथयति स्म "अग्रे वर्धध्वम्, काङ्ग्रेसस्य ध्वज उन्नतस्तिष्ठेत्, ब्रिटिशशासकस्य सैनिकेभ्यो मनागपि न बिभ्यत ।" आनन्दभवनस्योन्नतैर्गवाक्षैरवलोकितानां काङ्ग्रेसध्वजधारितानां श्वेतखद्दराम्बरधराणां स्वयंसेवकानां चलसमारोहादीनामेव स प्रभाव आसीत् ।

पितामही स्वरूपरानी-इन्दिरायामतितरामस्निह्यत । श्रीजवाहरो बहुधा

तां निवारयति स्म यदियल्लालनमनुरञ्जनञ्च नोचितमस्ति; परं सा श्रुतमश्रुतमेवाकरोत्। इन्दिरा पितामहीं '**डोलअम्मा**'—पदेन सम्बोधयति स्म तस्य च कारणमासीन् मिष्टान्नस्थापनस्य जालिकावती काष्ठमञ्जूषिका, या हि 'डोल' इति कथ्यते तस्यां स्थापितस्य मिष्टान्नस्योपलब्धिं कामयमानेन्दिरा तथैव सम्बोधयति स्म।

असहयोगान्दोलनस्योत्साहो यथायथाऽवर्धत तथैवाधिकारिवर्गः कुण्ठितोऽजायत। नेहरूपरिवार इदमान्दोलनं धार्मिक-प्रेरणास्पदं मत्वा श्रीमतीस्वरूपरानी वधूः श्रीमती कमला तदीयाः सुताश्चातीव प्रेरिताः सत्यः शाकाहारिण्यः सञ्जाताः। स्वयं श्रीमोतीलालमहाशया अपि मद्यपानमत्यजन्, गीतापाठमकुर्वन्, स्वयं श्रीजवाहरलालेनापि स्वीये जीवनपरिचये स्वीकृतं यत् 'सन् १९२१ ई० वत्सरे धार्मिक-विचाराणामियन्नैकट्यं स लब्धवान् यावद् हि बाल्यदारभ्य तदवधि पूर्वं कदाऽपि नाभवत्।

तस्या नवीनस्थितेः परिणतिः १० मई १९२१ ई० दिनेऽवालोक्यत यदा श्रीमोतीलालस्य ज्येष्ठायाः 'स्वरूपा' (सरूपा)याः परिणयो 'राजकोट'स्थैर्विधिशास्त्रनिष्णातैस्तथा संस्कृतभाषाविद्भिः 'श्रीरणजीतपण्डितैः' सह सम्पन्नः। उभाभ्यां परिवाराभ्यामतिरिक्तं विवाहोत्सवे श्रीगान्धिनः सपत्नीकास्तथान्ये बहवः काङ्ग्रेसनेतारः सदस्याश्च समवेताः। नववध्वा 'श्रीमतीकस्तूरबागान्धि'—कर्तितसूक्ष्मसूत्रनिर्मिता खादीशाटिका धृताऽऽसीत्। परिवर्तितायां स्थितौ यावान् व्ययः सम्भव आसीत्, श्रीमोतीलालनेहरूभिरुन्मुक्तेन हृदयेन विहितः। तदानीमप्यारक्षिणो बहिः साशङ्काः सावधानाः स्थिता अवर्तन्त। तद्दिनमान्दोलनस्य वर्षदिनमभूदतस्ते हिंसाया आशङ्कया भीता अभवन्, परं सा कल्पना कल्पनैवाविद्यत। विवाहोत्तरं स्वरूपायाः श्वसुरालये नवीनमभिधानं 'विजयलक्ष्मी'रिति प्रतिष्ठापितं सा चाग्रे 'विजयलक्ष्मी-पण्डित' इत्याख्यया प्रसिद्धिमगमत्।

सुविचार-परम्परैव तं, मनुजं प्रोन्नमयत्यलं भुवि।
य इह स्वकृतौ दृढात्मना, परिणम्याचरति स्वयं तथा ॥४॥

आनन्दभवने राजनीतिकं वातावरणमाबालवृद्धं तन्मयं विदधाति स्म। महात्मश्रीगान्धिनां विचारधारा प्रत्यङ्गं प्रविश्य प्रस्फुरन्तीव प्रसरति स्म। बाल्ये वयसि वर्तमानाऽपि प्रियदर्शिनी विचारैस्तारुण्यमञ्चन्तीव प्रत्यभात्। एकदा सा स्वकीयान् पारिवारिकान् सर्वानपि सदस्यान् बहुमूल्यवन्ति वस्त्राणि सञ्चिन्वानानवलोक्य विस्मयं प्राप्नोत्। तस्या मनसि कौतूहलमजागरीद् यदिमे किमिदमाचरन्तीति ? तस्याः पितामहा एव तदीयाः सहयोगिन आसन्, तस्याः

सर्वेषामपि प्रश्नानां ते समाधानानि विदधति स्म, अतः सा मन्दं मन्दं तन्निकटं सम्प्राप्य पृष्टवती ! किमिदं भवति पितामहाः ? किं करिष्यन्ति सर्वाणि वस्त्राण्यत्रैकीकृत्य ? मृदुभिर्वचनैर्बोधयन्तस्तेऽकथयन्—"अद्य प्रभृत्यस्माभिः स्वदेशिवस्तूनां व्यवहारस्य व्रतमङ्गीकृतमस्ति। इतः परं किमपि वैदेश्यं वस्तु नैव प्रयोक्ष्यामः। एतानि वस्त्राणि ज्वालयिष्याम" इति। इन्दिराऽपि सत्वरमन्तर्गृहं प्रविश्य मञ्जूषातः स्वीयानि विदेशनिर्मितानि कञ्चुकादीन्यानीय तस्मिन् सञ्चये प्राक्षिपत्। महतोत्साहेन ज्वालितायां विदेशिवस्त्रहोलिकायां साऽपि स्वीयानि कमनीयानि वस्त्राण्यज्वालयत्। स्वाधीनताया समुन्नतध्येयं प्रति तदीये बालहृदयेऽपि तादृशा भावा व्यराजन्।

अन्तर्बाह्यविकारदूषितहृदो भावान् समूलं तिरः-
कर्तुं फाल्गुनमासपूर्तिदिवसे होला यथा ज्वाल्यते।
तद्वत् सर्वविदेशिशासनविधेः पूर्णान् बहिष्कारजान्,
भावाञ्ज्वालयितुं विदेशिवसनान्यारात् समज्वालयन्॥५॥

इन्दिरायाः स्वीयं दैनन्दिनं जीवनं स्वाधीनता-सङ्ग्रामादविच्छिन्नरूपेण संयुज्य सुदृढं भवति स्म। एकदा तस्या मातुः काऽपि सम्बन्धिनी पेरिसतस्तस्या उपहर्तुं विदेशिवस्त्रनिर्मितमतिरमणीयं कञ्चुकमानीतवती, माता श्रीमती कमला स्थितिं परिचाय्य तां न्यषेधीत् परं सा नामन्यत। तदा स्वयमिन्दिराऽऽहूता साऽपि तस्या आग्रहमनङ्गीकृत्य स्वीयां स्वदेशिवस्तुव्यवहारप्रतिज्ञां व्याहरत्। तदुत्तरेण खिन्ना सा वृद्धा सोपालम्भमिन्दिरां विदेशनिर्मितानां पुत्तलिकानामुपयोगमाक्षिप्तवती। इन्दिरा तेनाक्षेपेण खिन्ना सती गतायां तस्यां किमपि मनसि विनिश्चित्य सहसा प्रकोष्ठं प्रविष्टा। सर्वाणि वैदेशिकानि क्रीडनकानि सङ्गृह्य प्रकोष्ठस्योर्ध्वभागे गता दीपशलाकया च वह्निमुत्पाद्य रुदती तानि तस्मै समार्पयत्। तेष्वतिस्नेहवशात् तान्यविस्मरन्ती सा ज्वराक्रान्ताऽप्यभूत् परं धैर्येण साहसेन च स्वीयासु भावनासु विजयं प्राप्नोदेव।

हस्तैः सूत्रितानि वयितानि च स्थूल-खादी-वासांसि धारयन्तः सर्वेऽपि परिवारसदस्या अतीव संयमवन्त आडम्बरहीनाश्च नवीनायां जीवन-पद्धतौ विश्वसन्तो देशसेवासु तत्परा अभूवन्।

६ दिसम्बर १९२१ तमेशवीयदिने तृतीये प्रहरे यदाऽखिलभारतीय-काङ्ग्रेससमितेः कार्यालयसचिव आनन्दभवने पं० मोतीलालमहोदयान् कतिपयानि पत्राणि दर्शयति स्म तदैव कस्यचनारक्षिण आगमनस्य सूचना कर्मचारिणा दत्ता। आरक्षी प्रविश्यौपचारिकतानन्तरमानन्दभवनस्यावेक्षणादेशमदर्शयत्।

तैरनुमतिः प्रदत्ता किञ्चेदमपि विनोदपूर्वकं संसूचितं यत् पूर्णस्य भवनस्य सूक्ष्मावेक्षणे मासषट्कं व्यत्येष्यतीति। आदेशपत्रं पुनर्वाचयित्वा च तैः पृष्टं—'किं शासनमपराधविधानसंशोधनाधिनियमस्य सप्तदशखण्डस्य द्वितीयस्या धाराया अन्तर्गतमभियोगं प्रवर्तयितुमभिलषति ? सततं तेनोत्तरितं, आम् श्रीमन् ! मत्सविधे निग्रहणादेशोऽपि विद्यते । श्रीपण्डिताः प्रसन्ना अभूवन्, तेऽकथयन्—धन्योस्मि, अहं तदर्थं सज्जोऽस्मि। सहैव तेनारक्ष्यधिकारिणा श्रीजवाहरलालस्य निग्रहणादेशायापि कथितम्।

पिता च पुत्रश्चोभावेवातिप्रसन्नतया मित्रैः शंस्यमानौ मृत्तैल्लयानमध्यारुहताम् । श्रीमोतीलालाः स्वदेशवासिनां नाम्ना विदाय-सन्देशमलेखयन्—'भवतां पर्याप्तं सेवाया अनन्तरं, ममेदं सौभाग्यमस्ति यदद्याहं स्वमातृभूमेः सेवायै, स्वस्यैकमात्र-पुत्रेण सह, कारायां गच्छामि ।' तस्मिन्नवसरे केनापि संवाददात्रा श्रीमती स्वरूपरानी पृष्टा, तदा तयोक्तम्—"मम हृदये वियोगस्य कष्टं मनागपि नास्तीति तु कथयितुं न पारयामि, परमहम् 'इमं गौरवपूर्णमुनुभवं कुर्वत्यतिप्रसीदामि यन् मम प्रियाः स्वामिनस्तथकैलः पुत्रोऽद्य करायां व्रजतः। 'एकलः पुत्र'इति कथयन्त्यास्तस्या हृदयमापूरितं किन्तु कथञ्चिदात्मानमवरुध्याग्रेऽवदत्—'श्रीगान्धिमहात्मभिर्मह्यमेकवारं कथितमासीद् यत् संसारेऽन्येषामप्येकलाः पुत्रा भवन्ती'ति।

आरक्षिणां यानं यथैव गृहादग्रे वर्धितं तथैव वयोवृद्धाया दुर्बलायाः श्रीमती-स्वरूपरानी-महाभागाया नयनाभ्यामश्रूणि प्रावहन् । तासां द्वाविंशतिवर्षीयया वध्वा श्रीमत्या कमलयाऽतिप्रयस्यात्मा धारितः । विगतस्यैकवर्षस्यान्तराले ताभ्यामतीव किमपि द्रष्टव्यं सोढव्यञ्चाभूत्, सकलं जीवनमेव परिवर्तितमासीत् तथाऽद्य को वेत्ति स्म स्वस्व-पत्युः कियते कालाय वियोगः सहनीय आसीत् । आशङ्का एकाकिता व्याकुलता एव तदानीं शिष्टे जीवने तयोः साहचर्यायोपस्थिता अवर्तन्त।

यस्मिन् भारत-भूतले युग-युगात् स्वातन्त्र्यमासीच्चिरं,
सर्वेऽप्यात्मनियन्त्रिताः समवसन्नारङ्कराजं जनाः।
तेऽत्रानार्य-विदेशिशासनवशाद् दास्यं गता यद् बलात्,
तस्मै चित्र-विचित्र-निर्मितिकृते कालाय किं ब्रूमहे ?॥६॥

अग्रिमें ७ दिसम्बर १ २१ ई० दिने करायां स्थापित एकस्मिन् न्यायालय-प्रकोष्ठे श्रीमोतीलालमहोदयानामधिकरणमारब्धम् । श्रीमोतीलालाः काङ्ग्रेसस्य स्वयं सेवकाः सन्तीति साधयितुं नासीत् कस्यापि प्रमाणस्यावश्यकता यतस्तेषाम् 'इण्डिपैण्डेण्ट'-नाम्नि वृत्तपत्रे सूच्यां सर्वोपरि तेषामभिधानं मुद्रितमभूदेव, तथापि

नाटकीयपद्धत्या कश्चन साक्ष्युपस्थापितः स च निरक्षरोऽपि हस्ताक्षराणि प्रामाणयत्। आत्मनः पक्ष-संरक्षणाय श्रीमोतीलालाः प्रार्थिता अपि न्यषेधयन्। तेभ्यो मासषट्कस्य कारावासस्तथा पञ्चशतमुद्राणामार्थिको दण्डोऽश्राव्यत। श्रीजवाहरलालोऽप्येतावतैव दण्डेन सम्बोधितः। तदीयोऽपराधस्तु कर्मावरोधकानां वैदेश्यवस्तुबहिष्काराणां प्रचारपत्राणां वितरणमासीत्। एतत् सकलमपि वृत्तजातं चतुर्वर्षीया बालिका प्रियदर्शिनीन्दिरा स्वेषां पूज्यपितामहानामङ्के स्थिताऽद्राक्षीत्। ततः परावृत्य तया पुत्तलिकानां समवाय एकीकृतः, भाषणं च दत्तं, सर्वाश्च क्रीडाभावेन कारायां प्रवेशिताः। आर्थिकदण्डस्य च राशेर्दानं निषेधितवतोः पितृ-पुत्रयोर्द्रव्याप्तये स्थानीया आरक्षिण आनन्दभवनं गत्वा विनिमये वस्तूनि गृहीतुमचेष्टन्त। तदैव परमेण क्रोधेन पूर्णा बालिकेन्दिरा तानरौत्सीत्। क्रोधाच्चरणं पातयन्ती साऽवोचत्—"यूयमेतानि वस्तूनि नेतुं न प्रभवथ। इमान्यस्माकं विद्यन्ते।" मुष्टिकां बद्ध्वा साऽऽरक्ष्यधिकारिणं प्रहर्तुमप्याक्राम्यत्। अतिकाठिन्येन सा पितामह्यादिभिर्वारिता ततः पराकृत्य च शान्ति प्रापिता। अयमासीदिन्दिरायाः प्रथमो दीक्षासंस्कारोऽन्यायानां प्रतीकारस्य सात्त्विक-तेजिस्वितायाश्च।

इन्दिराया जीवननिर्मितौ बाल्ये सर्वाधिकः प्रभावस्तस्याः पितामहस्यावर्तिष्ट। कतिपय-वर्षाणामनन्तरं तान् प्रति स्नेहं सम्मानञ्च व्यञ्जयन्त्या तयोक्तमासीत्—

"पितामहानां शक्तिसम्पन्नत्वेन मदीयौ तेष्वतीव श्रद्धा तथा स्नेहश्चाभवताम्। यतो हि जीवनं प्रत्युल्लासस्तेषु प्रस्फुटन्नवर्तत। तदनुरूपमेवाग्रे मम पितृपादेष्वपि तद्विकसितम्। किन्तु सर्वतोऽधिकमहं स्वपितामहानां महत्त्वेन प्रभाविताऽभवम्, मम तात्पर्यं तेषां शारीरिकस्थित्या नैव, अपि तु तेषां महत्तया वर्तते। त इयन्तो विशाला आसन्, यत् समग्रं विश्वं तेषां भुजयोराबद्धमिवाभूत्। तेषां हासस्य प्रकारोऽपि मह्यमत्यरोचत।" इति।

पितामहानां पितॄणाञ्च कारावासानन्तरमानन्दभवने वातावरणं शून्यतामिश्रं शान्तमभूत्। अतः सर्वेऽपि बालिकामिन्दिरां नीत्वाऽहमदाबादनगरे श्रीगान्धिनां साबरमतीतटे स्थापितमाश्रमं गताः। काङ्ग्रेसस्य वार्षिकमधिवेशनं तत्रैवासीत्। श्रीगान्धिनो वाञ्छन्ति स्म यत्तस्मिन् तेऽपि सम्मिलिताः भवेयुस्तैः सहैव तिष्ठेयुरिति। आश्रमस्य जीवनं कठोरं संयमपूर्णञ्चाभवत्। लवणविहीनं निराडम्बरं भोजनं, स्वस्य वस्त्राणामावासस्य स्वयमेव मार्जनं, भूतले शयनं प्रातश्चतुर्वादने निद्रात्यागात्परं साबरमत्यास्तटे प्रार्थनायामुपस्थितिरित्यादि सर्वं प्रारम्भे कठिनं प्रत्यभासत परमन्ते कियत्कालानन्तरं सर्वेषामभ्यासः शनैः शनैरजायत। तत्रत्ये तपस्यामये जीवने संयमस्य यः पाठस्तैः शिक्षितः सोऽग्रे सत्या-

ग्रहदिवसेषु सर्वथोपयोगी समपद्यत । इन्दिरायै समग्रमिदमद्भुतमिव प्रतीतम् । साऽतितरां स्वीयेनोत्साहेन प्रसन्नेन चेतसा भागं गृह्णाति स्म । श्रीगान्धिनो बालकानत्यधिकं स्निह्यन्ति स्म तस्मात् साऽपि शीघ्रमेव तेषां सांनिध्यं प्राप्यामोदत। श्रीगान्धिनां सांनिध्यसौभाग्यमिदमिन्दिरा स्वजीवनस्य षष्ठे वत्सर एव प्राप्नोत् ।

सौभाग्याद् भवति जनिः कुले पवित्रे,
लभ्येते इह पितरौ च पुण्यभाजौ ।
आदर्शा अथ परिवारजा भवन्ति,
सन्मार्गं तदनु दिशन्ति दिव्यदेहाः ॥७॥

साबरमत्याश्रमात् प्रत्यागतो नेहरूपरिवार आनन्दभवनं शून्यशून्यममन्यत । श्रीमोतीलालनेहरूणां श्रीजवाहरलालस्य चानुपस्थितौ परिवारस्य सर्वा महिला राजनीतिकेष्वान्दोलनेषु सक्रिया अभूवन्—ताः काङ्ग्रेसस्य सभासु चलसमारोहेषु च सममिलन् । श्रीमती कमला कृष्णा च स्वदेशिवस्त्रनिर्मितं कञ्चुकं पादयामं शिरसि गान्धिटोपिकां च धारयितुं प्रवृत्ते । इन्दिराऽपि तादृशान्येव वासांसि धारयितुमनुरुणद्धि स्म, यतो हि साऽऽत्मानं काङ्ग्रेसस्य स्वयं-सेविकामेव मनुते स्म । एवं तु सा गृह एव पितामह्या मातृश्वसुश्च निकट एव तिष्ठति स्म किन्तु राजनीतिकोश्चर्चाः श्रुत्वा तस्या मनसि धारणेयं दृढतां श्रिता यद् 'भारतीयजनतायाः स्वाधीनतायै कार्यकरणं तस्या अपि कर्तव्य'मस्तीति ।

यदि नाम निगद्येत चेदिन्दिरया सर्वसाधारणं बालकानामिव बाल्यकालस्य परिज्ञानं प्राप्तमेव नैव । तस्याः क्रीडासहचारिणो बालका अपि नासन्, यद्यपि केचन तस्याः सम्बन्धिनां शिशब आसन् किन्तु परिजनानां राजनीतिककार्याणां कारणात् ते सम्बन्धिनो बिभ्यन्ति स्म तथा स्वीयान् बालकान् दूर एव रक्षन्ति स्म ।

□ शालेयशिक्षा-ग्रहण-प्रवृत्तयः

मातुः पितुः स्वात्मजनेभ्य आद्यां, शिक्षां लभन्ते गृह एव बालाः ।
शालेय-शिक्षास्तदनु प्रकाममावश्यिका एव भवन्ति तेभ्यः ॥८॥

शिक्षां गेहाद् गृहीत्वा विदधति च निजं प्राकृतं ज्ञानमादौ,
तस्यैवाग्रे विकासं क्रम-नियमयुतं कुर्वते स्वेष्टपूर्तौ ।
भिन्ना भिन्ना ददन्ते विविध-विषयकं ज्ञानमध्यापका ये,
शालासु स्पष्टतायै प्रभवति भुवि तद् बालकानां हिताय ॥९॥

इन्दिरा वपुषाऽतीवकृशा क्षीणा चासीत् । तस्याः स्वास्थ्याय श्रीजवाहरलालमहाभागो नितरां चिन्तितोऽभूत् । नेहरूद्वयं लखनऊस्थे जनपद-कारागारे

स्थापितमवर्तत। तत एव १९१२ ई० वत्सरे पुत्र्यै प्रियदर्शिन्यै लिखितेषु पत्रेषु श्रीजवाहरलालस्य गहनं प्रेम, उत्कटा दिदृक्षा च व्यराजताम्। यथा—'श्वस्तस्या अवलोकनोत्तरं त्रयो मासाः पूर्णा भविष्यन्ति। साऽतीव दुर्बला कृशशरीरा चावर्तत। अहमभिलषामि यत् तस्या अध्ययनस्य काऽपि व्यवस्था भवेत्। अहं विश्वसिमि यत् कार्यमिदमवश्यमेवाहमकार्षं—परमधुना त्वहं बन्दीगृहस्य चतुर्थे प्रकोष्ठेऽस्मि।' स महाशयोऽलेखीत्—

'पितुः स्नेहाशिषः। शीघ्रं स्वस्था भव, पत्रलेखनं शिक्षस्व तथा कारायां मां मिलितुमागच्छ। अहं त्वां द्रष्टुं विकलोऽस्मि। पितामहास्त्वदर्थे यत् तर्क-यन्त्रमानयँस्तत् त्वं चालयसि किम्? स्वकर्तितं सूत्रं मह्यं प्रेषय। मात्रा सह नित्यं प्रार्थनां करोषि न?'

एकस्मिन्नपरे पत्रे—

"प्रियायै पुत्र्या इन्दिरायै पितुः स्नेहाशिषः। किं कलिकाता तुभ्यमरोचत? किं मोहमय्याः सुन्दरं विद्यते? अपि कलकत्तास्थितः पशु-पक्षि-सङ्ग्रहालयोऽवलोकितः? तत्र त्वयैको विशालः पादपोऽपि दृष्टो भवेत्! इलाहाबादं प्रत्यावर्तनात पूर्वं त्वया पर्याप्तं स्थूलया शक्तिसम्पन्नया च भाव्यम्।" इति।

एकाऽन्यापि चिन्ता श्रीजवाहरलालमहोदयं व्याकुलयति स्म, सा चावर्तत 'इन्दिराया नियमितशिक्षायाः'। पितामहा अपि चिन्तयाऽनया विमुक्ता नावर्तन्त। परमिन्दिरायाः शिक्षाक्रमस्य नैरन्तर्यं व्यवस्थापयितुं किमपि तावन्निश्चितं नाभवत्। यदा सा षष्ठे वर्षे प्रविष्टा तदा तस्या अध्ययनाय श्रीमोतीलालनेहरू-भिस्तथा श्रीमत्या कमलया विचार-विमर्शं विधायेलाहाबादस्य **'सेसीलियोच्च-माध्यमिक-विद्यालये'** सा प्रवेशिता। कुमारी कृष्णाऽपि स्वस्याः संरक्षणसेविकायाः परिणयानन्तरं तस्मिन्नेव विद्यालये प्रविष्टाऽभूत्। **'केमरोन'**-नाम्न्यस्तिस्रः कुमार्यो भगिन्यस्तं विद्यालयं चालयन्ति स्म। तत्र बालका बालिकाश्च सहैवा-पठन्। विद्यालयस्याध्ययनस्तरेण श्रीजवाहरलालस्य मनसि तुष्टिर्नाभूत् तथाऽपी-न्दिरायाः पितामहाः 'समवयस्कानां बालानां तत्र साहचर्यं प्राप्स्यत' इति विचारेण तां प्रावेशयन्।

तस्मिन् विद्यालयेऽध्ययनेन सह जीवनस्य शिक्षाया अभाव एवासीत् किञ्चान्यदप्येकं काठिन्यं तत्रागतमासीत्—तेषु दिनेषु नेहरूपरिवारस्य सर्वेऽपि सदस्या हस्तनिर्मितानां खादी-वाससामेव धारणं कुर्वन्ति स्म। तान्यतीव स्थूलानि शणवस्त्र(टाट)-समानि भवन्ति स्म। अन्यतश्च विद्यालये बालकबालिकाः सुर-म्याणि चित्र-विचित्रवर्णमयानि विदेशनिर्मितान्याकर्षकाणि वस्त्राणि धृत्वाऽऽगच्छ-न्ति स्म। बालकानां मनस्सु स्वसहयोगिनां समानानि वस्त्राणि धारयितुं प्रवृत्तिर्भव-

त्येव । कोऽपि बालकः स्वसहपाठिभिर्विपरीतं वस्त्रधारणं नावाञ्छत् । कारणादस्मादिन्दिरा यदा कदा विद्यालयं गन्तुमपि निषेधति स्म । श्रीजवाहरलालमहाभागायापि स विद्यालयः शुद्धयूरोपीयपद्धत्याऽध्यापनस्य कारणादधिकं नारोचत । 'देशभक्तेः शिक्षां विना दीयमाना शिक्षा न भवति वास्तविकी शिक्षे'-त्यासीत् तस्यावश्यकं तत्त्वम् ।

इन्दिरा राजनीतिके वातावरणे पालनं पोषणं च सम्प्राप्नोति स्म । कारायां निवसन्तस्तदीयाः पितृपादास्तस्या एकाकिनीत्वस्य शिक्षाया नियमितताया अभावस्य तथा तत्स्वास्थ्यस्य विषये चिन्तिता आसन् । तस्मादेव ते नियमितरूपेणेन्दिरायै पत्राणि लिखन्ति स्म किञ्च तेषु देश-विदेशानां रोचमानानां घटनानां ज्ञान-विज्ञानवार्तानां च वर्णनानि विलिख्य तत्तद्विषयकज्ञानसम्पादनाय पुस्तकानां क्रयायाप्यादिशन्ति स्म । बाल-सुलभाः कथाः शेक्सपीयर-डिकेन्स-बर्नार्डशॉ-प्रणीतानां कृतीनां बालसंस्करणानि च पठितुं प्रैरयन् । अन्यसाहित्येन सह कलासम्बन्धि-साहित्यमप्यध्येतुं सा प्रावर्तयत् ।

आनन्द-भवनस्य सुसमृद्धे पुस्तकालये विद्यमानानि पुस्तकानि मासिक-साप्ताहिक-दैनिक-पत्र-पत्रिकाश्च पठन्त्यो भवनस्य बालिकाः स्वयमात्मनः श्रमेण शिक्षणे संलग्नाः सत्यः पुस्तकानुरागेणाभिभूता इव दृश्यन्ते स्म । मिथः पुस्तकानामुपहार-समर्पणस्य परम्परापि प्राचलत् । भ्रातृश्वसृभ्यां क्रीतानि साहित्यिकानि पुस्तकान्यपि सुबहून्यवर्तन्त । इत्थं प्रियदर्शिन्याः पुस्तकदर्शनानुरागः पठनानुरागश्च सन्ततं वर्धमानस्तस्या ज्ञान-भवनस्य भूमिकां द्रढयितुं मनोराज्ये सङ्कल्पान् सङ्कलयितुञ्च भूयांसं सहयोगं व्यदधात् ।[1]

पुस्तकानि पठन्त्याः कानिचित् पुस्तकानि तेषां पात्राणि काश्चन घटनाश्च प्रियदर्शिन्या मानसेऽतितरामन्वरज्यन्त । **'जॉन आफ आर्क'**स्य कथानिकाऽप्येतादृश्येका तस्याः प्रियासु कथानिकास्ववर्तत । एकदा तां पठन्ती सा तस्यामियती तल्लीनाऽभवद् यत् सा स्वयमेवात्मानं 'जौन आफ आर्क' इति बुध्द्वा प्राङ्गणस्य प्रावृतेर्निकटे स्वीयमेकं हस्तं दृढतया प्रस्तरभित्तावपरं हस्तं च मुष्टिबद्धमुन्नतं विधाय किमपि किमपि मन्दं मन्दमुच्चरन्ती श्रोतृगणं कस्मैचिन्महत उद्देश्याय प्रेरयन्तीवास्थात् । परिवारजनैस्तस्यामवस्थायां तां विलोक्य यदा सा पृष्टा 'किमिदं क्रियते प्रियदर्शिनि ?' तदा तयोत्तरितम्—"अहं जान आफ आर्क"—भवितुमभ्यस्यामि । अहमप्येकस्मिन् दिने तस्या इवैव स्वातन्त्र्याय योत्स्यामि स्वदेशञ्च स्वतन्त्रं करिष्यामीति ।"

---

१. इदं सकलं बाल-साहित्यं सम्प्रति दिल्ली-स्थिते **'त्रिमूर्तिभवन'**स्थे नेहरू-सङ्ग्रहालयस्य 'बाल-पुस्तकालये' संस्थापितं विद्यते ।

पठितायाः कथानिकाया अभिनयं कुर्वत्या तयाऽनुभूत यत् सा स्वदेशस्य स्वाधीनतासङ्ग्रामस्याह्वाने सम्मिलिताऽस्ति, तत एवाग्रेऽपि सा पूर्णया निष्ठया तस्मिन् सङ्घर्षे भागमगृह्णात् ।

यज्ज्ञानं प्रथमं शिशोः सुविमले स्वान्ते स्थितिं विन्दते,
तद् बीजायितमुर्वरां भुवमथासाद्याङ्कुरत्यञ्जसा ।
संस्कारैः क्षुपतामितं सुविहितैः संवर्धितं कर्मभिः,
काले सत्तरुवद् विराजति च तच्छाया-फलादिप्रदम् ॥१०॥

इन्दिरा 'जान आफ आर्क'तोऽत्यधिकं प्रभाविताऽऽसीत् । तस्य कारणमभूद् यत् 'फ्रान्सदेशस्य मुक्तये साऽऽङ्ग्लानां विरुद्धं सङ्घर्षमकार्षीत् । सैका कन्याऽभूदतोऽपि तां प्रत्यन्येषां स्वातन्त्र्यसङ्घर्षशालिनामपेक्षया विशिष्य नैकट्यं प्राप्नोत् ।' स्वसंस्कारानुरूपं स्वातन्त्र्येण सम्बद्धा प्रत्येकं वार्ता प्रियदर्शिन्यै पूर्णरूपेणानुरागभागवर्तत, भवेन्नाम सा पुनः कस्यापि देशस्य । 'श्रीजवाहरलालनेहरूभिरिटलीदेशस्य 'गैरीबल्डी'-विषयिणी, दक्षिणामेरिकाया'—'बोलीवार'-विषयिणी तथाऽन्येषां जनानां कथानिकाः श्राविता आसन्, तस्मादेवेन्दिरा स्वीयां जीवनदृष्टिं स्थिरयितुमचेष्टत । पुस्तकानामध्ययनेनापि सा बहूनां विचाराणां निर्धारणे क्षमाऽभूत् । तस्याः प्रिय उपन्यास आसीत्—'ला मिजरावेल्स' इति । तस्य प्रभावात् सा दैन्यं परिचेतुं समर्था सती तन्नैकट्यप्राप्तयेऽवसरमलभत ।

श्रीजवाहरलालस्य प्रथमा कारायात्रा १९२२ ई० वत्सरस्य मार्चमासे सूचितावधेः पूर्वमेव पूर्तिमिता । स पितुः सकाशात् सखेदं विदायमग्रहीत् । विमुच्य स श्रीगान्धिनां निकटेऽहमदाबादनगरमगमत् तत्र च महात्मगान्धिनामैतिहासिकमधिकरणं विलोकितम् । ततः परावृत्य भूयोऽपि तेनासहयोगान्दोलनं द्रढयितुं जनानामुद्बोधनकार्यं प्रारब्धम् । विदेशिवस्त्राणां विक्रयावरोधाय व्यापारिणः प्रबोधितास्तदाधारेणैवाभियोगपूर्वकं भूयोऽपि स एकविंशतिमासानां कारादण्डं प्राप्नोत् । लखनऊ-कारायां गत्वा तेन ज्ञातं यत् ततः स्वकीयाः पितरः पं० मोतीलालमहाभागाः परिवर्त्य नैनीतालकारायां स्थानान्तरिता विद्यन्ते । खिन्नेन मनसा स तत्र दिनान्यत्यवाहयत् । तदैव ३१ जनवरी १९२२ ई० दिने ततः स मध्येकालमेव कारातो मुक्तिमवाप्नोत् ।

श्रीजवाहरलालः सन् १९२३ ई० वर्षे देहल्यां सम्पन्ने काङ्ग्रेसस्य विशिष्टेऽधिवेशने समभिलत् ततश्च नाभां गन्तुमैच्छत् । तत्राकालिप्रदर्शनकारिणामारक्षिणां च मध्ये सङ्घर्षः प्रावर्तत । एकस्मै दिवसाय तत्र गन्तुमनाः स यदा स्वीयाभ्यां द्वाभ्यां काङ्ग्रेसमित्राभ्यां सह नाभाराज्यस्य सीम्नि स्थितं 'जैतो' नामकस्थानं प्राप्तस्तत्—समकालमेवैक आदेशोऽदायि यत्— 'सत्वरमेव राज्यस्य

सीमप्रदेशं परित्यज्य गच्छेयुः। उपेक्षया तैस्तद्विषये ध्यानं न दत्तं तत्कारणादेव ते निगृहीताः। विरोधाभावाच्च शृङ्खलया निगडय्यापणे भ्रान्त्वा रैलयानेन नाभाराज्यस्य राजधान्यां नीतास्तत्र चैकस्मिन् लघीयसि प्रकोष्ठे बन्दीकृताः। श्रीजवाहरलाल-गिडवानी-सन्तानम्-महाशयेभ्यः सार्धद्विवर्षाणां कारादण्ड उद्घोषितः। यद्यपि घटनयाऽनया चिन्तिताः श्रीमोतीलालमहाभागा महता प्रयासेन पुत्रं द्रष्टुं तत्र गताः परं नाभा-प्रशासकेन सद्य एव स्वयं तेषां कारादण्डो निरस्तः, किञ्च ते त्रयोऽपि नाभाराज्याद् बहिर्गन्तुमाज्ञप्ताः।

'इन्दिरा' राजनीतौ प्रविविक्षया श्रीमहात्मगान्धिनामसहयोगान्दोलनस्य प्रवृत्तिषु संसक्ता भवितुमारभत। सा मान्यान् महात्म-गान्धिनोऽपृच्छत्—'अह देशसेवायै किं करवाणि ?' तदा तैः सा चरखा-सङ्घाय किमपि कर्तुमादिष्टा। तदनुसारं तया सूत्रकर्तनमपि प्रारब्धम्। श्रीगान्धिनस्तस्या राजनीतिं प्रति वलनं विज्ञाय विस्मिता भवन्ति स्म, परं मनसि प्रसन्नाः सन्तः शुभाशिषोऽपि प्रयच्छन्ति स्म। नेहरूपरिवारस्यानुवंशिक्यां परम्परायां तृतीया वंशधराऽपि देशसेवार्थमुद्युक्ता विद्यत इति विलोक्य श्रीगान्धिनां हृदयमतीव प्रसन्नतामनुभवति स्म।

स्वदेशसेवाव्रतमादृतानां पितामहानाञ्च तथा पितॄणाम्।
राष्ट्रानुरक्तिः शुचिकमनिष्ठा, सुता-हृदब्जेऽप्यचिरं व्यराजत् ॥११॥

☐ विदेशयात्रा प्रथमा प्रशस्ता

श्रुतं श्रुतिभ्यामथ लोचनाभ्यां, दृष्टं सदा बोधयते शुभाय।
तत्रापि दृष्टस्य महन्महत्त्वाद् विदेशयात्रा प्रथमा प्रशस्ता ॥१२॥

जीवनस्य प्रवहन्तीनां धाराणां भाव-प्रवणा विचार-वीचयः सामयिकानां बौद्धिक-वाद-विवादानां शान्तये किमपि निर्णायकं तत्त्वं गवेषयितुं सन्नद्धा भवन्ति। चिरस्थायिनीनां समस्यानां समाधानानि प्राप्तुं सर्वथा प्रयतन्ते तथा सामाजिकदर्शनस्याध्यात्मिकेन ध्वनिनाऽऽत्मानं शान्तयितुं समुचितं क्षत्रमिच्छन्ति।

श्रीजवाहरलालनेहरूर्देशस्य प्रचलन्तीनां घटनानामाकलने चिन्तान्वित आसीत्। तस्य हृदये सङ्क्रमणकाले व्रजतो यूरोपस्य परिवर्तमाना मनोवृत्तयो विचार-प्रवाहा राष्ट्रभक्तिषु प्रवर्तिताः सङ्घर्षास्तथा राजनीतिक्यो नैतिकताः कथं किं स्वरूपं प्राप्ता इति विलोक्य तासां सन्तोषपूर्णमुत्तरमुपलब्धुं महत्युत्सुकता त विदेशेषु गत्वा स्वयं द्रष्टुमपि प्रेरयति स्म। तादृशः प्रसङ्गोऽपि नचिरादेवोपस्थितः कारणता च तदीयाया धर्मपत्न्या अस्वास्थ्येन प्राप्ता। सा चैवमभूत् —

इन्दिराया जन्मकालादेव तदीया जननी श्रीमती कमलानेहरूरस्वास्थ्यव-

शाद् दुर्बलाऽभूत्। शक्तिरपि क्षीणक्षीणा भवति स्म। १६२४ ई० वर्षे सा पुत्रमेकं प्रसूतवती, परं दौर्भाग्यात् स केवलं दिनत्रयमेवाजीवत्। ततः परमपि सा रोगाक्रान्ताऽजायत। दीर्घकालं यावच्चिकित्साया अनन्तरं स्वस्थतामगच्छत्। पं० मोतीलालमहोदयाः स्वस्कीय-पुत्राय यां स्वस्थां कन्यां निर्वाच्यानीतवन्तः सा हि निरन्तरं रुग्णाऽतिष्ठत्। अन्ते निदानं कारितं तदा ज्ञातं यत् सा क्षयरोगग्रस्ताऽवर्तत इति। कारणादस्माद् रोगस्योपचाराय चिकित्सकाः स्विट्जरलैण्डं गन्तुं सम्मतीः प्राचीकटन्।

१६२६ ई० वर्षस्य मार्चमासे श्रीमतीं कमलां स्विट्जरलैण्डस्य 'माण्टेन सेनेटोरियमा'ख्य आरोग्यधामनि चिकित्सार्थं नीत्वा श्रीजवाहरलालमहोदयाः स्वपुत्र्या प्रियदर्शिन्या सह यूरोपं प्रस्थिताः। तदानीमिन्दिरा पर्याप्तं प्रबुद्धाऽऽसीत्। तत एव तस्या अनुभवोपलब्धेः क्रमोऽपि प्रारब्धः। सलिल-प्रवहणेन गच्छन्ती सा पित्रोर्नैकटचस्य सुखमनुभवन्त्यपि मातू रुग्णतया खिन्नेवावर्तत। पितरः श्रीपण्डिताः स्वीयां तनूजां यत्ते जानन्ति स्म, बोधयितुं वाञ्छन्ति स्म। अत एव तेषां प्रयासो भवति स्म यदिन्दिरा यथासम्भवं तेषां समीप एव तिष्ठेत्। तस्यां यात्रायां स योग उपागतः। ते प्रियदर्शिन्यै महापुरुषाणां विषये रमणीयान् प्रसङ्गानश्रावयन्।

इन्दिरायाः मनोऽतितरां प्रासीदत्। साऽद्भुतानि शौर्यकार्याणि कुर्वतां देशसेवकानां सेविकानां चरित्राणि, विस्मयकारीणि विश्वप्रसिद्धानि स्थानानि प्रकृतेरनुरञ्जनपूर्णानि चित्र-विचित्राणि स्थलानि च श्रोतुं विलोकितुं चातीव समुत्सुकाऽवालोक्यत। जिनेवानगरस्य निकटवर्तिन्या **'मोनटाना'**-पर्वतिकायाः क्षयचिकित्सालये श्रीमत्याः कमलायाः समुचितामुपचारव्यवस्थां सम्पाद्य श्रीजवाहरलालमहोदयाः स्वपुत्रीमिन्दिरां जिनेवास्थिते **'ला इकोले इन्टरनेशनल'**-विद्यालये प्रावेशयन्। ततः परं च सा पार्वतिके परिसरे वेक्सरस्य **'ईकोल नूवेल'**-विद्यालयेऽध्येतुं प्रवेशिता। इन्दिराया यूरोपेणायं प्रथमः सम्पर्क आसीत्। सा फ्रेञ्चभाषाया एकमपि शब्दं न परिचिनोति स्म। आङ्लभाषाज्ञानमपि साधारणमेवाभवत्। माता रोगाक्रान्ता चिकित्सां लभते स्म। तस्यां स्थितौ सा स्वयं स्वबुद्धियोगेन फ्रेञ्चभाषाज्ञानं प्राप्तवती। आपणे वस्तूनां क्रयणावसरेऽन्येषु वैयक्तिकेषु व्यवहारेषु च प्रयुज्यमानान् शब्दान् श्रुत्वा साऽशिक्षत। एवं सति काठिन्येपि जीवनपद्धतेः प्रवर्तनं तथाविधायामवस्थायाञ्चागच्छता काठिन्येन सह सन्धिभावस्तथा स्वतन्त्ररूपेण गृहव्यवस्थादि-सम्पादनप्रक्रियायाः कौशलञ्च तयाऽधिगतम्। तस्मिन्नवसरे तदीया भ्रातृष्वसा 'कृष्णा'ऽपि तत्साहाय्यार्थं तत्रैवासीत् परमिन्दिरैव तत्र प्राधान्यमभजत्।

इन्दिरा बाल्यादेव प्रकृतिं स्निह्यति स्म, स स्नेह **'इन्टरनेशनल-विद्यालय**

प्रोत्साहनं प्राप्तः। तत्र सा दलानां लघुपत्रिकाणां, कीटानामन्येषां सामान्य-जन्तूनां तथा प्रत्येकं वस्तूनां गभीरमध्ययनं विहितवती। तस्य प्रभावस्तस्याः सकलेऽपि जीवने चिरमतिष्ठत्। सा परिश्रमेणाध्ययनं मातुः शुश्रूषां लौकिकं व्यवहारं तथाऽऽत्मोन्नतेः साधनेन सहैव कर्म प्रत्यनुरागं न व्यस्मरत्। यतस्तस्याः पितामहैरेकवारं सा बोधिताऽभूद्, यद् —

भवन्ति भूमौ द्विविधा मनुष्याः, केचित् प्रसक्ता अपरे ह्यसक्ताः।
कुर्वन्ति कार्यं प्रथमे परे तु, श्रेयो लभन्तेऽत्र विनैव कार्यम्॥१३॥
सुते ! भवेस्त्वं निजराष्ट्रसेवा-परायणा कर्मसु सुप्रसक्ता।
फलाभिलाषेण विनैव सर्वं, कर्म प्रकुर्याश्चिरमत्र जीव्याः॥१४॥

एतानि वचनानि शिरसा स्वीकुर्वती प्रियदर्शिनीन्दिरा विदेशेऽपि स्वदेशीयानामिवात्मसाद् विधाय सर्वैरात्मभावमसाधयत्। पादोनवर्षद्वयं यावत्तत्र विद्यालये तयाऽधीतम्। परावर्तनात् पूर्वं श्रीजवाहरलालमहोदयाः स्वकीयां प्रियां तनयामिमां पेरिस-लन्दन-हालेण्ड-जर्मन्-बेल्जियम-बर्लिनानां यात्रासु स्वेन सहानैषुः। पश्चिमदेशानां सुखसम्पदं विलोक्येन्दिराऽतीव प्रासीदत्।

विश्वस्य महापुरुषाणां साक्षात्कारेष्वपि सा पितृभिः सहैवासीत्। 'स्वतन्त्रता-फासिज्म-समाजवाद'-प्रभृतीनां विषयाणां तथाऽन्यासां विश्वसमस्यानां चर्चाः श्रावं श्रावं तद्विषयेऽपि ज्ञानं प्राप्नोत्। तस्यामेव यात्रायां सा स्वतन्त्र-राष्ट्राणाञ्च स्थितौ व्याप्तमन्तरमपि पर्यचिनोत्। तेष्वेव दिवसेषु प्रियदर्शिन्या 'जान आफ आर्क'नाम्न्याः फ्रांसदेशदर्शनस्याप्यवसरः सम्प्राप्तः। तत्र गमनात् तस्या आनन्दः सुतरां प्रवृद्धः। सा तस्या 'जान आफ आर्क'-महिलाया देशेऽवर्तत, यस्या विषये तया पूर्वं पठितमासीत् तथा तत्समा भवितुञ्च स्वमनसि स्वप्नं सज्जयति स्म। पितृवरैः सह सा तस्य देशस्य महतो लेखकस्य **'रोमां रोला'**-महाभागस्य गृहमपि विलोकितुमगच्छत् तथा तदीयवार्तानां श्रवणस्य सौख्यमनुभूतवती। एतदतिरिक्तं विश्वस्य महतां पुरुषाणां—येषु **बर्नार्ड शॉ-आइंस्टाइन-अर्नस्ट टालर-चार्लीचैप्लिन'**-महाभागा विशिष्यावर्तन्त—दर्शनान्यपि तया कृतानि।

तस्मिन् प्रवासे श्रीजवाहरलालनेहरूणामधिकः समयो जिनेवायामेव व्यतीतः, परं यदा ते बर्लिनेऽवसँस्तदा 'ब्रूसेल्स'-नगरे "साम्राज्यवाद-विरोधि सम्मेलनं' प्रवर्तितमभूत्। सन् १९२७ ई० वर्षस्य फरवरीमासे श्रीजवाहरलाल-महोदया 'भारतस्य राष्ट्रिय-काङ्ग्रेस'स्य प्रतिनिधित्वेन तस्मिन् सम्मिलिताः। तत्रैव ते साम्यवादि-समाजवादिभिरेशियाऽफ्रीकादेशयो राष्ट्रवादिभिश्च मिलित्वा तन्माध्यमेनान्ताराष्ट्रियक्षेत्रे प्रवेशमकुर्वन्। सम्मेलने तस्मिन् ते कम्यूनिष्टैरत्यधिकं प्रभाविता आसन्। ततः परं तैः **'आत्मकथा'**-ग्रन्थे लिखितमभूद् यत् —"मम

समाजवादं (कम्यूनिज्म) प्रति विचारस्तस्मादेव श्रेष्ठमभवद् यतस्तस्मिन् कियन्तोऽपि दुर्गुणा भवेयुः परं समाजवादिनो न्यूनातिन्यूनं साम्राज्यवादिनः पाखण्डिनस्तु नाभूवन्।"

ततः परं श्रीजवाहरलालमहाभागाः 'क्रान्तेर्दशम्यां वर्षग्रन्थौ' '**सोवियत रूस**'-देशं गताः। त्रिदिवसीयायां तस्यां यात्रायां पण्डिताः श्रीमोतीलालमहानुभावाः, कनीयसी भगिनी कृष्णा तथा श्रीमती कमलाऽप्यवर्तन्त। इन्दिराऽप्यस्यां यात्रायां तैः सह गन्तुमकामयत परं कस्माच्चित् कारणाद् गन्तुं नापारयत् तस्मात् सा मनाक् खेदमप्यन्वभूत्। पण्डिताः श्रीजवाहरलालमहाशयाः सोवियतरूसस्य व्यवस्थया प्रसन्ना आसन्। ततः प्रत्यागत्य ते स्वपुत्र्यै सर्वं वृत्तजातं कथितवन्तः। तेऽकथयन्—'रूसदेशे भेदभावानां सर्वथाऽभावो विद्यते। जाति-पङ्क्तिसम्बद्धा भेदा निराकृताः सन्ति। सर्वे मानवीयदृष्ट्या विलोक्यन्ते। सामाजिकं सौविध्यं सर्वेभ्योऽपि समानेन रूपेण सुलभं विद्यते। एकोऽन्यं '**त्वारिश्कोव**' (सहयोगी)इति कथयित्वा सम्बोधयती'ति। तत् सर्वं श्रुत्वा दशवर्षदेशीयाया इन्दिराया मानसेऽपि तादृशाः संस्कारा दृढतां प्राप्ताः। यतो हि --

निरन्तरं श्रेष्ठजनैः प्रदिष्टैः, श्रेष्ठैर्विचारैः क्रमशः प्रबुद्धाः।
साक्षाद् विलोक्याथ दृढत्वमाप्ताः, स्वच्छा विचाराः स्थिरतां लभन्ते।। १५।।

इन्दिराया विचार-सरणिर्विद्यालये स्वसमानवयोभ्यो बालकेभ्यः सर्वथा भिन्नैवावर्तत। नैरन्तर्येण राजनीतिके वातावरणे वर्धमाना सा प्रौढावस्थावतीनामिव चिन्तयति स्म। राजनीतिक-स्वतन्त्रतायै सङ्घर्षस्य तात्पर्यं सा पर्यचैषीत्। तथा यूरोपस्य राजनीत्या अपि सामान्यः परिचयस्तयाऽधिगतः। तस्याः सहपाठिनां रुचिः केवलं क्रीडन-कूर्दनयोरेवाविद्यत, राजनीत्या तेषां स्वल्पोऽपि सम्बन्धो नाभूत्। अत एव सा परस्परं तावदैक्यं नालभत। तथापि सौभाग्यात् पितृणां पितृश्वसॄणामिवैव शीतकालिकेषु क्रीडनेषु रुचिमधारयत्। बहुशः स्खलन-पतनानामनन्तरं तया हिम-क्रीडन 'स्को-स्केट'-प्रभृतीनि धावन-कूर्दन-क्रीडनानि च शिक्षितानि तथा महत्या रुच्या सा तेषु भागमगृह्णात्।

जिनेवास्थिते भवने प्रियदर्शिनी स्वस्याः कर्मकर्त्र्या '**मारग्यूराइट**' नामिकायाः साहाय्येन गार्हस्थ्यजीवन-सञ्चालनस्य तत्त्वानि पर्यजानात्। फ्रेञ्चभाषाऽवबोधेऽपि सा साहाय्यमकार्षीत्। इण्टरनेशनलग्रीष्मकालीनविद्यालये विभिन्नानां देशानां प्रसिद्धा वक्तारो, राजनेतारः कलाकारा वैज्ञानिका लेखका विविध-क्षेत्रीया विद्वांसः स्त्रीपुरुषाश्चागच्छन्ति स्म तथा ते रोचकानां भाषणानां माध्यमेन भाषाज्ञानं कारयन्ति स्म। तेषां सर्वेषां साहजिकः प्रभाव इन्दिराया दृष्टिकोणं विशालं साधयितुं किञ्च राष्ट्रियजीवनस्य भूमिकायाः स्थिरत्वं विधातुं पूर्णतयो-

पयोगी समपद्यत। इन्दिरायां ज्ञानार्जनस्य प्रवृत्तिरतीव श्लाघनीयाऽऽसीत् तथा विदुषां नेतृणाञ्च संल्लापान् सा पूर्णया गम्भीरतयाऽशृणोत् । यतः —

श्रवणेन समर्जितमिष्टतमं, सुजनैर्गदितं प्रथितं स्वगुणैः ।
निधिवत् स्थिरतामुपलभ्य पुनः, समये समये सुखयत्यतुलम् ।।३६।।

इत्थं विविधदेशानां प्रवासान् विधाय भारतं प्रत्यावर्तयितुं जलयान-प्राप्तिकामनया सर्वेऽपि '**मार्सेलीज**'मुपागताः, केवलं पण्डितश्रीमोतीलालमहाभागा यूरोपस्यान्येषां कतिपयानां देशानां दिदृक्षया स्वल्पाय कालाय तत्रैवावरुद्धाः। सन् १९२७ ई० वर्षस्य दिसम्बरमासे ततः प्रस्थाय ते 'कोलम्बो' (श्रीलङ्का) नगरं प्राप्तास्ततश्चावतीर्य सत्वरं मद्रासनगराय प्रस्थिताः। आसीत् तत्र काङ्ग्रेसस्य वार्षिकाधिवेशनावसरः। भारते सर्वत्र परमोत्साहस्तथा स्वाधीनतायै सर्वस्वसमर्पणभावना देशवासिषु व्याप्ताऽभूत् ।

यूरोपे समाजवादि-विचारकाणां सम्पर्केण श्रीजवाहराणां हृदयं विपुलां प्ररणामलभत। आदर्शवादेनानुप्राणितास्ते स्वाधीनतान्दोलने प्राणपणेन संयुक्ताः। मद्रपुर्या अधिवेशने तेषां विचारधाराऽतीव समर्थनं प्राप्तवती। युवभिः पूर्णस्वाधीनतायास्तथा साम्राज्यवादविरुद्धाः प्रस्तावाः सोत्साहं स्वीकृताः। परं श्रीगान्धिनस्तैः सन्तुष्टा नाभूवन्। तैः श्रीजवाहरलालानुद्दिश्य लिखितमासीत् —

"त्वं भूयसा वेगेन पलायसे। चिन्तनाय विचारणाय तथा तदीयस्थितेः परिज्ञानायापि स्वल्पः समयो देय आसीत्।" इति।

परं तेन श्रीजवाहरलालनेहरूमहाभागा मनागपि विचलिता नाभूवन्। ते राष्ट्रवादिनस्तरुणान् समघटयन्। तदा तेषां राष्ट्रियः स्वरो भूयोऽपि प्रखरतामासादितः। स्वीयेषु भाषणेषु ते नवयुवकान् सम्बोधयन्तः 'पूर्णस्वराज्य-स्वतन्त्रता-समाजवादोद्योगीकरण-सिद्धिपर्वकं साम्राज्यवाद-द्रव्यवाद-समापन'-सदृशान् विचारान् भूयो भूय आवर्तयन्। पितृपादानां तानि वचनानि प्रियदर्शिन्या अन्तरङ्गे निर्विलोपनीयान्यङ्कनानि प्रास्तुवन्, यानि तस्या अन्तिमसमयावधि वर्तिताभ्यो नीतिभ्यः स्पष्टं प्रत्यायन्त। तस्यां साम्राज्यवाद-साम्प्रदायिकता-द्रव्यवाद-सामाजिक-विषमतादीनतादीनां विरुद्धं सातत्येन समादृतः सङ्घर्षस्तेषामेव प्रभावादवर्तत।

मद्रपुर्याः कार्यक्रमानन्तरं दक्षिण-भारतस्य यात्रा अपि तैः सपरिवारं विहिता। यात्रायां यद्यन्नवीनं जिज्ञासितव्यमाश्चर्योद्भावकमिन्दिराया मनसि प्रश्नरूपेणोपातिष्ठत् सा पितृचरणान् साग्रहं पृष्ट्वा तस्य समाधानं लभते स्म। एकदा सा 'संसारस्य तथा मानवानामारम्भस्य' प्रश्नं तेषां पुरः स्थापितवती।

तस्मिन्नेवावसरे श्रीजवाहरलाल-महानुभावैर्धारावाहिकरूपेण पत्राणां लेखनायापि निर्णीतं यस्य परिणतिरग्रे समपद्यत। एकवारं श्रीगान्धिनामाकारणया प्रियदर्शिनी-न्दिरा तेषां साबरमतीस्थ आश्रमेऽप्यगच्छत्, कियन्तिचिद् दिनानि सा तत्रैवावसच्च। तत्रत्या दिनचर्या तस्या मनोऽमोहयत्, परं दीर्घकालं यावदाश्रमे स्थितिर्नासीत् सम्भवाऽतः सा प्रत्यागता। आश्रमस्य प्रभावात् काङ्ग्रेस-कार्यकर्तॄणाञ्चोत्साहा-वलोकनाच्च साऽपि स्वयंसेवकेषु सम्मिल्य तेषामिवैव स्वतन्त्रताऽऽन्दोलने भागं ग्रहीतुमुत्सुकाऽऽसीत्।

सन् १६२८ ई० वर्षे लन्दनस्य ब्रिटिशशासनेन **'साइमन आयोगः'** प्रेषितः। भारतीये संविधाने परिवर्तनाधिकारं प्राप्यागतवतस्तस्यायोगस्य बहिष्कारोऽक्रियत। अयं साइमन-आयोग ३० अक्टूबर-दिने यदा लाहौरं प्राप्तस्तदा धूम्रयान-विश्रामस्थलस्य समक्षं प्रदर्शनकर्तरि जनसमूहे यष्टिका-प्रहाराः कृताः। प्रान्तस्य लोकप्रियनेतॄणां श्रीलाजपतरायाणां वक्षसि द्वौ यष्टि-प्रहारावभूतां, १७ नवम्बर-दिने ते दिवङ्गताः। लखनऊनगरे साइमनायोगस्यागमनावसरेऽपि महत् प्रदर्शनमभवत्। तस्मिन् विहिते यष्टि-प्रहारे श्रीजवाहरलालानां पृष्ठेऽपि जीवने प्रथमवारं यष्टिप्रहारा अभवन्। एवमेव द्वितीयवारं धूम्रयानविश्रामस्थल एवाश्वारोहि-भिरारक्षिभिर्दण्डप्रहारा अक्रियन्त यैः श्रीजवाहरलाला अपि प्रहृताः। श्रीमोतीलालाः स्वयं लखनऊनगरं प्राप्य तत्सर्वं विलोक्य चाखिद्यन्त। श्रीगान्धिमहात्मभिरपि सान्त्वना-श्लाघोत्साहवर्धिन्य आशिषः पत्रेण प्रेषिताः।

ततः परं 'नेहरू-समिति'-नाम्ना 'संविधान-निर्मापक-समितेः' संयोजनेऽखिल-भारतीय-काङ्ग्रेस-समितेः प्रधानमन्त्रित्वेन कार्यं कुर्वतां श्रीजवाहरलाल-महानुभावानां तत्परता प्रावीण्यं विवाद-समाधानानि चातीव महत्त्वपूर्णानि सम्पन्नानि येषु हिन्दू-यवनयोः पार्थक्यनीतेरपि समाधानमासीत्। तैः प्रस्तुतं प्रतिवेदनमपि सर्वैरन्यनेतृभिः प्रशंसितम्।

१६२८ ई० वत्सरे कलकत्ता-महानगर्यां सम्पद्यमानस्याऽखिलभारतीय-काङ्ग्रेसाधिवेशनस्याध्यक्षतायै महता काठिन्येन श्रीमोतीलालनेहरूणां स्वीकृतिः प्राप्ता। सम्मेलनेऽतिमहत्त्वपूर्णाः प्रस्तावाः स्वीकर्तव्या आसन्। उग्रवादिनां यूनां तथोदारवादिनां विचारेषु साम्य-व्यवस्थापनाय श्रीगान्धिनो भूयोभूयः सम्प्राथ्य सम्मेलन उपस्थातुं कथञ्चिदनुकूलाः कृताः। तस्मिन् सम्मेलने भारतस्य सर्वऽपि राष्ट्रिया नेतारः समवेताः। कुमारीन्दिराऽपि स्वपरिवारेण सह कलकत्तामगमत्। अध्यक्षस्य शोभायात्राममलोकितवत्या तया सानन्दं दृष्टं यत् तस्याः पूज्याः पितामहाश्चतुस्त्रिंशत्संख्यकाश्वानां रथे स्थिता आसन्। निखिलो जनगण आनन्दातिरेकेण जयजयारावं कुर्वन्नासीत्। तत्र सम्मेलने श्रीमोतीलालनेहरू-भिरतीव सारपूर्णा विचाराः प्रस्तुताः।

यद्यपि तत्र मृदूग्रदलयोर्विचाराणां वैमत्यमभूदेव किञ्च तत्र श्रीजवाहर-लाल-सुभाषचन्द्रवसु-महानुभावानां नेतृत्वे कानिचित् तत्त्वानि वाञ्छन्ति स्म यत् 'काङ्ग्रेससमितिः स्वतन्त्रतायाश्चरमं लक्ष्यं स्वीकुर्यात्' किन्तु श्रीगान्धिनां माध्यस्थ्येन सन्धि-साफल्यमभूत्। काङ्ग्रेससमित्य ब्रिटिशशासकेभ्यो भ्राम्यत्-पत्र-प्रेषणाय प्रस्तावः स्वोकृतस्तस्मिन् निर्णीतं यत् 'सर्वदलीय-प्रतिवेदनद्वारा दर्शितं संविधानं यद्येकस्मिन् वर्षाभ्यन्तरे न स्वीकृतं तदा काङ्ग्रेससमित् स्वतन्त्रताया अध्येषणायां प्रसिता भविष्यतीति।' इदमीदृशमन्तिमेत्थंरूपं निवेदनमासीद् येन श्रीमोतीलाल-जवाहरलालयोर्मध्ये वर्तमानं वैमत्यमपि विनष्टम्। परमाङ्ग्ल-शासकास्तं प्रस्तावं निरर्थकं मत्वा दमयितुं प्रवृत्तास्तत एव—

कर्मावरोधाः श्रमिकेष्वशान्तयो, वर्गप्रभावाः सुतरां प्रवर्तिताः।
विदेशजाः शासन-कर्म-साधका, अत्याचरंस्तत्प्रतिरोधकाम्यया ॥१७॥
मुख्यास्ततो नेतृवरा निरुद्धाः, कारासु चाराद् विनिपात्य तुष्टाः।
दुर्दान्तिभावैर्जनतां विमृद्य, स्वं शासनं बृंहितुमायतन्त ॥१८॥

सन् १९३० ई० वर्षीय—काङ्ग्रेसाधिवेशनस्य समयो यथायथा निकट-मायाति स्म तथैवाध्यक्षस्य निर्णयाय समित् त्वरति स्म। १९२९ ई० वर्षस्य ग्रीष्म-शरद्-ऋत्वोः काङ्ग्रेससमितेरुपवेशने सम्पन्ने। सर्वे महात्म-श्रीगान्धिनोऽ-ध्यक्षत्वमवाञ्छन्, परं ते कथमपि सम्मता नाभूवन्। स्वयं ते श्रीजवाहरलाल-नेहरूणां नाम प्रास्तावयन्, प्रबलानुरोधेन च तदीयान् गुणान् कर्मठतां पटुतामा-वश्यकतां च प्रत्यपादयन्। सर्वसम्मत्या श्रीजवाहरलालमहानुभावा अध्यक्षाः स्वीकृताः। श्रीमोतीलालमहाभागा अपि सम्मतिमदुर्यत् तरुणानां प्रतीकत्वेन पदमिदं स्वीकरणीयमिति। प्रपञ्चेभ्यो दूरे स्थातुमभिलषद्भिस्तरुणनेहरूभिरपि तद्-विरोधाय चेष्टितं परं ते श्रीगान्धिनां पितृपादानां तथाऽन्येषां सदस्यानामनुरोध-माज्ञां चान्ततः स्व्यकार्षुः।

□ पूर्ण-स्वातन्त्र्य-घोषणा

दासता-पाश-बद्धस्य, स्वदेशस्य विमुक्तये।
अभूद् रावी-नदी-तीरे, "पूर्ण-स्वातन्त्र्य-घोषणा" ॥१९॥

काङ्ग्रेसाधिवेशनस्याध्यक्षतायै सन् १९२९ ई० वत्सरीय-दिसम्बरमासस्य २५ तमे दिनाङ्के श्रीजवाहरलालनेहरू-महाभागा लाहौरनगरं प्राप्ताः। तत्र तेषां स्वागतमीदृशं भव्यमभूद् यद् भूपतिभ्योऽपीर्ष्योत्पादकमासीत्। पञ्चाम्बुप्रान्तस्य सा राजधानी विविधवर्णवतीभ्यः पताकिकाभ्यो विद्युद्दीपिकाभ्यश्चातीवोल्ला-समयी व्यराजत। चलसमारोहस्य शोभाऽपूर्वैवावर्तिष्ट। श्रीजवाहरलालाः प्रथमे सभापतय आसन् ये सितेऽश्वे समारुह्याग्रतः प्राचलन्, तेषां पृष्ठतोऽन्येषामश्वारोहिणां

दलमासीत्। लाहौरस्य सङ्कुचिताभ्यो वीथिभ्यो निःसृत्य शोभायात्रा यदा प्रशस्ते पथि समायाता तदा जनसमूहोऽतितरां विशालः सन्नवालोक्यत। गवाक्षेषु चन्द्रशालासु वृक्षेषु च दर्शकानामपारो जनपारावारो व्याप्नोत्। श्रीमोतीलालमहोदयास्तेषां धर्मपत्नी श्रीमती स्वरूपरानी च **'अनारकली'**-स्थितायाः 'भल्लाशू-कम्पन्या' ऊर्ध्वभागात् तद्दृश्यमलोकितवन्तस्तथाऽन्यदर्शकाणामिवैव, तावपि स्वपुत्रस्य स्वागते पुष्पवृष्टिमकुर्वन्त।

भारतीय-राष्ट्रिय-काङ्ग्रेसे कदापि कोऽपि पुत्रः स्वपितुरनन्तरं काङ्ग्रेसस्याध्यक्षतां न प्राप्त आसीत्। यदा श्रीमोतीलाल-महाभागैः स्वपुत्राय श्रीजवाहरलालाय कार्यभारो दत्तस्तदा तैः पारसीक-भाषायाः पद्यमेकमिदं पठितमासीत्—

'हिमचे के पिदर नतवानद, पिसर तमाम कुनद"
(पिताऽशक्नोन्न यं प्राप्तुं, प्राप्नोत् तत्तनयः स्वयम्।)

पितॄणां कामनेयं सत्याऽभूत् —

इच्छेत् पराभवं पुत्रादिति यद् कथ्यते जनैः।
तस्मिँस्तदीयोत्कर्षस्य, भावनाऽऽस्ते बलीयसी ॥२०॥

लाहौर-काङ्ग्रेसेनोद्घोषितं यद् 'नेहरू-प्रतिवेदन' उपनिवेश-पदाद् या सहमतिः प्रकटिताऽभूत् तस्या अवधिः समाप्तिगमत्। इतः परं स्वराज्यस्य तात्पर्यं भविष्यति 'पूर्णस्वाधीनता'। केन्द्रीय-प्रान्तीय-विधानसभानां काङ्ग्रेससदस्यास्त्यागपत्रप्रस्तुतय आदिष्टाः। ३१ दिसम्बरस्य मध्यायां रात्रौ रावी-महानद्यास्तटे स्वातन्त्र्यस्य ध्वजमुत्तोलितम्। काङ्ग्रेसस्य शिविरेष्वपूर्व उत्साहोऽदृश्यत। श्रीजवाहरलालमहाभागाश्च ध्वजं परितो नर्तितुं प्रवृत्ताः।

१९३० ईशवीयहायनस्य नवीनं दिनं न केवलं नेहरू-परिवाराय; अपि तु श्रीजवाहरलालमहानुभावानां मुखारविन्दात् स्वाधीनताया घोषणां श्रोतुं समुपस्थिताय विशालाय जनसमूहायापि स्मरणीयमासीत्। काङ्ग्रेसस्वयंसेवकदलस्य गणवेशे सुसज्जिताया इन्दिराया हृद्युत्साहः सीम्नि स्थातुं नापरयत्। पूर्वं तस्याः पितृचरणा यदा तद् घोषणापत्रं लिखितमासीत् तदा सा तेषां समीप एवासीत् सर्वप्रथमं पठित्वा तानश्रावयच्च। तदैव प्रथमवाचनेन सहैव पितृभिः कथितमभूद् यत्—'प्रियपुत्रि! त्वयेदं घोषणा-पत्रं सर्वप्रथमं पठितम्, अतोऽत्र सूचिताः प्रतिज्ञास्त्वया प्रतिज्ञातव्याः सन्ति तदुत्तरे च सहर्षं तया प्रतिज्ञातमप्यासीत्।'

तदानीं तत्र रावीनद्यास्तटे पूज्यानां पितृपादानां, सभायामुपस्थितान् लक्षशो जनाननुप्राणयतो देशभक्तिपर्णान् गभीरांस्तान् शब्दान् कुमारीन्दिराऽपि सोत्साहं

तल्लीनतापूर्वकमश्रृणोत् —

"वयं भारतीयाः प्रजाजना अपि, अन्येषां राष्ट्राणामिवेमं स्वीयं जन्मसिद्धमधिकारं मन्यामहे यद् वयं स्वतन्त्रा भूत्वा वसेम, स्वकीयस्य परिश्रमस्य फलानि स्वयं भुञ्जेम तथाऽस्मभ्यं स्वेषां निर्वाहायापेक्षितानि सौविध्यानि लभ्येरन्।······वयमिदमपि मन्यामहे यत् किञ्चन शासनं जनताया एतानधिकारान् प्रत्यादत्ते किञ्च तां पीडयति, तर्हि जनता तच्छासनं परिवर्तयितुं पराकर्तुमपि चाधिकरोति। भारतस्याङ्ग्लशासनेन भारतीयानां केवलं स्वतन्त्रतैव न प्रत्याहृताऽपि तु तस्य मूलशिलैव दीनानां शोषणे निहिताऽस्ति तथा तेनार्थिक-राजनीतिक-सांस्कृतिकाध्यात्मिक-दृष्टिभिरपि भारतं विकलं कृतमस्ति। अतो वयं विश्वसिमो यद् भारतेनाङ्ग्लैः सह सम्बन्ध-विच्छेदपूर्वकं पूर्णस्वराज्यमथवा स्थायिस्वातन्त्र्यमासादितव्यमिति। ···

येन शासनेनास्माकं देश इत्थं व्याकुलीकृतस्तथा विनाशितस्तस्याधिकारे निवासोऽस्माकं सम्मतौ मनुष्यमीश्वरञ्चोभौ प्रत्यपराधो विद्यते। किञ्च वयमेतदपि स्वीकुर्मो यदस्मभ्यं स्वस्य स्वातन्त्र्यस्योपलब्धेः समुचितः पन्था हिंसा नास्ति। अतो वयं ब्रिटिशशासनेन, यावच्छक्यं, स्वेच्छया कीदृशमपि सहयोगं न कर्तुं प्रयतिष्यामहे तथात्मानं सविनयावज्ञायै किञ्च शुल्कावरोधायापि सज्जयिष्यामः। एतदर्थं वयं शपथपूर्वकं सङ्कल्पयामो यत् पूर्णस्वराज्यस्य स्थापनायै काङ्ग्रेसदलं समये समये या आज्ञा दास्यति ताः पूर्णस्वरूपेण पालयिष्याम" इति।

काङ्ग्रेसेनेयं घोषणा राष्ट्रिय-ध्येयरूपेण स्वीकृता। २६ जनवरी-दिने 'स्वाधीनता-दिवसोत्सवं' मानयितुं जनानामाह्वानं कृतम्। तस्मिन् दिने ग्रामेषु नगरेषु च लक्ष-लक्षजनैः प्रतिज्ञातं यद् -'ब्रिटिशशासने निवासो मनुष्यं तथा भगवन्तं प्रत्येकोऽपराधोऽस्ति' इति। स्वतन्त्रता-प्राप्तेरीदृशं महोत्साहं भारतीयेषु विलोक्य श्रीगान्धिनः सम्प्रेरणां लब्धवन्तः। तैः फरवरीमासे लवण-सत्याग्रहाय जनाः प्रेरिताः स्वयञ्च सुप्रसिद्धां दाण्डी-यात्रां विधायाप्रैलमासस्य पञ्चमे दिने लवण-निर्माणारम्भो विहितः। प्रारम्भे तु सविनयावज्ञायाः स कार्यक्रम उपहासास्पद एव प्रतीतः परं तद्रहस्यं विज्ञाय स्वातन्त्र्य-प्रतीकताञ्चाऽनुभूय श्रीमोतीलाल-जवाहरलालादयोऽपि सम्मिलिताः।

आङ्ग्लशासका अपि प्रारम्भे बाललीलावदेवेमं सत्याग्रहं मत्वोपेक्षितवन्तः परं भविष्यतः सङ्कटस्याशङ्कनं विमृश्य निर्ममं दमनं, चल-समारोहाणामवरोधायाध्यादेशप्रसारणं, जनसमूहे यष्टिका-प्रहरणादेशं गुटिकास्त्रसञ्चालनादेशञ्च प्रासारयन्। नृशंसं तदाक्रमणं भारतीयां जनतां — स्त्री-पुरुष-बालकादीन् — क्रोधोन्मत्तामकरोत् तेनैव च भारतीया जनता शासनं विरोद्धुं दृढं निरचैषीत्।

यत्र स्वातन्त्र्यलब्ध्यै समुचित-विधिना शस्त्रहीना नितान्तं,
सत्याः सत्याग्रहेण ह्यभिमत-कथनं कुर्वते स्म प्रशान्ताः।
तेऽपि क्रूरैर्यथेच्छं प्रहरण-दमनैर्मारणैः पीडिता यै—
स्तेषामुन्मादलीला प्रसभमधिकृता हन्त! वर्ण्येत केन? ॥२१॥

श्रीगान्धि-श्रीमोतीलाल-श्रीजवाहर-सहिता अनेके ज्येष्ठाः श्रेष्ठाश्च नेतारो निगृह्य कारासु बन्दीकृताः। तस्मिन्नवसरे मान्याः श्रीगान्धिन एकां विज्ञप्तिं प्रासारयन्, यस्यां भारतस्य महिलानां समाह्वानमभूत्। तैः कथितमासीद् यद्—"भारतीया महिला अपि पुरुषैः सहात्मनो वास्तविकं समुचितञ्च स्थानं गृह्णीयुः। स्वतन्त्रतायाः सङ्ग्रामः केवलमेकलैः पुरुषैरेव जेतुं शक्यो न विद्यते। महिला या मनुष्यजातेरर्धभागरूपाः सन्ति, स्वीये सदने समारोपितादेकान्तवासाद् बहिरागच्छेयुः, पुरुषैः सह स्कन्धैः स्कन्धान् मेलयित्वा स्थिता भवेयुः, किञ्च स्वातन्त्र्यस्य सङ्ग्रामे स्वीयां साम्यपूर्णां भूमिकां निर्वहेयुः।"

तस्या विज्ञप्तेरपूर्वोऽनुकूलः प्रभावोऽभूत्। ताः सोत्साहं पुरुषाणां साहाय्यमाचरितुं सचेष्टा अभूवन्। चलसमारोहेषु भागानगृह्णन्। यष्टि-घुष्टि-मुष्टि-गुटिकादि-प्रहारानप्यसहन्त। वीराङ्गनानामभिनवं स्वरूपं व्यञ्जयन्त्यस्ता निर्भीकतया राष्ट्रस्य स्वाधीनतायै पुर उपागच्छन्। श्रीमत्यः कमला-विजयलक्ष्मी-कृष्णा अपि नेहरूयुगलस्य कारावासावधौ सभाः सम्बोधयन्त्यः काङ्ग्रेसस्यादेशान् पालयन्त्यः सविनयावज्ञान्दोलनं वर्धयन्त्यस्तथा सुतरां सन्नद्धा अभूवन्। स्वयं स्वरूपरानी महाभागाऽपि जरावस्था-दौर्बल्या स्वास्थ्यदशायामपि जनावचयन-निरोध-सङ्घटनादिकर्माण्याचरत्। चलयात्राणां नेत्रीत्वमकरोत् तथा दण्डप्रहारानपि साऽसहत। इत्थमेव श्रीमती कमला, या—'इलाहाबाद-जनपद-काङ्ग्रेसस्याध्यक्षाऽप्यवर्तत'—स्वकीयामस्वस्थतां विस्मृत्य सविनयावज्ञान्दोलनस्य प्रवृद्ध्यै निरन्तरतायै चाहोरात्रं ग्रामाद् ग्रामं परिभ्रमणं विधाय जनान् सङ्घटयितुं सपरिश्रमं सोत्साहं च कार्याण्यकरोत्।

पूर्वं वीराङ्गना याः प्रथितिमुपगता भारतीयेतिहासे,
याश्चाध्यात्मस्य भक्तेरपि पथि विहृताः साधयन्त्यः सुसाध्व्यः।
तासामेव स्वरूपे निजकृतिकुशला राष्ट्रसेवासु मग्नाः,
स्वातन्त्र्यार्थं सुशान्ताः परमदृढतयाऽकार्षुरान्दोलनानि ॥२२॥

कृष्णा नेहरूस्तदानीं 'तरुण-भारत-सभा'याः सचिवपदे नियुक्ताऽऽसीत्। आन्दोलनस्यैकस्मिन् समारोहे शासन-विरुद्धं भाषमाणां तां निगृह्य कारावासेऽपातयन्। सैवासीत् प्रथमा महिला नेहरूपरिवारस्य या राष्ट्रियान्दोलनप्रसङ्गेन कारां न्यषेवत। इन्दिरामहाभागायै तदानीं कारातो बहिःस्थितिर्नारोचत। सा

स्वयंसेवकदले कार्यं कर्तुं न्यवेदयत् परं तदानीं तस्या वयसो न्यूनतया प्रवेशो नाभूत्। आसीत् सा द्वादशवर्षदेशीया। तस्मात् खिन्नाऽपि सा काङ्ग्रेसस्य कार्यप्रणालीषु भाग-ग्रहणार्थं कृतनिश्चया स्वकीयया पद्धत्या स्वानुरूपं कार्यं कर्तुं प्रायतत।

इन्दिरा परितः प्रतिवेशिनः सर्वान् दीनानां धनिकानां बालकान् बालिकाश्चाकार्यावादीद् यत् परिसरस्य सर्वानपि बालकानेकीकृत्य पृष्ठभागस्थे प्राङ्गणे सभाया आयोजनं कुरुत। तस्मिन्नहमेकामतीव श्रेष्ठां योजनां दर्शयिष्यामि। द्वितीये दिने स्वराज्यभवनस्य पृष्ठवर्तिनि भागे शतशो बालका एकीभूताः। इन्दिरा कुशलनेत्रीव तत्र भाषणमदात्। तया प्रस्तावितं यत् काङ्ग्रेसदलं देशस्य स्वातन्त्र्याय युद्ध्यति तस्मिन् कार्यं कर्तुं बालानामेकं सेवादलं स्थाप्येत। काङ्ग्रेसस्य कार्येषु सहयोगाय यावन्तोऽपि रहस्यपूर्णाः प्रकारास्तया चिन्तिता आसँस्तान् बालश्रोतॄनकथयत्। तयोक्तम् —

"यत् किञ्चिदप्यहं कथयामि तस्मिन् भीतिस्तु विद्यत एव। यद्यारक्षिणोऽस्मान् निग्रहीष्यन्ति तदा ज्येष्ठानामिव कारावासं न दास्यन्ति परं सम्भाव्यते वेत्रेण ताडयित्वा मुञ्चेयुः।"

किञ्चान्ते सा सर्वानपृच्छत्—किं यूयं सर्वेऽप्यस्यै सेवायै सज्जाः स्थ? तत्रोपस्थितानां सकलानां बालक-बालिकानां स्वातन्त्र्ययुद्धे प्रवेशार्थमिदमाह्वानमभूत्। परितो यत् किमपि भवति स्म तद्विषये बालाः स्वल्पपरिचिता आसन्नेव तथा तेषां मातरः पितरश्चापि स्वयमाभिमुख्यं कुर्वाणा एवावर्तन्त। अतः सर्वेऽपि स्वीकृतिमदुः। तेभ्यो भयस्यापि स्वस्मिन्नेकं महदाकर्षणमभूत् तथा गृहाणां प्रौढ-वृद्धानामिव ते स्वयमपि सङ्कटं स्वीकर्तुं व्याकुला आसन्।

इन्दिरा तस्य सङ्घटनस्याभिधानं रामायणस्य कथाया आधारेण **'वानर-सेना'** इत्यकार्षीत्। सीताया मुक्तये वानरसेनायाः साहाय्यं प्राप्यैव श्रीरामेण विजयः प्राप्तस्तथैव भारतमातुर्मुक्तये बालसेवकानां सैन्यमिदं सहयोगि भविष्यति विजयं च लम्भयिष्यतीति बलवती भावनैव 'वानर-सेना'-नाम-निर्धारणायेन्दिरामुदसाहयत्। स्वाधीनतासङ्ग्रामे रामायणकथाया इन्दिरया यो व्यावहारिक उपयोगः कृतो यश्च सेतुर्निर्मितः स तेषु बालकेष्वेकतायाः सेतुरासीत्। सहस्रशो बालाः वानर-सेनायां प्रविष्टाः। सा तान् शारीरिकं व्यायाममकारयत् सर्वान् पृथक् पृथक् कार्यं च व्यतारयत्। बालकाः पताका-निर्माणैः, कर्गदप्रावरणेषु प्राप्ति-सङ्केतलेखनैश्चलसमारोहेषु स्वयंसेवकेभ्यो जल-वितरणैरन्यैश्चावश्यकैः कार्यजातैः काङ्ग्रेससाहाय्यं व्यदधुः। केचन निर्भीकाः साहसिनो बालका रात्रौ सभानां चलयात्राणां सूचकानि भित्ति-पत्राणि समश्लेषयन्। केचनैकस्य दलस्य सन्देशमपरस्मै दलायातिगुप्तरीत्या सावधानतया च प्रापयन्। तेषामिमानि कार्याणि भूमिगतपद्धत्या वीरतापूर्णान्युदाहरणान्यवर्तन्त। आरक्षिणो यदा निग्रहणाय गृहानावेष्टयन्ति स्म

तदा बालकाः कियदेतिकया सानन्दं भ्रमन्तः सन्देशान् महत्त्वपूर्णाः सूचनाश्चेतस्ततो नयन्ति स्म।

बालक-बालिकानां सङ्घटन-पूर्वकं बहुविध-प्रयासैः काङ्ग्रेसकार्यकर्तॄणां सौकर्य-सम्पादनं गुप्तचर-रूपेण सन्देशप्रापणं भाविनामातङ्कानां सूचनमारक्षिणां योजनानां प्रत्याहरणमित्यादीनि महत्त्वपूर्णानि कर्माणीयत्या सरलया प्रणाल्या सम्पादने वानरसेनायास्तेषु सङ्क्रान्तदिनेषु यो महान् योग आसीत् तस्य सर्वं श्रेय इन्दिराया एव गच्छति। इदमेव सङ्घटनकौशलं व्यवस्थापननैपुण्यं सेवा-सातत्यं नैष्ठिकं दाक्ष्यञ्च भविष्यति तस्यै प्रधाननेत्रीत्वाय विकसितमभूत्।

श्रीरामेण निशाचरोर्जितचमूनाशाय यत्नाद् यथा,
युक्त्या वानरसैनिकैः सह कृतं सख्यं च लब्धो जयः।
एकीकृत्य तथैव बालनिचयं वैदेशिकानिन्दिरा,
जेतुं वानरसेनयैच्छदिति तद्बुद्धेरभूत् कौशलम्॥२३॥

स्वाधीनता-सङ्घर्षः प्रतिदिनमुग्रादुग्रतरो भवितुं प्रवृत्तः कारावासेषु गच्छतां देशभक्तानां सङ्ख्याऽपि क्रमशो वृद्धिं गच्छति स्म। श्रीमोतीलाल-जवाहरलाला-वपि **'नैनी'**स्थे कारागृहे दृष्टि-निग्रहेऽवर्तताम्। काङ्ग्रेसस्य कार्यकारिण्यवैधानिकी घोषिता। ये नेतारो निगृह्यन्ते स्म ते स्वस्वपदेषु समितेः सदस्यान् नियुञ्जन्ति स्म तथाऽऽरक्षिवर्गस्तानपि यन्त्रयति स्म। इत्थं श्रीमती कमलानेहरूस्तथाऽन्या बह्व्यो महिलाः कार्यकारिण्याः सदस्या अभूवन्। यस्य नवीनस्य भारतस्याविर्भावः सम्पद्यते स्म तस्मिन् महिलाः स्वकीयानामुपयुक्तानि स्थानानि प्राप्नुवन्ति स्म तदर्थं पुरुषाश्च तासां स्वागतं प्रशंसनञ्चाकुर्वन्। स्वयं श्रीजवाहरलालमहानुभावा अपि स्वस्याम् 'आत्मकथा'यां महिलानां तत्कार्यं प्रति कार्तज्ञ्यं प्रादर्शयन् —

"वयं स्वस्यां जनतायां तथा विशिष्यास्माकं महिलावर्गे गर्वं कुर्वाणा आस्म। अहं मम मातुः, पत्न्याः, भगिनीनां तथाऽनेकासां भ्रातृव्य-भगिनीनां किञ्च महिला-मित्राणां कार्यैरतीव सन्तुष्टः प्रसन्नश्चाभूवम्।···एकस्मिन् महति कार्ये सहभागि-त्वस्याभिनवया भावनया संयुक्ता वयं मिथोऽतीव नैकट्यं प्राप्ताः। एवमनुभूयते स्म यत् परिवार एकस्मिञ्ज्यायसि समहे व्यलीयत तथा ततोऽपि स्वीयं पुरातनं सौहार्दं घनिष्ठताञ्च सुस्थिरयन्नवसदिति।"

इत्थं नेहरूपरिवारस्य सर्वेऽपि लघिष्ठा ज्येष्ठाश्च सदस्याः सविनयावज्ञा-न्दोलने स्वीयानि योगदानान्यकार्षुः। तेषां तादृशस्य कार्यस्य समाचारान् श्रीमोती-लालनेहरूमहाशया अपि कारागारेऽश्रौषुः। तैः १६ जुलाई १९३० ई० दिने परि-वारायैकं भ्राम्यत्-(गश्ती) पत्रं लिखितम्। (बन्दिभ्य एकस्मिन् मासे केवलमेकस्य पत्रस्य लेखनानुमतिरासीदतस्ते सर्वेभ्यः सहैवैकं पत्रमलिखन्।) तस्मिन् सविनोदं— वृद्धायै गृहसेविकायै, भ्रातृजायायै, कमलायै, विजयलक्ष्म्यै, कृष्णायै तथेन्दिरायाः

कृते पत्राण्यासन्। इन्दिरायै तेऽलिखन् —

"इन्दु (इन्दिरे); वानर-सेनायां तावकीना स्थितिः काऽस्ति ? मम सम्मतिरस्ति यत् प्रत्येकं सदस्यस्य लाङ्गूलेन भवितव्यं तथा च तत् पदानां दृष्ट्या लघु दीर्घं वा भवेत्। परिचायिनि पदके हनुमतो मुद्रा समीचीनाऽस्ति किन्तु हनुमतो हस्ते गदाया अभाव एव श्रेयान् विद्यते। इदं स्मर्तव्यं यद् गदायास्तात्पर्यमस्ति हिंसा, वयञ्चाहिंसकाः सैनिकाः स्मः। युष्मभ्यं शारीरिक-व्यायामस्य शिक्षकः कोऽपि विद्यते न वा ? अयमत्यावश्यकोऽस्ति। त्वया स्वस्थया भाव्यम्। धावनस्य व्यायामः करणीयः। तव पितरः प्रत्यहं मीलद्वयस्य धावनं कुर्वन्ति। (अनेन सहैव धावनस्य व्यवस्था-विषयेऽपि सा प्रतिबोधिता)।"

कारा-जीवनस्य मानसिकीनामाक्रुष्टीनां कष्टानाञ्च परिणत्या श्रीमोतीलालनेहरूणां स्वास्थ्यं द्रुततयाऽह्रसत्। श्रीजवाहरलाला निरन्तरं तेषां सेवा-शुश्रूषासु संलग्ना एवावर्तन्त (यतो हि तेषां प्रकोष्ठौ निकटावेवास्ताम्।) अस्वास्थ्यकारणात् ते (श्रीमोतीलालमहाभागाः) मोचिताः। श्रीमती स्वरूपरानी, श्रीमती विजयलक्ष्मीः पण्डिता तथा कृष्णा तान् स्वास्थ्य-संवर्धनाय मसूरीमनयन्। श्रीमती कमला तत्रैवेलाहाबादनगरे काङ्ग्रेसस्य गतिविधिषु तत्पराऽवसत् तस्मादेव कारणादिन्दिराऽपि तत्रैव न्यवसत्। कतिचित्-सप्ताहानन्तरं यदा श्रीजवाहरलालानामपि बन्दीगृहान्मोचनमभूत् तदा ते (इन्दिरा-कमला च) अपि मसूरीं गते किन्तु ततः प्रत्यावर्तनात् प्रागेवैकस्य भाषण-प्रदानस्यापराधे श्रीजवाहरलालाः पुनर्निगृह्य तेभ्यः सार्धद्विवर्षात्मको दण्डः श्रावितोऽभूत्।

समस्तेऽपि भारते तस्या दण्डघोषणाया निग्रहणस्य च विरोधे सभा आयोजिताः। एकस्यां सभायां नेहरूपरिवारस्य महिला अपि सममिलन्। श्रीमती कमला तत्र तत्समग्रं भाषणं वाचयित्वाऽश्रावयद् यदर्थं श्रीजवाहरलालेभ्य इयान् दीर्घकालिको दण्डोऽदीयत। तस्य फलस्वरूपं कमलाऽपि निग्रहं प्रापत्।

मनो-वाक्-कर्माद्यैः श्रुतिमनुसरन्ती स्मृतिरिह,
प्रशस्याऽऽस्ते तद्वत् पतिपथमयन्ती प्रियतमा।
सदा श्लाघ्या पत्नी भवति परितो निर्मलयशाः,
शुभं पातिव्रत्यं जगति च तदीयं विजयते॥२४॥

सन् १९३१ ई० वत्सरस्य जनवर्याः समाप्तेरासन्नेषु दिवसेषु श्रीमोतीलालनेहरूणां स्वास्थ्यमतीव क्षीणमभूत्। तेऽद्यश्वस्तना अतिथयोऽवालोक्यन्त। श्रीमती कमला-श्रीजवाहरलाल-श्रीगान्धि-रणजीत(श्रीमत्या विजयालक्ष्म्या भर्तारः) — महोदयास्तथा काङ्ग्रेस-कार्यकारिण्याः सर्वेऽपि कार्यकर्तारः सदस्याः कारातो विमोचिताः। श्रीमोतीलालमहाभागा उपविश्य सर्वेषां स्वागतमकार्षुः। यद्यपि तेऽतितरां व्यथमाना अवर्तन्त परमपारेणात्मबलेन ते सर्वैः सह शक्तिपूर्वकं सम्भाषणान्यकुर्वन् तथा तदा ते पूर्णतया सचेतना आसन्।

न पुरो देवदूतानामग्रे मृत्योश्च मानवः।
शिरो नमयते किन्तु क्षीणेच्छा नमयत्यरम्॥२५॥
यावत् स्वस्थः सशक्तो भवति हि मनुजः पूर्णरूपेण तावत्—
तस्याग्रे देवदूतः स्वयमपि च यमो हन्त! तुच्छत्वमेति।
इच्छाशक्तेः श्लथत्वान्नमयति सहसा स्वं शिरः क्षीणकायो,
नो चेत् स स्वीयशक्त्या कथमपि मनुते नो पराभूतिमन्तः॥२६॥

१९३० ई० वर्षस्य फरवरीमासे षष्ठे दिने श्रीमतां मोतीलालनेहरूणां स्वर्गमनमभूत्। तस्मिन् महति शोके श्रीगान्धिमहाभागाः श्रीमतीं स्वरूपरानीमसान्त्वयन्। सर्वोपि नेहरूपरिवारस्तेषां महीयसां पितृणां पितामहानां राष्ट्रस्य परमभक्तानां साहसशालिनां कर्मठानां विद्या-वैभवसम्पन्नानां चिर-वियोगाद् भृशं दुःखितोऽभूत्। आनन्द-भवनस्य स आनन्दो यस्तेषामुन्मुक्तेनाट्टहासेनाभूत्, कदापि न गुञ्जनं प्राप्स्यतीति स्मारं स्मारं स कमप्यनिर्वचनीयं विषादमनुभवति स्म। आसीदवश्यमियान् सन्तोषो यत् ते नेहरूपरिवाराय तथा सकलेभ्यो देशवासिभ्यः साहसस्य तथा दुर्बलतायाः समक्षमनवनत-शिरस्कत्वस्यातीवगौरवशालिनीमुत्तराधिकारसम्पदं विमुच्य प्रयाताः।

श्रीजवाहरलालनेहरूमहाभागा २९ अप्रैल १९३१ ई० दिने प्रियायै पुत्र्यै इन्दिरायै तां सान्त्वयन्तः पत्रमेकमलिखन् —

"वयंताननुशोचामस्तथा प्रतिपदं तेषामभावमनुभवामः। दिनानि व्यतीयन्ते, परं न तु दुःखं न्यूनं सत् प्रतीयते न वा तेषां वियोगस्यासहनीयता। किन्तु पुनरहं विचारयामि यदस्माकमीदृशमाचरणं कदापि तेभ्यो नारोचिष्यत। ते कदाप्येतेन प्रसन्ना नाभविष्यन् यद् वयं दुःखेन शिथिला भवेम। ते त्विदमेवान्यभालयिष्यन् यद् यथा तैः स्वेषां काठिन्यानां साम्मुख्यं विहितं, वयमपि तथैव कुर्याम तथा तेषु विजयं प्राप्नुयाम। त इदमेवावाञ्छिष्यन् यद् वयं तेषामपूर्णानि मुक्तानि कार्याणि प्रवर्तितानि रक्षेम। यथा कार्यमस्मानाह्वयति तथा भारतस्य स्वतन्त्रताया विषयोऽस्माकं सेवा अपेक्षते, वयं मौनाः कथं स्थातुं शक्नुमः, किञ्च व्यर्थस्य शोकस्य समक्षं शिरांसि कथमवनमयितुं प्रभवामः? अस्मा एवोद्देश्याय तैः प्राणा उत्सृष्टाः। अस्मा एवोद्देश्याय वयं जीवनं धारयिष्यामः प्रयस्यामश्च, किञ्च यद्यावश्यकता भविष्यति तदा प्राणानपि दास्यामः। अन्ततो वयं तेषां सन्ततयः स्मस्तथाऽस्मासु तेषां तत्परतायाः शक्तेर्दृढनिश्चयस्य च कश्चनांशः स्थितोऽस्त्येव।"

इदं सन्ततेरुज्ज्वलं सन्ततित्वं, सदा पूर्वजानां श्रयेत् साधुमार्गम्।
तथा तैः समारब्धकार्यस्य पूर्त्यै, स्वकं जीवनं योजयेत् सर्वथैव॥२७॥

[५]

कान्ति-कला

निष्ठा-श्रमाभ्यां विलसन्ति कान्तयः[1]

काण्डा॑त् काण्डात् प्ररोह॑न्ती परु॑षः परुषस्परि॑।
एवा नो॑ दूर्वे प्रत॑नु सहस्रे॑ण शतेन॑ च ॥ (यजु० २०।१३)

स्वच्छे मानस-मन्दिरे सरुचि या शिक्षाऽर्ज्यते शैशवे,
सा स्थैर्येण समग्रजीवन-विधौ दत्ते सहायं सदा।
सैवान्तः प्रतिबोधनेन परितो जिज्ञासितुं प्रेक्षितुं,
प्राप्तुं चिन्तयितुं परीक्षितुमपि[2] प्रेरत्यलं मानवम् ॥१॥

यतः कुतोऽपि सम्प्राप्तं, ज्ञानं ज्ञानाय कल्पते।
पितृभिः प्रियदर्शिन्या, पत्राचारात्तदर्जितम् ॥२॥

इन्दिरा कतिचिद् दिनानि देहलीस्थिते **'कान्वेण्ट-विद्यालये'**ऽपठत्। ततः परं भूयोऽपीलाहाबादस्यैकस्मिन् विद्यालये पठितुमारभत। एवं सत्यपि तस्याः शिक्षणे नैरन्तर्यं नासीत्। श्रीजवाहरलालमहाभागाः कारागृहात् पत्राण्यालिख्येन्दिरायाः शिक्षा-पूर्तेः प्रयासमकुर्वन्। तस्या विचारेभ्यो ज्ञानाय च दिग् दर्शितुं तैरिन्दिराया दशमवर्षग्रन्थेर्दिनादेव पत्रलेखनं प्रारब्धम्। तेषां पत्राणां सङ्कलनं **'पिता के पत्र, पुत्री के नाम'** इति नाम्ना पुस्तकरूपेण प्रकाशितम्। तेषु पत्रेषु जीवनस्य व्यावहारिकं तथा सैद्धान्तिकं पक्षद्वयमाश्रित्य शिक्षाप्रदानाय प्रयतितम्।

यदा च श्रीजवाहरलालमहोदया गृहे निवसन्ति स्म तदा प्रामुख्येन भूयांसं कालमिन्दिरया सहैव यापयन्ति स्म। यदेन्दिरा कमपि प्रश्नमुपास्थापयत् तदा तस्यै ते यदावश्यकममन्यन्त तस्य वर्णनं विवेचनं च कर्तुं प्रवर्तन्ते स्म। तेषां भूयसीषु वार्तासु काश्चन स्मृतावतिष्ठन् काश्चन च विस्मृता अप्यभवन्। इयमेव स्थितिः पुस्तकानां वाचनेऽप्यासीत्। सा यानि पुस्तकान्यवाचयत् तेषां स्वज्ञानानुसारं सारमजानात् किन्तु वास्तविकमर्थं तदीयाः पितरः पत्रैरबोधयन्। तस्याः पितामहास्तथा पितर उभावपि यादृशी शिक्षा तस्यै दीयते स्म तया सन्तुष्टा नासन्, अतस्ते स्वाध्यायार्थं भूयोभूयोऽकथयन्। यदा कदा तु समग्रोऽपि परिवारः समूहशोऽपठत्। कदाचिन्नाटकवाचनमचलत तदा प्रत्येकं जनः पृथक् पृथक् पात्रस्य संवादमश्रावयत्। पुस्तकेषु प्रत्येकं जनो भिन्न-भिन्नमध्यायं प्रकरणं वाऽवाचयत्।

श्रीजवाहरलालाः प्रायः सायङ्कालेषु गृह एव स्थित्वा प्रत्यहं रामायण-महाभारतादीनां वाचने रुचिमवर्द्धयन्। **तेषां संस्कृतभाषां प्रति गभीरा रुचि-**

---

१. कान्तिरूपाः सात्त्विका अलङ्काराः। २. प्र+ईरतीत्यस्य रूपम्।

रासीत्, श्रीमती कमला तु तां शिक्षितुमपि प्रावर्तत ।

> **स्वाध्यायात् समुदेति भूरि-विषयज्ञानं समन्तात् स्वतः,**
> **स्वात्मा बोद्धुमपीहते स्वयमथो ज्ञात्वा निदिध्यासति ।**
> **अन्तर्बोध-समन्वितस्य पठितुः शस्ता मतिर्जायते,**
> **दृष्टिर्व्यापकतां भजत्यविरतं क्षुद्रा मतिर्नश्यति ॥३॥**

इत्थमेव तस्याः पितरो दैनिके व्यायामे श्रद्धावन्तोऽप्यवर्तन्त तस्मादेव त इन्दिरां धावनाय, सलिले तरणायाश्वारोहणायान्येभ्यः शारीरिकव्यायामेभ्यश्च प्रैरयन् । यदा सा विश्रामक्षणेष्वस्थात् तदा कृषि-महाविद्यालयस्य प्राचार्य **'सैम हिगिन बाटम'**महोदयस्य गृहे तेषां पत्न्या सहामरीकातोः भारतीयबालकेभ्यः प्रेषितानि वस्त्राणि क्रीडनकानि पुस्तकानि च व्यवास्थापयत् । तेष्वेव दिवसेषु यदा-कदा मिलितुं **श्रीलालबहादुरशास्त्रिणो**ऽप्यानन्दभवनमागच्छन्ति स्म ।

श्रीजवाहरलालमहोदयाः स्वां पुत्रीमितिहासस्य रसमास्वादयितुं वाञ्छन्ति स्म तस्मात् कारणाद् विश्वस्य सर्वासां प्रमुख-घटनानाम्—'आदिमानवादारभ्य वर्तमानसभ्यतां यावत्' सकलं वर्णयन्ति पत्राणि द्वितीय-भागरूपेण 'नैनी'-स्थात् कारागाराल्लिखितुं प्रावर्तिषत । संसारेण कथं शनैः शनैः परं निश्चितेन रूपेणौन्नत्यं प्राप्तम्, विश्वस्य प्रारम्भिकाणां सरलानां जीवानां स्थानेऽधिकमुन्नता जटिला जीवाः कथमायाताः कथञ्च सर्वान्ते जीवानां शिरोमणिर्मनुष्य उत्पन्नस्तथा स्वस्या बुद्धेः शक्त्या विजयं प्राप्नोद्-इति सर्वं तस्यै लिखितम् ।

इन्दिरा पितृपादानामिमानि पत्राण्यतितरां स्नेहेन वाचयित्वा ज्ञानं कर्मप्रेरणां च लभते स्म । तेष्वेव पत्रेषु तस्यै पुस्तकालयस्य पुस्तकानां वाचन-प्रेरणाऽप्यभवत् । यदा-कदा यथाप्रसङ्गं तस्यै भाविनो जीवनस्य विषय उपदेशाः कदाचिज्जन्मदिनादि-प्रसङ्गेषु शुभकामनाः कर्तव्योपदेशाः स्वास्थ्यसंरक्षण-सन्देशा अपि तेष्वदीयन्त । इयं प्रवृत्तिः १९३० ई० वर्षादारभ्य १९३३ ई० वर्ष-पर्यन्तं प्राचलत् । तस्मिन्नन्तराले तैः १९६ पत्राणि लिखितानि यानि वास्तविक-रूपेण मार्गदर्शकान्यभूवन्, येषां च प्रकाशेन प्रियदर्शिन्या भाविजीवनं न केवलमालोकितमेवाभूदपि तु तस्मिन् सिन्धु-तुल्यं गाम्भीर्यं तथा हिमालय-समानं स्थैर्यं धैर्यञ्चापि पूरितम् । तानि सर्वाणि पत्राणि हिन्द्यनुवादरूपाणि **'विश्व इतिहास की झलक'**-नाम्ना मुद्रितानि ।

> **कारा-प्रकोष्ठाल्लिखितानि तानि, पत्राणि पुत्र्यै प्रहितानि नूनम् ।**
> **आसन् क्षितावद्भुतरूपकाणि, शिक्षाप्रदातॄणि शुभावहानि ॥४॥**

श्रीजवाहरलालमहाभागानां देशप्रेम, कर्तव्यपरायणता, सूक्ष्मं चिन्तनं, प्रियदर्शिन्याः सुताया इन्दिराया विषये च भाविन्य आकाङ्क्षाः कीदृश्य आसन्निति

परिज्ञानाय पत्रमेकं परिशीलनायेत्थं विद्यते —

प्रिये तनये,

'यस्मिन् वर्षे त्वदीयं जन्माभूत्—'अर्थात् १९१७ ई० वर्षे' स इतिहासस्यैकः प्रसिद्धो वर्षो विद्यते । अस्मिन्नेव वर्षे एकेन महता नेत्रा, यस्य हृदये दीनेभ्यो दुःखितेभ्यश्चातीव स्नेहः समवेदना चावर्तताम्, स्वकीयदेशवासिनां हस्तैरीदृशमुन्नतं कार्यं कारितं, यदितिहासेऽमरं भविष्यति। तस्मिन्नेव मासे, यस्मिन् त्वमुत्पन्ना, लेनिनस्तां महतीं क्रान्तिमारभत, यथा रूसस्य साइबेरियादेशस्य च काय-परिवर्तनमभवत्। किञ्चाधुना भारतेऽप्येकेनान्येन महता नेत्रा, यस्य हृदये सङ्कटे निपतितेभ्यस्तथा दुःखितेभ्यो जनेभ्यो वेदनाऽस्ति तथा च यस्तेषां साहाय्यार्थं विकलो विद्यते; अस्माकं देशवासिषु महते प्रयत्नायोच्चबलिदानाय च नवीनाः प्राणाः पूरिताः सन्ति, येनास्माकं देशः पुनः स्वतन्त्रो भवेत् तथा क्षुधिता दीनाः पीडिताश्च जनाः स्वेष्वारोपितेन भारेण मुक्ति प्राप्नुयुः।······भारतेऽद्य वयमितिहासं रचयामः। वयं तथा त्वम्, अतीवसौभाग्यशालिनः स्मो यत् सर्वा घटना अस्माकं नेत्राणां समक्षमेव सम्पद्यन्ते किञ्चास्मिन् महति नाटके वयमपि पात्रतां भजामः।···

'अहं गदितुं न शक्नोमि यत्—अस्माकं दायित्वे कीदृशं कार्यमागमिष्यति ?; परं यदपि कार्यमागमिष्यति तदाऽस्माभिरिदं स्मर्तव्यं यद् वयमीदृशं किमपि न करिष्यामो येनास्माकमुद्देश्येषु कलङ्क आपतेदस्माकं राष्ट्रस्य च दुष्कीर्तिः प्रसरेत्। सत्यं किमस्ति किञ्चासत्यं विद्यत इति निर्णयस्य कार्यं न भवति सरलं कर्म। अतो यदापि त्वं शङ्किता भवेस्तादृशे समयायाहं त्वामेकां स्वल्पीयसीं निकषोपलिकां दर्शयामि। सम्भावये तया तुभ्यं साहाय्यं मिलेत् !, किमपि कार्यं त्वं गुप्तं मा कार्षीः किञ्च नैतादृशं किमपि कार्यमकार्षीर्यदन्यैर्गोप्यं प्रतीयेत; यतो हि गोपनेच्छायास्तात्पर्यं भवति यत् त्वं बिभेषि तथा भीतिर्नामातीवारुचिपूर्णा वार्ताऽस्ति किञ्च तव सम्मानेन विपरीता वर्तते···।

प्रियसुते ! सम्प्रत्यहं त्वत्तो विदायं गृह्णामि, शुभकामनाञ्च करोमि यत् त्वं युवतिर्भूत्वा भारतस्य सेवार्थमेका शूराऽऽरक्षिका भवेः।"

हृदयेन यदीप्स्यते मुदा, स्वजनैरुन्नतिकामनान्वितम् ।
विषमेऽवसरेऽपि सर्वथा, सफलं तद् भवतीह निश्चितम् ॥५॥

"तत एवेन्दिरा तारुण्यकाले भारतस्य सेवार्थमेका शूरवीराऽऽरक्षिकाऽभूत्।" इति।

अनुकूलानां परिस्थितीनामभावे सत्यपि प्रयास इन्दिराया विद्यालयीया शिक्षा नियतत्वं न प्राप्नोति स्म, तेन चिन्तिताः श्रीनेहरूमहाभागाः स्वकीयस्य

71

वकीलाभिधस्य मित्रस्य सम्मत्या तथा श्रीगान्धिमहाभागानां प्रेरणयाऽऽग्रहेण च पुण्यपत्तनस्थ एकस्मिन् राष्ट्रियभावनाशालिनि **'प्यूपिल ऑन स्कूल'**-नाम्नि विद्यालये प्रियां पुत्रीमिन्दिरां प्रावेशयन् । तत्र साऽध्ययनेन सहैव सांस्कृतिकेषु कार्यक्रमेषु तथा क्रीडा-प्रवृत्तिषु भागं गृह्णाति स्म । नाटकेष्वभिनयमपि करोति स्म। प्रारम्भादेव सङ्घटनवृत्त्या नेत्रीत्वस्य गुणैश्च विद्यालयस्य संसदः प्रधानत्वमपि तया प्राप्तम् । बहुश्रुतत्वं बहुभाषावित्त्वं तथा कुशाग्रबुद्धिमत्त्वं च तां शिक्षकेषु तथा छात्रच्छात्रासु प्रियतां प्रापयन् । सन् १९३२ ई० वर्षे यरवदा-कारागारे स्वीयाभिः पितृष्वसृसुताभिः सह सा महात्मभिः श्रीगान्धिभिरपि मिलितुमगमत् । श्रीगान्धिनश्चतसृणामपि कन्यकानां स्वास्थ्य-सौमनस्ययोर्विषये श्रीजवाहरलालेभ्यस्तडित्सन्देशमपि प्रैषयन् । सन् १९३३ ई० वर्षस्यारम्भे श्रीमती विजयलक्ष्मीः कृष्णा च कारातो विमुक्ते । प्रथमं ते मात्रा सह कलकत्तानगर्यामुपचाराय स्थितवतीं श्रीमतीं कमलां द्रष्टुं गते । ततः परमिन्दिरां कन्यकाश्च विलोकयितुं पुण्यपत्तनमपि गतवत्यौ ।

९ अगस्त १९३३ ई० दिने श्रीजवाहरलालनेहरूभिर्वर्षद्वयस्य दण्डावधेरासन्नसमाप्ताविन्दिरायै शिक्षामालाया अन्तिमं पत्रं प्रेषितं किञ्च तस्योत्साहपूर्णायां पूर्णाहुतौ तैर्विश्वसौन्दर्यस्य प्रशंसा साहसस्य सहानुभूतेर्भावना विचारैः सह कर्मणोऽपि दासत्वस्वीकृतिरित्यादयो विषयाः प्रबोधिताः ।

❑ न मातुः पर-दैवतम्

मातुः कृपामृतसरित् परमोपकर्त्री, हर्त्री समस्तविपदां मनुजस्य नित्यम् ।
या जीवनस्य विपिनं परितोऽभिषिच्य, सर्वांस्तरून् दल-सुमैः सफलीकरोति ॥६॥

निष्ठा-वीरता-कष्ट-सहिष्णुतानां प्रतिमूर्तिः श्रीमती कमला स्वदेश-सेवायामियती तत्पराऽवर्तत यत् सा रुग्णावस्थायामपि कर्तव्यमविस्मरन्ती सत्याग्रहेषु सहभागितां नाजहात् । जनपद-समितेराध्यक्ष्यं वहन्ती प्रायो ग्रामाद् ग्रामं भ्रान्त्वा जनानुदबोधयत् । कारासु दीयमानानि कष्टानि निर्विरोधं तानि स्वाभाविकानीति मत्वाऽसहत । इत्थं तस्या रोगं प्रत्युपेक्षा स्वास्थ्यं प्रत्यनुत्साहिता तथा कर्तव्यं प्रति जागरूकता निरन्तरश्रमनिष्ठा चान्तरेवान्ता रोग-विवृद्धेः कारणतां प्राप्नुवन् । श्रीजवाहरलालनेहरूणां च प्रायः कारावासादुपचारेऽपि शैथिल्यमेवाभवत् ।

सन् १९३३ ई० वर्षस्य तृतीये चरणे द्विवार्षिकं कारावासावधिं समाप्य गृहमागतैः श्रीनेहरूमहाभागैः पारिवारिक्या एकस्या नवीनायाः समस्यायाः समाधानं विहितम् । ते भगिन्याः कृष्णायाः रुच्यनुसारं निर्णीतस्य भाविनः पत्युः

श्रीहठीसिंहाभिधस्य सर्वां स्पृहणीयां समुचितां स्थितिं विज्ञाय तेन सह कृष्णाया विवाहविधानमानन्द-भवने २० अक्टूबर १९३३ ई० दिने सम्पादितवन्तः।

श्रीमत्याः कमलाया उपचार-प्रसङ्गेन १९३४ ई० वर्षस्य प्रथमे मासे चिकित्सकैः परामृष्टुं श्रीजवाहरलालनेहरूणां तथा सह कलकत्तानगर्यां गमनमभूत्। कलकत्तातस्ते श्रीरवीन्द्रनाथठाकुर-महाभागैर्मिलितुं तथा तैः स्थापितं विश्व-विद्यालयं च द्रष्टुं शान्तिनिकेतनं गताः। तत्रत्यां व्यवस्थां वातावरणं राष्ट्रियता-ञ्चालोक्य ते कुमारीमिन्दिरां तत्रैव प्रवेश्य पाठयितुं निरचैषुः।

पुण्यपत्तनस्य 'प्यूपिल्स ओन विद्यालय'स्यास्यावासेन्दिरा वर्षत्रयं याव-न्नियमितमधीत्य पूर्णतो लाभान्विताभवत्। १९३४ ई० वर्षे सा दशमीं कक्षा-मुत्तीरितवती। शान्तिनिकेतने प्रविश्य सा तस्यान्ताराष्ट्रियस्वरूपानुरूपं साहित्य-सङ्गीत-कलानृत्येषु विशिष्याकृष्टाऽभवत्, समस्तस्य विश्वस्य छात्रा-श्छात्र्यश्च तत्राध्ययनार्थमायान्ति स्म। संयतं सारल्यपूर्णं च तत्रत्यं जीवन-मासीत्। विद्यार्थिनः स्वयं मार्जनमन्यानि च गृहकार्याणि कुर्वन्ति स्म। इन्दिराया अभिरुचिः कलायां नृत्ये चावर्तत। तया श्रीरवीन्द्रमहाभागानामेकस्यां नाटिकाया-मेकाकि-नृत्यमपि तेषामुपस्थितौ वसन्तोत्सवे वासन्तिकानि वस्त्राणि परिधाय विहितम्। नृत्य-चित्रकलयोर्गुरवः श्रीनन्दलालवसुमहोदया आसन्। इत्थं साहित्य-सङ्गीत-कलादिभिः सहाध्ययन इन्दिराया मनोऽन्वरज्यत। यतः —

साहित्यं विविधाभिरुन्नतविधा-विद्याभिरालोकितं,
साकं तेन च नृत्य-गीत-रचना-वाद्यादिभिः सङ्गतम्।
कौशल्यं कलयाऽन्वितं यदि भवेच्छिक्षाविधौ प्रोन्नतं,
तेनात्राशु विकासमेति पठितुः सार्वत्रिकं जीवनम् ॥७॥

शान्तिनिकेतनेऽधीतवत्या इन्दिरायाः प्रथमवर्षावधिपूर्तेः पूर्वमेव सहसा-ऽध्ययन-त्यागस्य कारणमुपेतम्। श्रीमत्याः कमलायाः स्वास्थ्यमतीव चिन्तनीय-मभूत्। चिकित्सकाः शार्मण्यदेशस्य 'बेडनवीलर'-नाम्न्यारोगधाम्न्युपचाराय सम्मतिमदुः। श्रीजवाहरलालास्तदा बन्दीगृह आसन्। अत एव मात्रा सहेन्दिराया विदेशगमनमत्यावश्यकमभूत्। मातुः परिचर्यायै सन् १९३५ ई० वर्षे शान्ति-निकेतनस्य सुखदं वातावरणं विमुच्येन्दिरा यदाऽगमत् तदा श्रीनेहरूभ्यः पत्रेण सन्दिशद्भिः श्रीगुरुवरैर्लिखितम् —

"खिन्नेन मनसैवास्माभिरिन्दिरायै विदायो दत्तः, यतः साऽत्रास्मभ्यमती-वोपयोगिनी सिद्धा भवति स्म। अहं तामतीव ध्यानेनावालोकयं किञ्च भवद्भि-र्येन प्रकारेण तस्या लालनं पालनञ्च विहितं तदतीव श्लाघ्यं विद्यते। तस्याः सर्वेऽपि शिक्षका एकेन स्वरेण तां श्लाघयन्ति तथा छात्रसमुदायस्यापि साऽत्यन्तं

स्नेहभाजनमभूत्। आशासे यत् सर्वं शुभमेव भविष्यति सा चात्र शीघ्रं प्रत्यागमिष्यति।" इति

स्वीये जीवने शान्तिनिकेतनस्य योगदानमिन्दिराऽङ्गीकुरुते स्म, यतः श्रीरवीन्द्रनाथमहाभागास्तां कलया कवितया च स्नेहसम्पादनमशिक्षयन्।

सन् १९३६ ई० वर्षस्य २८ फरवरी-दिने श्रीमती कमला **'लोजान'**स्यैकस्मिन्नारोग्यसदने स्वीयं नश्वरं शरीरं विहाय दिवमगमत्। लोजान एव तस्या दाहसंस्कारोऽभूत्। मृत्योः समये श्रीजवाहरलालमहोदया इन्दिरा श्रीफीरोजश्च तस्या निकटेऽवर्तन्त।

इन्दिरा मातृ-वियोगशोकं सोढुं पार्येत, अनया दृष्ट्या श्रीजवाहरलालास्तां सुरम्य-कुल्याभिः सम्भूषिते 'माण्ट्रयू'-स्थलेऽनैषुस्तत्र च कियन्तिचिद् दिनानि स्नेह-सिक्तैरालापैर्बोधयन्तस्तस्या मनोऽसान्त्वयन्। ततः परं 'बेक्स'-स्थिते विद्यालये साऽध्येतुं गतवती श्रीजवाहराश्च भारतं वायुयानेन परावृत्ताः।

कालः स्वां कलनां विधाय विषमां हंहो! विधत्ते स्थितिं,
लोकानां न विलोकते विषमतां नो वा हितं वाञ्छति।
इत्थम्भाविनि तादृशेऽपि समये कर्तव्यमार्गे रता,
नो मुञ्चन्ति गतिं रतिञ्च पुरतो वर्धन्त एवानिशम्॥८॥

□ चलाचला जीवन-सागरोर्मयः

जीवनं मानवस्यास्ति, विशालं सागरोपमम्।
ऊर्मयस्तस्य खेलन्ति कृतिरूपाश्चलाचलाः॥९॥

'बेक्स'स्थिते विद्यालये पठन्तीन्दिरा विद्यालयस्यैकस्यां शैक्षणिकयात्रायाम्- **'इटली'** देशं गता। सा यात्रा 'कलाया इतिहास' इति पाठ्यविषयस्यैकाऽङ्गभूता यात्राऽवर्तत। तत्र सा प्रमुखानि तत्रत्यानि नगराणि सङ्ग्रहालयांस्तथाऽन्यानि दर्शनीयानि स्थलान्यवालोकयत्। ततः परावृत्य च सा स्वस्य भविष्यतः प्रश्नमचिन्तयत् -'अहं पठनाय क्व गच्छेयं **'सारबोन'**-नगरमथवा- **'आक्सफोर्ड'**-विश्वविद्यालयम्? श्रीजवाहर-महाभागानां विचारोऽभूद् यत् सा स्वपरिचित इङ्लेण्ड-देशं गच्छेद् यतस्तत्र तेऽधिकान् जनान् परिचिन्वन्ति स्म, तेन तस्याः सौविध्य-सम्पादने सारल्यं भविष्यतीति। एवं सत्यपि साऽऽक्सफोर्ड-विश्वविद्यालय एवाध्येतुं मनसि निरचैषीत्। तस्य विश्वविद्यालयस्य परीक्षार्थमध्ययनमपि तया स्वयमेव प्रारब्धम्। इङ्लेण्डं गन्तुं निर्णीतवत्यास्तस्याः परिचयः कुमार्या **'बेकार'** महोदयया सञ्जातः। सा हि **ब्रिस्टलस्थस्य 'बैडमिण्टन-विद्यालय'स्य** प्रधानाध्यापिकाऽऽसीत्। तस्या एव सम्मत्यनुसारमिन्दिरा तत्र गता तस्मिन् विद्यालये प्रविश्य च आक्सफोर्डस्य परीक्षायामपि सा प्राविशत्।

तेषु दिवसेषु **श्रीफीरोजगान्धी'** इङ्लेण्ड एवावात्सीत् । अध्ययनार्थमिन्दिराया आक्सफोर्डस्य चयने कारणमिदमप्यासीत् । सा तं मित्रममन्यत । स चेन्दिराया भारतस्य नेहरूपरिवारस्य च मध्य एकं योजकशृङ्खलाङ्गमवर्तत। इन्दिरा व्यचारयद् यद् यद्यहं पेरिसनगरे स्थास्यामि तदा सर्वैर्विच्छिन्नेव भविष्यामि तदपेक्षया भारतस्य घटनानां ज्ञानमिङ्ग्लैडे विशिष्य प्राप्स्यामीति ।

श्रीफीरोजगान्धिना सहेन्दिरायाः परिचय इलाहाबाद एवाभवत् । तस्मै काङ्ग्रेस-सेवाया दीक्षां श्रीमोतीलालनेहरूमहाभागा एवादुः । स हि राष्ट्रियान्दोलने सम्मिलितः सन् प्राय आनन्दभवनमागच्छत् । यदा श्रीमती कमलानेहरूर्जनपदसमितेरध्यक्षत्वेन प्रचाराय विभिन्नेषु ग्रामेष्वटति स्म तदा तदीय-सेवा-गुणगणाभिभूतभक्त इव स तस्यै प्रतप्तपेय-प्रातराशादिसाधनसमन्वितां करण्डिकां नीत्वा तया सह व्रजति स्म । पारसीक-परिवारस्यायं किशोरः श्रीमत्याः कमलाया उपचारार्थं यूरोपस्थितिसमयेऽपि सहायकोऽवर्तिष्ट । मातुश्चिन्तया व्याकुलत्वमनुभवन्त्या इन्दिरायै स महानाश्रयरूपः समपद्यत । मातुर्निधनानन्तरं प्राय एकवर्षावधिककालस्यान्तराले विंशति-वर्षदेशीयायाः कुमार्या इन्दिराया मैत्रीसम्पर्कः श्रीफीरोजगान्धिना सह क्रमशो वृद्धिमगमत्। तदानीं श्रीफीरोजगान्धी **'लन्दन स्कूल आफ इकनामिक्से'** पठन्नासीत् ।

ब्रिस्टलानन्तरमिन्दिरा आक्सफोर्डस्य **'समरबिले'**-महाविद्यालयेऽध्येतुं प्रावर्तत। परं तस्याः शोणिते राजनीतिः संश्लिष्टाभूदतः सा तस्याः पृथगात्मानं रक्षितुं नाशक्नोत् । सा यदापि लन्दनं गच्छति स्म तदा **'इण्डिया-लीग'**- सम्बद्धं कार्यमकार्षीत् । 'इण्डिया-लीग'स्य सञ्चालकस्तदानीं श्री'कृष्ण मैनन्'-महोदय आसीत्। इन्दिरा स्वपितॄणां मित्रत्वेन श्रीमन्तं कृष्णमैनन्महोदयं स्वस्याः सम्मान्यं परामर्शकं मनुते स्म । इङ्ग्लैण्ड एव सा **'लैबरपार्टी'**तः सम्बद्धाऽभवत् तथा तस्याः समारोहेषु सम्मिलितुं प्रावर्तिष्ट । इन्दिरायाः परिचयस्तत्र—**'अर्नेस्ट बेविन'**-महोदयेन तथा प्रसिद्धेन राजनीतिक-चिन्तकेन **'हेराल्ड लास्की'**-महोदयेनाप्यभूत् । तत्रैवेन्दिरा कदाचिद् भारतस्य **'स्पेन-सहायता-समितये'** कदाचिच्च **'चीन-सहायता-समितये'**—(ययोरध्यक्षाः श्रीजवाहरलालमहाभागा एवासन्) —साहाय्यद्रव्य-सङ्ग्रहणमकार्षीत् । सा स्पेनवासिन्याऽभिनेत्र्या **'लापेशोनारिया'**-महाभागया मिलितुमपि लन्दनं गच्छति स्म ।

विश्वस्मिञ्जगतीतले विचलिता देशा भृशं पीडिताः,
शास्तॄणाञ्च निरङ्कुशां दमनकृद्वृत्तिं विनाश्यात्मनः ।
स्वातन्त्र्याय निरन्तरं कृतधियः सज्जा यदा तन्वते,
युद्धं तत्र हि राजनीतिपथगस्तिष्ठेत् कथं निश्चलः ? ।।१०।।

इंग्लैण्डे **'अगाथा हैरिसन'** कुमार्या इन्दिराया अभिभाविकाऽवर्तत सा हि

तस्या आवश्यकतानां पूर्तेर्दायित्वं निरवहत्। एवमेव **'हैराल्ड लास्की'**—महोदयोऽपि तस्याः सौविध्यान्यपश्यत्। इंग्लैण्ड एवेन्दिराया द्वितीया सखी **'शान्ता गान्धी'**-नाम्नी भारतीया कन्याऽऽसीद् या हि पुण्य-पत्तनस्य 'प्यूपिल्स ऑन विद्यालये' तदीया सहपाठिन्यासीत्। उत्कटाद् राष्ट्रानुरागादतिरिक्तं तयोरन्येषु बहुषु विषयेषु साम्यमभूत्। इन्दिरावदेव शान्तापि भारतीयं नृत्यमजानात् तथा स्पेनदेशस्य साहाय्यार्थं विधीयमानेषु कार्यक्रमेषु सा प्रायेण नृत्यति स्म। इन्दिरा तदा शुल्क-पत्राणां विक्रयणे तथाऽन्येषु साहाय्यकर्मसु तस्याः सहयोगमाचरति स्म।

अनेकैर्यूरोपवासिभिः सह श्रीजवाहरलालनेहरूणां मैत्र्यवर्तत तस्माद् इन्दिरया सहापि स्वं सम्बन्धं वर्द्धयितुं भूयांसो ज्येष्ठाः श्रेष्ठाश्च जनास्तत्रायान्ति स्म। आक्सफोर्ड एव पठन्तीन्दिरा **'अर्न्स्ट टालर'** महोदयेन तदीयया पत्न्या श्रीमत्या **क्रिस्टाइन**-महोदयया सह (याभ्यां पुरा सा १९२७ ई० वत्सरे स्विट्जरलैण्डे मिलितासीत्) स्वीयं परिचयं पुनर्नव्यं व्यदधात्। श्रीटालरस्य विचारा गहनया मानवतया स्वातन्त्र्यप्रेम्णा चोतप्रोता अवर्तन्त। तदीये **'मनुष्यो जनता च'** (मैन एण्ड दी मासेज) नाम्नि नाटके हिंसाया विरुद्धं मानवात्मनां सङ्घर्षोऽङ्कितो विद्यते। हिटलरस्यातङ्काज्जर्मनीतः पलाय्य शरणार्थित्वेन समायातस्य तस्य नेत्रयोर्गहना पीडा व्याप्नोत्। इन्दिरां प्रति तयोः प्रेमातितरां दृढमासीत् तच्च श्रीमद्भ्यो जवाहरलालेभ्यः क्रिस्टाइनमहोदयया लिखितात् पत्रात् प्रकटितं भवति। तस्मिंल्लिखितमासीत्।

न सुन्दरी केवलमिन्दराऽस्ति, साऽऽस्ते पवित्राऽपि तथैव हृद्या।
मनः प्रसक्तिं भजते नितान्तमालोकनादेव सुखेन तस्याः॥११॥
सा दृश्यते कोमलपुष्पतुल्या, यद् वायुरुड्डाययते सहेलम्।
मदीयचित्ते किल चिन्तयेऽहं, न सा ततः किन्तु बिभेति वायोः॥१२॥

श्रीजवाहरलालनेहरूणां मनः पूर्णतया काङ्ग्रेसस्य गतिविधिषु प्रसक्तमासीत्। १९३६ ई० वत्सरे ते पुनरप्यध्यक्षा निर्वाचिताः। ब्रिटिशशासनं भारताय नवीनमेकं संविधानं निरमाद् यस्मिन् प्रान्तीयसभाभ्योऽत्यन्तं सामान्या अधिकारा अदीयन्त परं केन्द्राय कोऽप्यधिकारो नादीयत। काङ्ग्रेसेन तत् संविधानं न स्वीकृतं किञ्च निर्वाचनमाध्यमेन विजित्य बहुमते सति प्रान्तेषु स्वीयानां मन्त्रिमण्डलानां निर्मितये निर्णीतम्। तदनुसारमेव समग्रेषु प्रान्तेषु भ्रामं भ्रामं श्रीजवाहरलालैर्निर्वाचनयात्रा विहिताः। तादृश्यां व्यस्ततायामपि ते स्वीयामात्मीयां परमप्रीतिपात्रीं पुत्रीं न विस्मरन्तः स्वीयेषु भाषणेषु महता स्नेहेन तस्या उल्लेखमप्यकार्षुः। एकदा पठान-वंश्यानामग्रे भाषमाणैस्तैरुक्तमासीत् —

"ममैका विंशतिवर्षीया पुत्री विद्यते, या सम्प्रत्यतिदूरमिङ्ग्लैण्डे वर्तते। सा ममैकाकिनी सन्ततिरस्ति किञ्च तामहमतितरां स्निह्यामि। साहसात्मविश्वास-

निर्भीकतादिविषयांस्तां शिक्षयितुमहं प्रायतिष्ट। यदीदानीं सा मया सहावत्स्र्यत् तदा निःशङ्कमहमकथयिष्यं यत् सा भवतां प्रभागेषु गच्छेत् तैः सह मिलेत् सौहृदं च वर्धयेत्। अहमित्थमेतदर्थमेवाकथयिष्यं यदहं तस्यां विश्वसिमि किञ्च भवत्स्वपि विश्वासं धारयामि।"

श्रीजवाहरलाला निरन्तरं द्विवारं काङ्ग्रेसाध्यक्ष्यं निरवक्षन्, अतः १९३७ ई० वर्षान्ते कार्यकालसमापनानन्तरं तेऽध्यक्षपदान्निवृत्ताः।

१९३८ ई० वर्षस्यारम्भे भारतव्यापिन्या निर्वाचनयात्राया निर्वृत्य श्रीजवाहरलालमहानुभावा इलाहाबादं प्रत्यायाताः। श्रीमती कृष्णाऽपि स्वीयाभ्यां शिशुभ्यां सह तत्रायाता। इन्दिरा च विदेश एव पठन्त्यासीत्। श्रीमती विजया तदीयाः स्वामिनोऽपि स्वसन्तत्या सह तत्रागच्छन्। परमिन्दिराया अभावं पदे पदे स्मरन्तः पारिवारिकाः सर्वे नाति प्रसन्ना अवर्तन्त। तेष्वेव दिवसेषु श्रीमती स्वरूपरानी सर्वेषां सम्मिलनेनानन्दमनुभवन्त्यपि दुर्दैववशादेकस्मिन् दिवसे सायङ्काले सर्वैरालपन्त्येव सहसा मूर्च्छिताऽभूत्। शीघ्रमेव चिकित्सक आकारितः। तेनोक्तं यद् भीषणं हृदयरोगाक्रमणं सञ्जातमस्ति। समग्रायां निशि जवाहर-मातृश्वसृ-विजया-कृष्णा-प्रभृतयस्तस्याः सविधेऽतिष्ठन्। प्रातस्तस्याः स्वः प्रयाणमभूत्।

ततः परं दुःख-विह्वलायाः श्रीमत्याः कृष्णायाः समाश्लेषं प्राप्ता तदीया मातृष्वसा (बीबी अम्मा)ऽपि तस्याः शिरसि हस्तमावर्तयन्त्यकथयद् यत्—"केवलं तव मातुः कृत एवाहं जीवन्त्यासं साम्प्रतं मम कार्यं पूर्णम्" इति कथयन्ती साऽपि श्रीमत्याः स्वरूपरानी महाभागाया मृत्योरनन्तरं चतुर्विंशतिघटिकानामन्तराल एव नश्वरं कलेवरं विहाय दिवं प्रस्थिता।

शाखाप्रभेदेन भिदां श्रितापि, परस्परं सेचनसम्प्रवृद्धा।
सहैव ताभ्यां परिशोषमाप्ता, लोके प्रशस्यास्त्यनुरागवल्ली ॥१३॥
सांसारिकैर्दुःखशतैर्विपन्ना, विघ्नैरपि प्राप्तमनोऽवसादाः।
कुतोऽपि कस्माच्चिदपीह कष्टान्न कर्मनिष्ठा विरतिं भजन्ते ॥१४॥

औदासीन्यमेकाकित्वञ्चानुभवतां श्रीजवाहरलालानां मन इन्दिरां द्रष्टुमकामयत। ते जूनमासस्य द्वितीये दिने स्पेनदेशाय समुद्रमार्गेण प्रस्थिताः। ततश्च लन्दनं गता इन्दिराञ्च स्वेन सह नीत्वा यूरोपस्य सुखयात्रायै निःसृताः। यूरोपस्य तस्यां यात्रायां यत्रापि तेऽगच्छँस्तत्र, सर्वत्र हिटलरस्यातङ्को भयञ्च व्यापृते अदृश्यताम्। यहूदीनां दयनीया दशा जर्मनदेशस्य च राजनीतिक-विरोधिनां स्थितिस्तैरवलोकिता। त्रिशल्लक्षजर्मनजनवसतिशालि '**चेकसुडेटनलैण्डं**, स्वाधीनं कुर्वाणो हिटलरोऽपि दृष्टस्तथा २९-३० सितम्बर-१९३८ ई० दिवसयोः सम्पन्नाया म्यूनिख-कान्फ्रेन्सस्यापि विलोकनं विहितम्। नवम्बरमासे श्रीजवाहर-

लालमहाभागा इन्दिरां नीत्वा भारतं प्रत्यावृताः।

नवम्बरस्यान्त्यदिवसेष्विन्दिरायाः स्वास्थ्यं विकृतमभूत् तस्य कारणं यूरोपस्य सुदीर्घाः कठिनाश्च यात्राः समभाव्यन्त। पितृचरणानां सम्मत्या सा स्वास्थ्यलाभाय हिमालयस्य **'अलमोड़ा'** नगरमगच्छत् तया सह तस्याः पितृष्वसा श्रीमती कृष्णाऽपि पुत्राभ्यां सहावर्तत। पर्वतानां शान्त एकान्ते वातावरणे सुखं निवसन्ती हिमेषु क्रीडन्ती पुस्तकानि पठन्ती महापुरुषाणां विचारेषु चर्चन्ती समागतैः स्वदेश-विदेशजैः सह मिलन्ती च सा शीतकालं तत्रैव व्यत्यापयत्।

१९३९ ई० वर्षस्य मार्चमासे त्रिपुरायां काङ्ग्रेसस्याधिवेशनं समपद्यत यस्मिन् सर्वोऽपि नेहरूपरिवारः सङ्गतः। अप्रैलमासे पुनरपीन्दिराऽध्ययनार्थमाक्सफोर्डाय प्रस्थिता तत्र च सा स्वस्याध्ययने तथा महाविद्यालय-जीवनस्य सङ्गिषु सहपाठिषु च तन्मयत्वमाप्नोत्। परं १९४० ई० वर्षे तत्रत्ययोर्नीर-समीरयोरनानुकूल्याच्छैत्याधिक्याच्चेन्दिरा (प्लूरिसी) **'उरोग्रह'** नामक रोगेणाक्रान्ताऽभूदतश्चिकित्सकानां परामर्शानुसारं स्विट्जरलैण्ड उपचारायागमत् तत्र च शनैः शनैः स्वास्थ्यं रुचिरमजायत। तदानीमेवैङ्ग्लैण्डस्य नगरेषु सर्वत्र जर्मनानां प्रक्षेपास्त्रपातनैर्विपन्मयीं स्थितिं विलोक्य तत्र गन्तुमना अपि सा मनो निरुद्ध्य भारतमागन्तुं निरचिनोत्।

इतश्च भारते भारतीयजनतायाः परामर्शं विनैव वैदेशिकेन भारताधिशासकेन भारतस्य पक्षतो युद्धघोषणा कृता तद्विरुद्धं च काङ्ग्रेसेन वैयक्तिकः सत्याग्रहः प्रारब्धः। श्रीगान्धिनां निर्देशानुसारं श्रीजवाहरलाला द्वितीयसत्याग्रहित्वेन सार्वजनिकसभायां भाषितुं निर्णीताः किन्तु सर्वदावत् ते प्रागेव निगृहीता दण्डस्वरूपेण तेभ्यो वर्षचतुष्टयस्य कारावासो दत्तः। इत्थं भूयोऽपि देहरादूनस्य कारायां ते प्रापिताः।

इन्दिरा स्वनिर्णयानुरूपम् 'एण्टिबेस-बार्सीलोना-लितन'—मार्गेणागच्छन्तीङ्ग्लैण्डं प्राप्ता यत्र फीरोजगान्धिना तस्या एकस्मिन् सैनिकपोते स्थानं लम्भितं यश्च पोत **उत्तमाशाऽन्तरीपस्य** भ्रमणं विधाय भारतमागच्छन्नासीत्। मार्गे तस्याः पोतः सप्ताहं यावद् **'डरबन'** नगरे रुद्धः। दक्षिणाफ्रीकाया रङ्गभेदनीतिं जानन्तीन्दिरा पोत एव स्वस्याः स्थितिमुचिताममन्यत, परं डरबनस्था भारतीयाः श्रीजवाहरलालनेहरूणां पुत्रीं पोतस्थां ज्ञात्वा तस्याः सार्वजनिकं सम्मानं विधातुमाग्रहमकार्षुः। इन्दिरया निषिद्धे सति नगरदर्शनस्य व्याजेन तामनैषुः। सा स्वचक्षुर्भ्यां रङ्गभेदनीतेः कारणादाखेटतां-प्राप्तानां जनानां दुर्दशां विलोक्य दुःखिताभूदत एव सा स्वागतनिमन्त्रणं स्वीकृत्य तत्र महत्त्वपूर्णं भाषणमकरोत्। सा रङ्गभेदनीतेर्निन्दनेन सहैव जातीयोत्पीडनकारिणोपि धिगकार्षीत्। भारतीयानपि सा

समबोधयद् यदस्या भुवो मूलनिवासिभिर्नीग्रोजनैः सह नैकटिकः सम्बन्धोऽवश्यमेव वर्धनीय इति।

जून-मासे सा महाम्बापुरीं प्राप्ता। ततः सर्वप्रथमं पितृदर्शनाय देहरादूनं गता ततश्चानन्दभवनमुपेता। तस्याः स्वास्थ्यचिन्तया श्रीजवाहरलालमहाभागा मसूर्यां विरामाय तां प्रैरयन् सा च ग्रीष्मकालं तत्रैव सानन्दं व्यत्यगमयत्।

□ वैवाहिकं मङ्गलम्

अम्भोधिं सरिता तरुं सुलतिका चन्द्रं चिरं चन्द्रिका,
पर्जन्यं जलवालिका च भुवने संश्रित्य राराजते।
फीरोजं श्रयितुं वरं वृतवती स्वान्ते तथैवेन्दिरा—,
ऽराजत् तज्जनका व्यधुश्च मुदिता वैवाहिकं मङ्गलम्॥१५॥

मसूर्यां विरामं कुर्वतीन्दिरा स्वास्थ्यलाभेन सहैव देहरादूनस्य कारागारे वर्तमानान् स्वपितॄन् द्रष्टुं तथा तेषां नैकट्येनात्मनो विचारानवगमयितुं भावि कर्तव्यञ्च बोधयितुं प्रावर्तत। प्रसङ्गादेकदा सा श्रीफीरोजगान्धिनमात्मनो जीवन-सङ्गिनं विधातुं तेन सह विवाहं वाञ्छतीति प्राकटयत्। कुलनाम्नोपनाम्ना वा गान्धीति पदेन भूषितः श्रीफीरोजः पारसीकः प्रबुद्धो राष्ट्रसेवी स्नेहशीलस्तथा कर्तव्यनिष्ठोऽभूत्। इन्दिरा-फीरोजयोर्वैचारिकव्यावहारिक-साम्यादेव परस्परं तयोर्मैत्री प्रारम्भादेव प्राचलत्। इन्दिरायाः शान्तिनिकेतनेऽध्येतुं गमनात् प्रागेव श्रीमता फीरोजेन परिणयस्य प्रस्तावस्तदग्रे कृत आसीत् किञ्च तद्विषये तेन श्रीमत्या कमलयाऽपि वार्ता प्रवर्तिताऽभूत् परमिन्दिरया तदा स न स्वीकृतः। इन्दिरा स्वपितृभ्यां प्रसङ्गेऽस्मिन् किमपि न न्यवेदीदिति कारणात् फीरोजः कि-ञ्चिच्चिन्तितोऽप्यासीत्। यदेन्दिरा विदेशात् प्रत्यावर्तमाना पेरिसत आगच्छति स्म तदा श्रीफीरोजः पेरिसे तां मिलितुमायातः। तत्रैव 'मौं मार्त्रे'स्य सोपानेषु श्रीमतः फीरोजस्य वैवाहिकं प्रस्तावमिन्दिरा स्व्यकार्षीत् किन्तु सा तद्विषये कस्मा अपि किमपि नाकथत्।

श्रीजवाहरलालमहाभागा एतद्विषये सर्वं ज्ञात्वा मनाक् चिन्तयाना आसन्। चिन्तायाः कारणं फीरोजस्य जातेर्धर्मस्य राष्ट्रियताया वा नाभूद् यतो हि नेहरू-परिवारः प्रारम्भादेव स्वतन्त्रविचारशीलोऽवर्तत। परिवारस्य भगिन्यौ सरूप-कृष्णे काश्मीरकातिरिक्ताभ्यां विप्र-जैनाभ्यां विवाहिते आस्ताम्। पितृव्यसुते यवनाभ्यां तथैका च हंगेरियनेन परिणीता अभूवन्। किन्तु श्रीजवाहरलालानां विरोधस्य कारणानि कानिचिदन्यान्येवावर्तन्त। तत्र प्रामुख्येन प्रथमं फीरोजस्य पारिवारिक-पृष्ठभूमेस्तथाऽपरं भारताद् बहिर्निवसन्त्या इन्दिराया भारतस्या-न्यैर्युवकैः सह सम्पर्काभाव आस्ताम्। अत एव तेऽवाञ्छन् यत् सा स्वीयं निर्णयं

सम्प्रति स्थगयित्वाऽन्यान् युवकान् बोद्धुं प्रयतेत। परमिन्दिरा स्वीयं निर्णयमेव निश्चलं प्राकाशयत्। अन्ततः श्रीमत्या विजयलक्ष्म्याः श्रीमत्याः कृष्णायाश्च परामर्शेण श्रीनेहरूभिरपि स्वीकृतिः प्रदत्ता।

४ दिसम्बर १९४१ ई० दिने श्रीजवाहरलालाः कारातो विमुक्ताः। तेषां विमुक्तेः समकालमेवेन्दिरायाः फीरोजस्य च परिणयवार्त्ता बलवत्यभूत्। तयोरन्तर्जातीयं विवाहमभिलक्ष्य विरुन्धद्भिः परम्परावादिभिर्हिन्दूभिः पारसीकैश्च बहुशोऽहितसूचकानि पत्राणि प्रहितानि। श्रीजवाहरलालनेहरूभिः स्वस्याः स्थितेः स्पष्टतार्थमेकं सार्वजनिकं वक्तव्यं दत्तं यस्मिन् 'स्वीया विवाहसम्बद्धा विचाराः स्पष्टीकृताः किञ्च स्वपुत्र्या इन्दिरायाः श्रीफीरोजस्य च मिथो विहितस्य निर्णयस्यौचित्यं मत्वा स्व-स्वीकृतेराशीर्वादप्रदानस्य मन्तव्यमपि स्फुटं निगदितम्।'

महात्मनां श्रीगान्धिनां परामर्शेण प्रकृष्टोत्सवपूर्वकं परिणयस्य दिवसः २६ मार्च १९४२ ई० निश्चितः। आनन्दभवनं तद्दिने प्रसन्नताभिः पूरितमभूत्। तदतितरां सज्जितम्। श्रीजवाहरलालमहाभागाः स्वयं निरीक्षण-परीक्षणयोर्व्यस्ता आसन्। अतिविशालं पटमण्डपं वितानितम्। समग्रदेशतः प्राघुणिकाः समवेताः। के चन विदेशिनोऽपि सम्मिलिताः। इन्दिरा केशरवर्णवतीं खादीशाटिकां—या तत्पितृभिः कारावासकाले कर्तितेन सूत्रेण निर्मिताऽऽसीत् तां धृत्वा विवाहमण्डपमुपागता। शाटिकायां सङ्ग्रथितानि लघुलघूनि राजतपुष्पाणि परमरमणीयान्यवर्तन्त। स्वर्ण-रजतादीनामाभरणस्थाने सा पुष्पैरेवालङ्कृताऽऽसीत्। शान्ता गभीरा च सा मुखमण्डलेनातीव दीप्तिमती स्वर्णिमाभया मण्डिताऽत्यन्तं मनोज्ञाऽवालोक्यत। श्रीफीरोजगान्धी श्वेतां खादीटोपिकां शेरवानीसंज्ञकं खादीनिर्मितं कञ्चुकं तथा सङ्कुचत्पादयामं धृत्वा विवाहवेद्यामुपविष्टः। वैदिकेन विधिनोद्वाहविधाने श्रीजवाहरलालनेहरूभिः कन्यादानेन सहेन्दिरायाः करकमलं श्रीफीरोजस्य हस्ते समर्पितम्। परस्परं हस्तं धृत्वा मन्त्रोच्चारणपूर्वकं प्रतिज्ञानामुच्चारणं कुर्वन्तौ सप्तपदीं विधायाग्नेः परिक्रमणविधिं समपादयताम्।

तदानीं सर्वत्रानन्दमये वातावरणे प्रसृतेऽपि श्रीमत्याः कमलामहाभागाया अभावं सर्वेऽप्यन्वभवन् यतो हि सा सौमङ्गल्यदिनमिदं वीक्षितुं जीविता नासीत्।

परिणयानन्तरं किशोरयुगलमामोदाय काश्मीरानगमत्। कियन्ति चिद् दिनानि तत्रैव यापितानि। श्रीमती-इन्दिरागान्धी पितृणामेकलत्वं विचार्य पत्या सह यथाशीघ्रं ततः प्रत्यायाता। इलाहाबादे तौ नवीनस्य गार्हस्थ्यस्य मङ्गलारम्भाय **'टैगौरटाउन'** स्थाने भवनमेकं नीत्वा सुखेनावसताम्।

१९४२ ई० वर्षे ब्रिटेनस्य युद्धकालिकेन मन्त्रिमण्डलेन भारतीयकाङ्ग्रेसस्य मनो जेतुं तथा देशवासिनां दृष्टिं मित्रराष्ट्राणां पक्षे विधातुं ब्रिटिशलोकसभायाः

कर्मकर-सदस्यः '**श्रीस्टैफर्ड क्रिप्स**'महोदयो भारते प्रेषितः। स हि भारतस्य समक्षं युद्धसमाप्त्यनन्तरं प्रवर्तनीयान् कांश्चित् प्रस्तावानस्थापयत्, परं तेषु कीदृशस्याप्यधिकार-प्रदानस्य वार्तैव नासीत् किञ्च तादृशप्रस्तावस्वीकृतौ सत्यां कालान्तरेण भारतस्य विभजनमपि सम्भावितमभूत्। अतः काङ्ग्रेसदलं तान् नाङ्ग्यकार्षीत्।

महात्मभिः श्रीगान्धिभिर्देशवासिनां स्थितिं विज्ञाय समुचितं कालं च विचार्य 'सत्याग्रह-घोषणा' विहिता। '**हरिजन**' नाम्नि स्वीये वृत्तपत्र आङ्लशासकानुद्दिश्य तेऽलिखन् —

"भवन्तोऽत्र चिरमुषिता अस्माकञ्च किमपि हितं न विहितम्। साम्प्रतं विष्टरादीन् बद्ध्वा प्रतिष्ठत। वयं भवद्भिः कमपि सम्बन्धं नाभिलषामः। अस्मान् भगवत आश्रये विमुच्य भवन्तोऽवश्यमेव व्रजत। इति।"

७ अगस्त १९४१ ई० दिने मुम्बापुर्यामखिलभारतीय-काङ्ग्रेसमहासमितेरधिवेशने श्रीगान्धिनां '**भारत-मुक्ति**'-सम्बद्धस्य विचारस्य समर्थनं काङ्ग्रेसेनापि स्वीकृतम्। श्रीजवाहरलाला अपि परिस्थितिं विमृश्य महात्मगान्धिनां नेतृत्वं स्व्यकुर्वन्। तस्मिन्नधिवेशने श्रीजवाहरलालाः श्रीफीरोजः श्रीमतीन्दिरा तथान्ये नेहरूपरिवारसदस्या अपि समवेताः। तत्रैव काङ्ग्रेस-महासमितौ '**भारतं मुञ्चत**' इत्याख्य आन्दोलन-प्रस्तावः सर्वसम्मत्या स्वीकृतस्तथा भारतीयजनतायै सङ्घर्षारम्भायादेशो विहितः।

अगस्तस्य नवमे दिने शासनेन श्रीगान्धिसहिताः प्रायः सर्वेऽपि महान्तो नेतारो बन्दीकृताः। तेन रुष्टा भारतीयाः स्वस्वबुद्ध्यनुसारमान्दोलनं प्रवर्तयितुं कृतनिर्णयाः क्वचिद्धूम्रयानपङ्क्तीरुदपाटयन्, क्वापि तडित्-संवेदनसाधनानि दूरभाषोपकरणानि विच्छेदितानि, यत्र तत्रारक्षिकार्यालयेषु प्रैषालयेषु चाधिकारानपि जना अकार्षुः।

श्रीमन्तो जवाहरमहाभागाः श्रीहठीसिंह-महानुभावाश्च मुम्बापुर्यामेव निगृहीताः। श्रीमतीन्दिरा रैलयानेनेलाहाबादं प्राप्ता। तत्रापि द्वितीय एव दिने रक्षाकर्मचारिण आनन्दभवनमागत्य श्रीमतीं विजयलक्ष्मीं निगृहीतवन्तः। श्रीफीरोजस्तु तदान्दोलनं गुप्तरूपेण चालयितुं भूमिगतोऽभूत्। स हि गुप्तरीत्यैव लखनऊनगरं गतवान्। ततः परं श्रीमतीन्दिराऽपि स्वां निग्राहयितुमभिलषन्ती कालं प्रत्यैक्षत। यतो हि —

राष्ट्रस्योन्मुक्तियज्ञेऽरणिमथनसमुद्भूतवह्नौ समन्तान्,
मुक्तेर्मन्त्रान् पठन्तो निजनिजहविषामाहुतीर्दातुकामाः।

यत्र स्यू राष्ट्रभक्ताः कथमथ च तदा तत्र तिष्ठेत् स मौनं,
सर्वस्वं यस्य राष्ट्रार्पितमिह समभूद् देशरक्षार्थमेव ॥१६॥

एकस्मिन् दिवसे 'ईविंग क्रिश्चियन-महाविद्यालयस्य' च्छात्राः स्वीये महाविद्यालये त्रिरङ्गध्वजमुत्तोलयितुमायोजयन् तत्र श्रीमतीन्दिराऽप्यामन्त्रिता। सा जानाति स्म यद् ध्वजोत्तोलनं शासनेन निरुद्धमस्ति तथा तस्मिन् भागं गृह्णञ्जनो निगृहीतुं शक्यते। एवं सत्यपि तत्र सम्मिलिता। ध्वजमुत्तोलयत्सु च्छात्रेषु रक्षाकर्मचारिणो दण्डप्रहारान् कर्तुं प्रवृत्ता आसन्। तत्र ध्वजधारक एकश्छात्र आरक्षिणां दण्डाघातेन रक्तलिप्ताङ्गो यदा पतन्नासीत् तदैव श्रीमतीन्दिरा ध्वजं स्वहस्तेऽगृह्णात्। आरक्षिणस्तामपि प्रहर्तुं प्रावर्तन्त किन्तु तथा त्रिरङ्गध्वजः स्वयमुत्तोलित एव।

अनया घटनया सा मनागपि व्याकुलतां नाप्नोत्। सा सार्वजनिकसभां सम्बोधयितुमपि निरचिनोत्। स निर्णयोऽपि नासीद् विपदा विहीनः; यतो हि तादृश्यां सभायामपि प्रतिबन्ध आसीत्। तथापि सा महति जनसमुदाये भाषितुं गता। सशस्त्रा आरक्षिणः सभां न्यरुन्धन्। भाषणस्यारम्भ एवैको गौराङ्गक आरक्षी गुटिकाप्रहारभीतिं घोषयन् तां निरोद्धुमचेष्टत तदैव स्वीयान् प्राणान् हस्ते निधाय श्रीफीरोजः शरवज्जनसमुदायान्निःसृत्य तमारक्षिणमरौत्सीत्। आरक्षिणस्तमप्यताडयन्। ततः परं परःशतैर्जनैः सह ते श्रीमतीमिन्दिरां श्रीफीरोजञ्च निगृह्य नैनीस्थायां कारायां न्यवेशयन्। इत्थं विवाहानन्तरं प्रायः पञ्चमासाभ्यन्तरमेव किशोरयुगलमिदं राष्ट्रस्य परतन्त्रताविमुक्तये कारावासं समाश्रयत्।

इन्दिराया इयं प्रथमा कारायात्राऽवर्तत। यदा सा कारायां प्रविष्टा, तदा सामान्येन ज्वरेण पीडिताऽऽसीत्। कारायाश्चिकित्सकस्तां परीक्ष्यौषधाङ्कनमकरोत् परं कारारक्षिणस्तस्या उपचाराय किमपि नैच्छन्। इयमेव नहि; ते तु श्रीमत्या इन्दिराया आनन्दभवनात् प्रेषितान्याम्रफलानि तथाऽन्यानि खाद्यवस्तून्यपि बहिरैव खादन्ति स्म ताञ्च व्यथयितुमन्तरागत्यकथयन्ति स्म यदानन्दभवनादागतानि फलानि स्वादून्यासन्निति। कारायामिन्दिरायै प्रथमश्रेणीकं स्थानमपि नादीयत। साऽन्यैर्द्वाविंशत्या बन्दिभिः सहावसत्। केनापि सह सम्मिलनस्य सौविध्यमपि नासीत्, पत्रव्यवहारेऽप्यङ्कुशोऽभूत्। तादृश्यां परिस्थितावपि साहसेन सा त्रयोदश मासान् व्यत्यापयत्। १३ मई १९४३ ई० दिने द्वावपि तौ मोचितौ।

कारागारस्यानुभवान् वर्णयन्ती श्रीमतीन्दिरा कालान्तरेणाकथयद् यत् "तदानीं वैदेशिका आरक्षिणो भारतीयान् घृणयाऽपश्यन्। कारागारस्य प्रकोष्ठेषु सर्वत्र दुर्गन्धस्य साम्राज्यमभवत्। अनेकानि कष्टानि दीयन्ते स्म। सौविध्यस्य नामापि नावर्तत। बाह्यजीवनात् तु वयं पृथक् कृता आस्म सहैव प्रकृतेर्नैसर्गिकात् सौन्दर्यात् सर्वविधायाः कोमलतायाः कमनीयताया अपि वञ्चिता अभम

कारागारस्य मलिना भित्तयोऽस्माकं पुरोऽवर्तन्त। मलिनानि वस्त्राणि, नीरसं भोजनं, पशु-समो व्यवहारः, शीतातपवर्षाणां प्रकोपा एवास्माकं जीवनस्य पाथेयान्यासन्। कारायाः स्थितेर्बहिराकर्णने तथाऽन्तः स्थित्वा व्यत्यापितानां दिनानामनुभूतौ प्रभूतमन्तरं भवति। तत्र स्थित्याऽऽत्मा कियान् शून्यो भवति तत्सर्वं दीर्घकालं यावत् स्थितिं विना कल्पितुमपि न शक्यते। यथा हि— **आस्कर बाइल्डेनोक्तम्**—'प्रत्येकं दिनमेकैकं वर्षमिव व्यत्येति, दीर्घदीर्घाणां दिवसानां वर्षम्।' कारायाः प्रत्येकं दिनं वैकल्यपूर्णं भवति; **'पैथिक लारेंसः'** सत्यमेवावोचत् 'एकस्य बन्दिनो जीवनस्य सत्यमिदमस्ति यत् स हीनां स्थितिं स्वीकरोतीति।'

एवं सत्यपीन्दिरा तत्र प्रसन्नावसत्। पठने च सम्पृक्ता, बाह्यजीवनं प्रत्यनासक्ता कष्टानामपमानानां सहने सुदृढा तथा तत्रत्ये वातावरणे स्वामनुसारयितुं प्रसक्ताऽतिष्ठत्। यतो हि —

ये नाम लक्ष्यं प्रति वर्धमानाः, स्वयं प्रवाहाभिमुखं व्रजन्ति।
ते वै पुरो रोधयतस्तरङ्गान्, विच्छिद्य शौर्येण नदाँस्तरन्ति॥१७॥

□ शुभोदर्क-परम्परा अन्या घटनाश्च

मातृत्वं परिपूर्णताऽस्ति भुवने सीमन्तिनीजीवन-
स्यैकाऽतिप्रथिता ह्यभिनवः प्राणी यतो जायते।
तल्लावण्यनिरीक्षणं च नितरां तद्भाविनः कल्पनं,
कस्मिँश्चिद् विरलेऽवगाहयति तां सौख्याम्बुधौ सन्ततम्॥१८॥

दाम्पत्यस्य विमला परिणतिः पुत्रस्य जन्मना परिपूर्णतां प्राप्नोति। नारीजीवनस्य यथार्थता पुत्रप्राप्त्यैवानुमीयते। भारतीयमहर्षीणां निर्देशानुसारं पुत्रशब्दस्य व्युत्पत्तौ 'पुंनाम्नो नरकात् त्रायत' इति भावनाऽपि संसारे बलीयसी विद्यत एव। श्रीरवीन्द्रनाथस्तु नवीनयैव पद्धत्या पुत्रोत्पत्तिं व्याख्यातवान्। तेन लिखितमस्ति यत्—'प्रत्येकं शिशुरिमं सन्देशं नीत्वाऽऽगच्छति यन् मनुष्यो वर्तमानोऽस्ति तथेश्वरस्य विश्वासो नापगत इति।'

श्रीमतीन्दिराऽपि भारतीया वनिताऽवर्तत। तस्या मनोऽपि मानवीययाऽऽकाङ्क्षयाऽऽकुलितमभूत्। संसारे वर्तमानाऽपि सा गार्हस्थ्यस्य परमां परिणतिं प्रेक्षितुमैच्छत्। जनवरीमासादेव सा दोहदलक्षणैरलङ्कृताऽवालोक्यत। मार्चमासे सा गर्भावस्थायाः कालं गमयितुं तथा प्रसूतिहेतवे मुम्बापुर्यामगमत्। तत्र श्रीमत्याः कृष्णाया भवन एवास्थात्। श्रीफीरोजगान्धी भूयोऽपि कारागारमगच्छत्। मुम्बापुर्यां गमनस्य तु तस्या एकमन्यदपि कारणमासीत् तच्चेदं यत् तदीयामस्वस्थतामनुभूयेलाहाबादस्य चिकित्सका एवममन्यन्त यत् सा मातृत्वस्य

भारं वोढुमसमर्थाऽस्ति। स तस्याः स्वास्थ्याय घातको भविष्यतीति। दुर्भाग्या-च्चिकित्सकेनैकेन सर्वास्ता वार्ता लिखित्वाऽपि प्रदत्ता आसन्।

मुम्बापुर्यां प्रसिद्धस्य स्त्रीरोगविशेषज्ञस्य निरीक्षणेन सा चिन्तामुक्ता भूत्वा 'माथेरान'-नाम्न्यां पर्वतिकायां कतिपयान् मासान् सुखेन व्यत्यगमयत्। प्रसूतिसमयस्य नैकटचं विज्ञाय सा पुनर्मुम्बापुर्यामागता। कारातो विमुच्य श्रीफीरोजगान्ध्यपि तत्रैवायातः। २० अगस्त १९४४ ई० दिने डा० शिरोडकर-स्योपचर्यागृहे श्रीमतीन्दिरा पुत्ररत्नं प्रासविष्ट। सर्वेऽप्यपारमानन्दमन्वभवन्। श्रीजवाहरलालेभ्योऽपि कारायां तडित्सन्देशः प्रेषितः। बन्दिनां कृते स्थापितेन प्रतिबन्धेन त्वरितसन्देशः प्रैषपत्रं च सममेवामिलताम्। तेन शुभसमाचारेण तेऽपि मुदिता अभवन् परं गाम्भीर्येण ते श्रीमतीं कृष्णामुद्दिश्यालिखन् —

"समाचारं प्राप्याहं मुदितोऽभवम्। तव सदृश उत्साहोऽवश्यमेव नाभूद्, यतो हि भावनासु प्रवहणं मम स्वभावे न्यूनमेव विद्यते। परिवारे कस्यापि नवीनस्य सदस्यस्य जन्म सदैव प्राचीनाः स्मृतीरुद्बोधयति। तथा स्वबाल्यस्याथ च परेषां जन्मग्रहणस्य वार्ताः स्मृतावायान्ति।···किञ्च यदा यदाऽपि कस्यापि जन्म भवति सा स्वयं स्वस्मिन् सर्वथा नवीना वार्ता भवति, अन्येषामिव तथा पुनरप्यात्मन इवैवापूर्वा। प्रकृतिः स्वात्मानं समानरूपेणावर्तयति, तस्या अनन्तस्य वैविध्यस्य किमप्यन्तमेव नास्ति। तथा प्रत्येकं वसन्त एकः कायाकल्पो विद्यते, प्रत्येकं नवं जन्मैको नवीन आरम्भः। मुख्यत्वेन यदा तज्जन्मास्माभिर्घनिष्ठरूपेण संयुक्तं भवेत् तदस्मभ्यं पुनर्जीवनं सम्पद्यते किञ्चास्माकं सर्वासां पुरातनाशानां केन्द्रं सम्पद्यत" इति।

जातकस्याभिधानविषये पितृभिः सह पत्र-व्यवहारः प्राचलत्। श्रीमतीन्दिरा केषाञ्चिन्नाम्नां सूचीं प्रैषयत् श्रीजवाहरलालमहाभागा अपि कानिचिन्नामानि समसूचयन्। एकेन मित्रेणापि काचित् सूची प्रेषिता। इत्थं सूचितेषु नामसु **'राजीव'** इति नाम सर्वेभ्योऽरोचत यतस्तस्मिन् श्रीमत्याः कमलाया नामसाम्यमासीत्। इत्थमेव श्रीजवाहरलालमहाभागानां नाम्नोऽपि साम्यमिच्छद्भिः सर्वैं राजीव-शब्देन सह 'रत्न' पदस्यापि संयोजनं कृत्वा जातकस्य **'राजीव रत्न'** इति नामकरणं कृतम्। **'यथा नाम तथा गुणा'** इति किंवदन्त्यद्य श्रीमतो **'राजीवगान्धिनः'** स्वदेशस्य प्रधानमन्त्रित्वेन सार्थतां गच्छतीति महतः प्रमोदस्य विषयः।

मासद्वयं स्वास्थ्यलाभं सम्प्राप्य श्रीमतीन्दिरा लखनऊं प्राप्ता। १९४५ ई० वर्षे श्रीजवाहरलालमहानुभावाः कारातो विमोचिताः। तदानीं **'ब्रिटिशमन्त्रिमण्ड-लदलं'** भारत एवासीत्। श्रीजिन्ना एकस्य सार्वभौमिकस्य पाकिस्तानस्य निर्मितये दुराग्रहग्रहिलोऽभूत काङ्ग्रेसदलञ्चोपमहाद्वीपस्यैक्यसंरक्षणाय तन्निष्ठमवर्तत। तेषु

दिनेषु श्रीमतीन्दिरा कस्मिन्नप्यन्यस्मिन् कर्मणि व्यापृता न भूत्वा केवलं पत्न्या मातुश्च भूमिकामेव निरवहत्। दाम्पत्यस्य सुखावहानि तानि दिनानि वस्तुतस्तस्या जीवने स्वर्णिमान्यभवन्।

काठिन्यानि समागतान्यथ पुरो निर्यापितुं यत्नतः,
स्थित्वैवात्मगृहे निजोर्जितविधौ साफल्यमासाद्यते ।
अक्लेशं स्फुरितां मनोमुदमपि प्रीत्याऽलमालम्भितुं,
दाम्पत्यं मधुमत् तदा वितनुते साहाय्यमुद्योतितम् ॥१९॥

ब्रिटिश-मन्त्रिमण्डलस्य योजनायाः कार्यान्वियनं दीर्घकालिक-प्रस्तावानां कारणादसम्भवमिवाभवत् । काङ्ग्रेसदलञ्च मौनमुपवेशनं नोचितममन्यत । ब्रिटिशमन्त्रिमण्डलस्य पुनर्गमनात् पूर्वम्—**'एटली'**महानुभावेन कथितमासीद् यद् 'ब्रिटिशशासका इदं न सहिष्यन्ते यदल्पसङ्ख्यका बहुसङ्ख्याकानां प्रगतौ बाधका भवेयुः।" तेषां शासनमिदमपि न वाञ्छति स्म यद् बहुसङ्ख्यकाः स्वेच्छानुसारमल्पसङ्ख्यकेषु स्वाभीष्टमारोपयेरन्। अन्ततः इदं तैः सम्भावितं यद्—'अन्तरिमसर्वकार'स्य घटनेन परस्परमेते नैकट्यं प्राप्स्यन्तीत्याशया श्रीजवाहरलालस्याग्रे भारतस्य महाधिशास्त्रा**'ऽन्तरिमसर्वकार'**-निर्मितये प्रस्तावितम् । पूर्वं तु तैर्निषिद्धं किन्तु सर्वकारस्य स्थितेः शक्तेश्च स्पष्टतानन्तरं निमन्त्रणं स्वीकृतम् ।

२ सितम्बर १९४६ ई० दिने श्रीजवाहरलालनेहरूणां नेतृत्वेऽन्तरिमसर्वकारस्य निर्माणमभूत् । श्रीनेहरूमहाभागा उपाध्यक्षास्तथा परराष्ट्र-राष्ट्रमण्डलीय-सम्बद्धस्य विभागस्य सचिवा अभूवन्। **'मौलाना आजाद—सरदार-पटेल—डा० राजेन्द्रप्रसाद**—प्रभृतयोऽपि विभिन्नेषु पदेष्ववर्तन्त । मुस्लिमलीग-सदस्यास्तस्मिंस्तु सम्मिलिताः परं संविधान-सभायां न सम्मिलिताः। लीगस्य मन्त्रिणः कोङ्ग्रेसविरोधिनीं नीतिमनुसरन्तः "शक्त्या पाकिस्तानं प्राप्स्याम"इति घोषयन्तो व्यचरन् । तेषां निर्देशानुसारमेव देशे साम्प्रदायिका उपद्रवा उत्पाता अभवन्। बङ्गप्रदेशे विशिष्याक्रमणानि हत्याश्चाक्रियन्त। श्रीगान्धिनां नौआखाली-यात्रा तथा श्रीनेहरूणां बिहारयात्राऽन्येषां नेतृणाञ्चोपद्रवस्थानानां यात्राः समपद्यन्त । यथायथं मुस्लिमा हिन्दवश्च निन्दिताः प्रतिबोधिताश्च।

दीर्घात् कालाज्जन-धन-हृतिं क्लेशतोऽप्यलं सोढ्वा,
स्वातन्त्र्यं ये कथमपि पुनः प्राप्तुमेताः समीपम् ।
तस्मिन् काले कलहकरणं किं न तन्मौर्ख्यमासीद्,
यद्-दुर्दैवाद् विभजनमभूद् भारतस्यापि हन्त ! ॥२०॥

अन्तरिम-सर्वकारेण प्रारम्भिकेषु दिनेषु प्रत्यग्रधिया स्फूर्त्या च कार्यं विहितम्। समुन्नतजीवनस्य साम्प्रदायिकसामञ्जस्यस्यास्पृश्योद्धारस्य सर्वथा

जनेभ्य उपनिवेशवादस्य तथा जातीयभदेभावविरहितस्य स्वातन्त्र्यस्य, सत्तावादिसमूहनिरपेक्षतायाः संयुक्तामेरिका-सोवियतसङ्घाभ्यां मित्रताया राष्ट्रमण्डलेन सह मैत्रीसम्बन्धस्य शिष्टेशियाखण्डेन सह च विश्वबन्धुत्वस्य लक्ष्याणि निर्धार्य तदानीं तैर्नेतृप्रवरैर्या नीतय उद्घोषितास्ताः परस्सहस्रवर्षावधि भारतस्य स्वतन्त्रताया अक्षुण्णतार्थमतीव सुखदायिन्योऽभूवन् ।

एतस्मिन् सकलेऽपि समय इन्दिरा तस्याः शिशू राजीवः श्रीफीरोजश्चानन्दभवन एवावसन्। इन्दिरा तु स्वसुतस्य लालने पालने च संसक्ताऽऽसीत् श्रीफीरोजमहाभागश्च सचित्रासु पत्रिकासु लेखान् विलिख्य यूरोप-प्रवासे गृहीतानां सुन्दराणां चित्राणां सदुपयोगमकार्षीत्। किञ्चिद् बीमा-सम्बन्धि कार्यमपि सोऽकरोत्। तस्यैव श्रीमतो निरीक्षण आनन्दभवनस्योद्यानमतीव सुन्दरं पुष्पैः सुरभितमभूद् यत् सर्वान् प्रासादयत्। १९४६ ई० वर्षस्य नवम्बरमासे श्रीफीरोजः **'नेशनल हेराल्ड'** पत्रस्य प्रबन्धसम्पादको भूत्वा लखनऊनगरं प्रातिष्ठत्। तत्र स एकं गृहं नीत्वाऽतीव सौहार्देन तत् सज्जयित्वा परिष्कृत्य च स्वपरिवारेण सह वस्तुमारभत। गृहोपकरणानि स्वरुच्यनुरूपाणि निरमापयत् तथा स्वकीयमुद्यानानुरागमपि तत्र सफलमकरोत्। निरन्तरं श्रमेण निष्ठया स तत्पत्रं शीघ्रमेवात्मनिर्भरं व्यदधात्। अहरोत्रं कर्मनिष्ठो मुद्रण-यात्रानुरागी कर्मकराणां स्नेहभाजनं तथा सम्पादकस्य शब्देषु 'सामान्यानां विशेषतानां मानवः' श्रीफीरोज आसीत्।

श्रीमतीन्दिरा गार्हस्थ्यस्य कार्येभ्योऽतिरिक्तं काङ्ग्रेसस्य गतिविधिषु तथा समाजकल्याणकर्मसु व्यवसिताऽभवत्। श्रीफीरोज इन्दिरा च द्वावपि प्रगतिशीलसमाजवादिविचारशालिनावभूतां तस्मादनेके तरुणा राजनीतिकाः कार्यकर्तारो नेतारश्च प्रायस्तयोर्गृहमागच्छन्ति स्म, परं द्वयोः स्वभावयोरन्तरमासीत्— इन्दिरा सङ्कोचशालिनी मितभाषिणी चावर्तत श्रीमान् फीरोजश्च बहिर्मुखो निःसङ्कोचश्चासीत्। उभावपि दम्पती परस्परं स्नेहशीलौ समानविचारवन्तौ तथा मिथः साहाय्याय समुत्सुकावास्ताम्।

परस्परं प्रेम विचार-साम्यं, तथा च शील-व्यसने समाने।
मनः प्रसादश्च भवन्ति यत्र, वसन्ति दाम्पत्य-सुखानि तत्र ॥२१॥

अस्थायिसर्वकारस्य प्रधानमन्त्रित्वस्य कारणात् पं० श्रीनेहरूमहाभागानां नवदहल्यां निवास आवश्यक आसीत्। तत्र वसतां तेषां सौविध्याय श्रीमती विजयलक्ष्मीः श्रीमती कृष्णा श्रीमतीन्दिरा च भूयोभूय आयान्ति स्म, समागतानामतिथीनां स्वागत-सत्काराणां व्यवस्था ताभिरेव व्यवसीयते स्म । श्रीमतीन्दिरा यथासम्भवं पितृपादानां सहायतार्थमायाति स्मैव किञ्च यदा सा गर्भवत्यभूत् तदा तस्या द्वितीयप्रसूतये नवदेहल्यामेव निवासो निश्चितः कारणं च तत्र चिकित्सासौविध्योपलब्धिरासीत्।

यथा यथा प्रसूतिसमयो निकटमागच्छति स्म, श्रीमतीन्दिरा कस्या अपि संरक्षिकायाः सामीप्याभावाच्चिन्तिताऽवर्तत, परं तदैव श्रीमती कृष्णा तत्र समायाता। सा हि स्वभर्त्रा सह भाषणयात्रार्थममेरिकायां गमनात् पूर्वमिन्दिरया स्वभ्रात्रा च मिलितुं तत्रागच्छत् । तत्रैव तस्याः पुत्रौ सिन्धिया-विद्यालयतः श्रीफीरोजमहानुभावश्च लखनऊतः समागताः। १३ दिसम्बर १९४६ ई० दिवसस्य रात्रौ सर्वेपि श्रीमतां जवाहरलालानां वार्तालापेन प्रासङ्गिक-घटनानां श्रवणेन विनोदवचोभिश्च भृशमानन्दिता अभूवन् । तस्यामेव रात्रौ श्रीमतीन्दिरा पीडामन्वभूत्, चिकित्सालयञ्च प्रापिता। तत्र सा **द्वितीयं पुत्रमजीजनत्**। प्रसववेदना दुःसहाऽऽसीत् । रक्तमपि बहु प्रस्रुतम् । साऽतीव दुर्बला क्षीणरक्ता श्वेतशरीरा चादृश्यत । दूरभाषेण स्वस्य दौहित्रस्य जन्म श्रुत्वा तं प्रेक्षितुं श्रीजवाहरलाला अपि शीघ्रमेव रुग्णालयं समागताः। दौहित्रं दुहितरं च विलोक्य सुखमन्वभवन्। श्रीमतीन्दिरा द्वितीयपुत्रस्याभिधानं **'सञ्जय'** इति निरधारयत्।

प्रसूति-समये भ्रातृस्वसुः श्रीमत्याः कृष्णाया उपस्थितिं साहाय्यं सान्त्वनं च सम्प्राप्य श्रीमतीन्दिराऽधमर्णतां व्यञ्जयितुं श्रीमत्यै कृष्णायै पत्रं प्राहिणोत् तस्मिंश्च कृतज्ञतां प्राकटयत्। यतः —

येनापि केनापि हितं कृतं भवेद्, हृदस्तदीयोपकृतिं न विस्मरेत्।
हार्दं ततस्तस्य चिरं विवर्द्धते, 'कृतज्ञता-ज्ञापन'मस्ति सद्गुणः ॥२२॥

साम्प्रदायिक-विद्वेषादरेण नौआखाल्यां हिन्दूनां, बिहारे च यवनानां नृशंसहत्याकाण्डेन कुण्ठिताः श्रीगान्धिमहाभागास्तथाऽन्ये भारतीयनेतारो नितरां खिन्नखिन्नाः सत्वरं जनतां सान्त्वयितुं कर्तव्ये कर्मणि योजयितुं तथा शान्तिमवलम्बयितुं न्यवेदयन्। हिन्दू-मुस्लिमयोरेकतां वर्द्धयितुं स्थिरयितुं च श्रीमहात्मानो नोआखालीयात्रामप्यकार्षुः। प्रेम्णो मैत्र्याश्च सन्देशं दातुं ग्रामेषु भ्रमन्तो नेतारोऽपि तथैव यात्रा अकार्षुः। १९४७ ई० वर्षस्यारम्भे **लार्ड वेवलस्य** स्थाने **लार्ड माउण्टबेटनः** समायातः। श्रीएटलीमहाभागस्य सर्वकारेण जून १९४८ ई० यावद् भारतात् प्रतिगमनस्य निर्णय-घोषणा विहिता। ३ जून १९४७ ई० दिने श्रीमाउण्टबेटनेन भारत-विभाजनस्य योजना प्रस्ताविता। मुस्लीमलीगस्तु सत्वरमेव योजनां तां स्व्यकरोत् परं काङ्ग्रेसेन तथा श्रीजवाहरलाल-प्रभृतिभिर्नेतृभिर्बहु विचारितं परामृष्टञ्च। अन्ततोऽराजकता-वारणाय तथा शान्त्यै स्वाधीनतायै च विवशीभूय विभाजनं स्वीकृतम्। १८ जुलाई दिने लोकसभया ब्रिटिशशासनस्य समाप्तेर्विधेयकः पारितो यश्च १५ अगस्त १९४७ ई० दिने प्रभावशीलोऽभूत्।

स्वातन्त्र्यलक्ष्म्या अभिनन्दनाय १४ अगस्त १९४७ ई० दिवसस्य निशीथे भारतीय-स्वतन्त्रतायाः प्राप्तेरुत्सव आयोजितः। ब्रिटिशशासनस्य पताकाऽवतारिता

स्वतन्त्रराष्ट्रपताका चोत्तोलिता । त्रिरङ्गराजिता भारत-राष्ट्र-पताका द्यां भारतीयानां शौर्यगाथां लिखन्तीवानन्तबलिदानैरपारकष्टैः परिपूर्णस्य स्वातन्त्र्य-सङ्घर्षस्य समाप्तेः शुभसन्देशान् वितरन्तीवात्मनः पटाञ्चलेन नृत्यन्तीव व्यराजत् । सर्वे हर्षेण परिपूर्णा अभवन् प्रीत्याऽवाऽछँश्च—

त्रिरङ्ग-राजि-राजितं स्वदेश-भक्ति-पुञ्जितं,
मनस्सरस्सु कञ्जितं जयध्वनि-प्रगुञ्जितम् ।
अशोक-चक्र-चिह्नितं स्वतन्त्र-मन्त्र-शिञ्जितं,
विभातु राष्ट्रियं ध्वजं समस्त-लोक-रञ्जितम् ॥२३॥

श्रीमतीन्दिरा राजनीतिक-सङ्घर्षाणां कारणात् स्वीयं बाल्यकालं सामान्या-यामेकाकितायां व्यत्यापयत्, तस्मादेव सा स्वीययोः पुत्रयोर्लालने पालने च सम्पूर्णं समयं गमयितुं चेष्टते स्म । साऽमन्यत यत्—

क्षुपस्य कस्यापि सुपोषणाय वै, जलातपौ स्तः सुतरामपेक्षितौ ।
तथा शिशूनामपि साधु पुष्टये, ह्यपेक्षते मातृनुराग उज्ज्वलः ॥२४॥

मात्रा स्वकीय-पुत्राणां लालने पालने तथा ।
प्राथम्यं सर्वदा ध्येयं, बाल्यकाले विशेषतः ॥२५॥

श्रीमत्या इन्दिराया अपि जीवनं सार्वजनिकजीवनकारणाद् व्यस्तं त्वासी-दव परं सा सार्वजनिकजीवनस्य परिवारस्य बालकयोश्च दायित्वेषु साम्यं संस्थाप्य कथञ्चिदात्मनः कर्तव्यानि पूरयति स्म । यदा राजीव-सञ्जयौ विद्यालये गन्तुं प्रवृत्तौ तदा सा तयोरनुपस्थितावेव यथासम्भवं सार्वजनिकं कर्म सम्पादयितुम-चेष्टत । सा कियत्यामपि व्यस्ततायां सत्यां सुताभ्यां सह क्रीडनस्याथवा ताभ्यां साकं तयोः पुस्तकपठनस्यावकाशं निरसारयदेव । यतः सा जानाति स्म यत् —

भवत्यसाधारणरूपतः स्थितं, बालेषु तत्त्वग्रहणस्य कौशलम् ।
तदन्यथा व्याहरणात् कुतोऽप्यपाकर्तुं न शक्येत मृषा प्रसङ्गतः ॥२६॥

शनैः शनैस्तौ वृद्धिङ्गतौ । आवासीय-विद्यालये तौ प्रवेशितौ । तदानीमेव सा देशस्य परिभ्रमणमारभत । यदा तौ विद्यालयावासे निवसतस्तदा साधिकाधिकं परिभ्रमणमकार्षीद् यतोऽवकाशवासरेषु ताभ्यां सह पूर्णरूपेण वस्तुं पार्येत । सा वाञ्छति स्म यत्—तौ मस्तिष्केण शरीरेण च स्वस्थौ सन्तुलितौ भूत्वा परिस्थितेरनुरूपमात्मानं वर्तयितुं सन्नद्धौ भवेताम् । पुस्तकीयज्ञानेन सहैव जीवने वास्तविकं प्रेमानुशासनं च तयोर्विकसेतां समुन्नतं चरित्रं व्यक्तित्वस्य निर्माणं च तयोर्भवेदिति ।

१९४७ ई० वर्षस्य सितम्बरमासे देहल्यां भारतविभाजनस्य कारणादु-

पद्रवा अभवन्। तदानीं श्रीमतीन्दिरा मसूरीनगर्यामवर्तत। बालकावपि तत्रैवास्ताम्। दिल्लीतो दूरभाषेण तस्यै सन्दिष्टं यत् सा देहलीं सर्वथा नागच्छेत्, तदा सा व्यचारयद् यद् ग्रीष्मस्य कारणादेवं सन्दिष्टाऽस्मि। अन्ये केऽपि समाचारास्तत्र नागच्छन्ति स्म। सा सन्देहैरावृताऽभूत्। अन्ततः श्रीफीरोजेन सह वार्तालापः सञ्जातः स्थितिं विज्ञाय च सा भूयो भूयो निषिद्धाऽपि कर्तव्यपालन-व्याकुला सेवा-शुश्रूषाचिकीर्षया द्रुतमेव देहलीमागमत्।

देहल्यां श्रीमहात्मभिः श्रीमतीन्दिराऽपि सङ्घर्षग्रस्तानां स्थानानां विलोकनाय पीडितानां साहाय्याय चादिष्टा। तत्कालमेव सा तेषामादेशं पालयितुं निःसृतवती। काभिश्चिन्महिलाभिः सार्धं सा मुस्लिमानामावासपरिसरे तान् वीक्षितुं स्थितिं च विज्ञातुमगच्छत्। तदानीं तत्र महामार्याः प्रकोपोऽवर्तत तथापि तत्र निवसन्तो मुस्लिमजनास्ते ततोऽन्यत्र गन्तुं नैच्छन्। ते हिन्दूनां हस्तैर्मरणापेक्षया महामार्या मरणं श्रेष्ठममंसत। श्रीमती गान्धी तेषां दुःखगाथां निशम्य दुःखिताऽभूत्। तेभ्य आश्वासनं ददती सा चिकित्सा-भोजनादीनां सौविध्यं प्रापयितुं प्रयस्य सान्त्वनामददात्। मुस्लिमानां मनोभ्यो भयं निवारयितुं साम्प्रदायिकं सद्भावं च वर्धयितुं हिन्दू-यवनयोः परस्परं भ्रातृभावमानाययत्। उभयोर्वर्गयोः प्रायः पञ्चशतं जनाः साकं स्थित्वा भोजनमप्यकार्षुः।

मनसा कर्मणा वाचा देशसेवार्थमुद्यताः ।
सम्मान्यन्ते समाजेन सभाजन-पुरस्सरम् ॥२७॥
सेवा अपूर्वाः प्रबलाश्च निष्ठास्त्यागानपूर्वान् विरलाः प्रवृत्तीः ।
आलोक्य भक्त्या जनतार्पयन्ती पत्राणि पुष्पाणि मुदं व्यतानीत् ॥२८॥

श्रीजवाहरलालनेहरूमहाभागाः सर्वसम्मत्या स्वतन्त्रभारतस्य प्रथमे प्रधानमन्त्रिणो निर्वाचिताः। तेषां तपस्त्यागसंयमौदार्यगाम्भीर्य-शौर्यसाम्मनस्य-पाण्डित्यप्रागल्भ्यादिगुणान् प्रति समादरं व्यञ्जयन्ती भारतीया जनता भाविशासनं सुचारुरूपेण प्रवर्तयितुं स्वतन्त्रस्य भारतस्य विश्वस्मिन्नपि विश्वे गौरवमयीं प्रतिष्ठां वर्धयितुं च सम्मानिते प्रधानमन्त्रिपदे तानमण्डयत्। यदा ते तस्मिन् पदे कार्यं कुर्वाणा **त्रिमूर्ति**-भवने वस्तुमायातास्तदा श्रीमतीन्दिरा गान्धी-महाभागा मनस्यैवं व्यचारयद् यत्-'पितृपादानां कार्यव्यग्रताऽतीव विपुला वर्तते। प्रतिक्षणं देशस्यानेकाः समस्याः समाधातुं ते चिन्तितास्तिष्ठन्ति। तादृश्यां स्थितौ तादृशस्य कस्यचित् सहायकस्यावश्यकता तेभ्यो विद्यते, यः सहायकस्तत्रैव वसेद्, वास्तविकेन रूपेण तेषां साहाय्यमाचरेद् यश्च तानात्मनाऽभिलषेत् सम्मानं च तेभ्यः प्रयच्छेत्।' तदर्थमितस्ततः परिवारे दृष्टिनिक्षेपं विदधती साऽऽत्मनश्चित्रमेव तदनुकूलमपश्यत्। तदनन्तरं श्रीमतः फीरोजगान्धिनोऽनुमत्या यदा तदा तत्रोपेत्य साहाय्यं सम्पादयति स्म, किन्तु तथाविधेन प्रयासेन सन्तोषमननुभवन्ती साऽग्रे

स्वीयं वैयक्तिकं जीवनं गौणं विधाय राष्ट्रसेवायां तल्लीनानां श्रीजवाहरलाल-नेहरूणां शुश्रूषार्थं त्रिमूर्ति-भवन एव स्थातुं निरधारयत्। नासीत् तत्र पितृसेवैव कारणमपि तु भारतीयजनताया एकमात्रमाशाकिरणस्य प्रकाशविस्तृतये सौविध्य-सम्पादनमप्यासीत्। यतः —

ये राष्ट्राय समर्पिताः प्रतिपदं तद्रक्षणे तत्परा,
ये वै स्वात्मसुखानि दूरत इह त्यक्त्वा रता वर्धने।
ये च प्राप्य पदानि नैव समदा जाताः परं सर्वदा,
कर्तव्यप्रतिपालनाय निश्चितधियस्ते सेवनीयाः सदा॥२९॥

साम्प्रदायिकानामुपद्रवाणां प्राबल्यमनुभूय महात्मगान्धिभिस्तच्छान्तयेऽन-शनमारब्धम्। तस्मिन्ननशनावधौ महात्मानः पाकिस्तानस्य तुष्टये च तैरपेक्षितं द्रव्यराशिं दातुमपि वाञ्छन्ति स्म। स्वजनानां क्रूरेण विनाशेन क्रुद्धा हिन्दवस्तां पाकिस्तानस्य तुष्टेर्नीतिं मत्वा तद्विरोधाय यतमाना आसन्। २० जनवरी १९४८ ई० दिने महात्मनां प्रार्थनासभायां घातको विस्फोटोऽप्यजायत। तेनान्ये प्रमुखा नेतारोऽत्यन्तं चिन्तिता अभूवन् परं श्रीगान्धिनोऽविचलिता निर्भीकाः परमात्मनि विश्वासभाज एवावर्तन्त। ३० जनवरी १९४८ ई० दिने सायं यदा ते प्रार्थना-सभायां गच्छन्ति स्म, तदैकेन हिन्दूयुवकेन गुटिकास्त्रद्वारा तिस्रो गुटिकास्तेषु प्रहृताः, 'राम ! राम ! राम !' इत्युच्चरन्तश्च ते तत्रैव प्राणानत्यजन् !!!

समग्रोऽपि देशस्तेषां निधनेन खिन्न-खिन्नोऽभूत्। तेषां बलिदानेन यज्ज्योति-र्व्याप्तं तेन भूयसां मानवानामन्तःस्थितं साम्प्रदायिकविषोत्थं तमो नष्टम्। श्रीनेहरूमहाभागा गङ्गायां तेषामस्थिविसर्जनानन्तरं विशालं जनसमुदायं सम्बोध-यन्तोऽकथयन्—

"तेषां जीवने तथा मरणेऽप्येकं तेजोऽस्ति — एकः प्रकाशो विद्यते, य आ-गच्छतो युगान् यावदस्माकं देशमालोकयन् स्थास्यति। तदा वयं तेभ्यः कस्माच्छोकं कुर्याम। शोकस्त्वस्माभिः स्वयं स्वेषु, स्वासु दुर्बलतासु, स्वासु हृदय-व्याप्तासु दुर्भावनासु, स्वेषु मतभेदेषु तथा पारस्परिकेषु विद्वेषेषु करणीयो विद्यते। स्मर्तव्यं यदेतेषां सर्वेषामनौचित्यानामपाकरणार्थमेव श्रीमहात्मभिः स्वीयाः प्राणाः उत्सृष्टाः।"...

ये देशस्य हिताय नैजमखिलं सर्वस्वमेवार्पयन्,
येषां प्रेरणया स्वदेशविषये जागर्तिरेता ध्रुवा।
दीनानां दलितात्मनां च सहजाः संरक्षका येऽभवन्,
दत्त्वा ते बलिदानमव्ययमितास्तेभ्यो महद्भ्यो नमः॥३०॥

महात्मनां श्रीगान्धिनां स्वःप्रस्थानात् पूर्वं केवलं चतुःपञ्चघटिकाऽभ्यन्तर-मेव श्रीमतीन्दिरागान्धी-महाभागा स्वकीयेन पुत्रेण राजीवेन तथा कतिपयान्याभिः

सहयोगिनीभिः सह सुखेन वार्तालापानकार्षीत्। श्रीराजीवः श्रीगान्धिनां दुकूलेन क्रीडन् मन्दं मन्दं तेषां चरणयोर्निकटं प्राप्य पुष्पमालामेकां पदयोर्बद्धुं प्रावर्तत, तदैव तत्कर्णं गृहीत्वा तेऽकथयन्—"किमिदमाचरसि ? किं जीवितस्य जनस्य पदयोरपि कश्चन पुष्पाण्यर्पयति ?" कोऽजानात् तद्दिन एव ते दिवोऽतिथित्वेनामन्त्रिता आसन् !

महात्मनां सहसैवेदृशी हत्या न केवलं राष्ट्रिय आघात एवासीत् किन्तु श्रीमत्या इन्दिरागान्धी-महाभागाया अप्येकाऽतीवगभीरा वैयक्तिकी चपीडाऽवर्तत। ते नेहरूपरिवाराद्—भारतादियन्तोऽभिन्ना आसन् यत्तैर्विना सा भारतस्य कल्पनामपि शून्यशून्याममन्यत। त ईदृशा एके नेमिभूता अभूवन् येषां परितः स्वदेशस्य प्रत्येकं जनः सर्वाः संस्थाः सर्वेऽपि राजनीतिज्ञा दीना दलिताः शोषिताः पीडिता रङ्का राजानश्च भ्रमन्तोऽवालोक्यन्त। श्रीमतां जवाहरलालानां स्थितिरप्यतीव पीडाजनिका शून्या संरक्षकविहीनेव प्रत्यभात्।

बुद्ध्या जनास्तानवबोद्धुमत्र, यथा यथा सूक्ष्मतयाऽयतन्त।
धीराः प्रवीराः सरला विचित्रा, महाह्रदस्ते ह्यभवन् गभीराः ॥ ३१॥
न जीविताः सम्प्रति ते जगत्यां, परं तदीया उपदेशवाचः।
पदे पदे मार्गनिदर्शनाय, स्फुरन्ति नन्दन्ति गदन्ति सत्यम् ॥३२॥

□ अनुभूतिपथे सततं प्रगतिः

स्वातन्त्र्य-प्राप्तेरनन्तरं दीर्घकालाद् दास्ये स्थितानां भारतीयानां भारतस्य च संस्काराय नेतृवर्गेण बहु प्रयतितम्। ५६२ राज्यानां सरदारश्रीवल्लभभाईपटेल-महानुभावानां नैपुण्येन दूरदर्शितया च भारतसङ्घे सम्मेलनं तथा जूनागढ़-हैदराबाद-काश्मीर-समस्यानां समाधानं सम्पन्नम्। सन् १९४७ ई० तः १९४९ ई० वर्षीय-नवम्बर-मासस्य २६ दिनाङ्कं यावत् संविधानसभानामुपवेशनोत्तरं लोकतन्त्रस्य स्थापकं भारतस्य संविधानं स्वीकृतं यत्र वयस्कमताधिकारस्य, सदनद्वयवत्याः संसदः, प्रधानमन्त्रिणस्तथा मौलिकाधिकारादीनां प्रावधानान्यासन्। २६ जनवरी १९५० ई० दिने भारतमेकं सार्वभौम-सम्प्रभु-सत्ता-सम्पन्नं गणतन्त्रमभूत्। तथा ब्रिटिश-राष्ट्रमण्डलस्य सदस्यत्वं च प्राप्नोत्।

श्रीमतीन्दिरा त्रिमूर्तिभवने श्रीजवाहरलालनेहरूमहाभागानां सौविध्याय निवसन्त्यपि प्रतिमासं लखनऊ-नगरं प्रायः पञ्चदशदिनेभ्यो गच्छति स्म। कालान्तरेण यदा श्रीफीरोजगान्धिनोऽपि लोकसभायाः सदस्यत्वेन निर्वाचितास्तदैव सा सातत्येन दिल्ल्यां स्थातुमपारयत्। प्रधानमन्त्र्यावासे समागतानामतिथीनामातिथ्य-सम्पादनेषु प्रावीण्यं भजन्तीन्दिरामहाभागा समागतै राजनयिकैर्महापुरुषैर्देश-विदेशेभ्य उपागतैर्विशिष्टजनैः सह परिचयमपि प्राप्नोति स्म। आगन्तु-

कानामातिथ्यविधाने तेषां रुचीनां सौक्ष्म्येण परिज्ञानं तथा यथाकालं यथेच्छं भोज्यादिव्यवस्थापनं च विदधतीन्दिरागान्धीमहाभागा नितरां व्यस्ताऽपि नानाविधाननुभवान् प्राप्य मोदते स्म। ईदृशं व्यावहारिकं प्रशिक्षणं तया स्वानुभवादेव सम्प्राप्तं तस्मिंश्च सर्वहृदयहारि नैपुण्यञ्चासादितम्।

स्वयं प्रयासादुपलब्धबोधाः कुत्रापि तान्तिं न भजन्ति लोकाः।
सर्वास्ववस्थासु समानभावास्ते सर्वदैवानुभवन्ति सौख्यम् ॥३३॥

१९४९ ई० वर्षस्याक्टूबरमासे श्रीजवाहरलालमहाभागाः श्रीमत्येन्दिरामहानुभावया सह प्रथमवारममेरिकायात्रायै गताः। तत्रास्माकं प्रधानमन्त्रिणो राष्ट्रपतिश्रीट्रूमैनमहाभागै राजकीयातिथिरूपेणामन्त्रिता आसन्। श्रीमतीन्दिरा तत्र व्याख्यानयात्राप्रसङ्गादागतवत्या श्रीमत्या कृष्णाहठीसिंहमहाभागया सह स्वतन्त्ररूपेणामेरिकाया दर्शनीयानि स्थलानि तथा विशिष्टान् राजकीयान् सांस्कृतिकान् कार्यक्रमान् विलोकयन्ती तत्रत्यैः कैश्चिद् विशिष्टजनैः सह मैत्रीं सम्पाद्य प्रासीदत्। तदानीं तस्या अपूर्व-निरीक्षण-क्षमत्वस्य कारणादेव सा यदा कदापि पुनस्तानि दृष्टचराणि स्थानानि तथा दृष्टपूर्वाञ्जनान् पश्यति स्म तदा तत्क्षणमेव पूर्णतया तान् परिचिनोति स्म।

श्रीमतीन्दिरैका वत्सला माताऽवर्तत। स्वकीययोरुभयोरपि पुत्रयोः पालनाय पोषणाय च यावच्छक्यं समयं प्रददाति स्म। सा स्वस्या एकाकिनो बाल्यजीवनस्य वार्तां न व्यस्मार्षीत् तस्मादेव राजीव-सञ्जयौ कदाप्येकाकित्वमनुभावयितुं नैवावाञ्छत्। श्रीफीरोजमहाभागोऽपि स्वीयौ पुत्रौ हृदयेन वाञ्छन् समर्पितः पिताऽऽसीत्। स ताभ्यां क्रीडनकानि निर्माय तन्माध्यमेन तयोरभियन्त्रविषयिणीं रुचिमुद्बोधयति स्म। प्रत्येकं वस्तुनो वियोजनस्य संयोजनस्य च कर्मणि स तौ निरन्तरं प्रोत्साहयति स्म। स हि स्वीयावुभावपि पुत्रावभियन्तारौ भवेतामित्यभ्यलषत्, तदीयाभिलाषानुरूपमेव च तौ (राजीव-सञ्जयौ) युवत्वमाप्याभियान्त्रिकव्यवसायमेव स्व्यकुरुताम्।

भारतस्य समस्यानां समाधानाय सन्ततं प्रयत्नशीलाः श्रीजवाहरनेहरूमहाभागाः काङ्ग्रेसनेतृषु बहूनां मृत्योः कारणादेकाकितामनुभवन्तः प्रायः श्रीमत्येन्दिरागान्धी-महाभागया सह परामर्शानकार्षुः। देशे विदेशे च याः सन्धिवार्ता भवन्ति स्म, तासां कूटनीतिकचर्चाणां प्रसङ्गेषु पर्यवेक्षिकात्वेन निरन्तरमुपस्थित्याः परिणामात् तस्याः परिज्ञानमतीव परिष्कृतं प्रौढं विकसितं तथा स्पष्टमभूत्, तदर्थमेव श्रीजवाहरलालमहाभागास्तस्या निर्णये विश्वसन्ति स्म।

१९५० ई० वर्षादेव सङ्घनिरपेक्षता-नीतेः कारणाद् भारताय विश्व एकैदृशी प्रतिष्ठोपलब्धाऽभूद् या हि सम्भवतस्तस्य सञ्चितशक्तेस्तथाऽऽर्थिकसंसा-

धनानामुपगतेर्दूरेऽवर्तिष्ट । तस्या नीतेः कारणादेव विश्वस्य विभिन्नै राष्ट्रै-स्तन्नेतृभिश्च साकं भिन्न-भिन्नया रीत्या सम्पर्कसाधनमावश्यकमभूत्। तदाधारेणैव श्रीमतीन्दिरागान्धी कूटनीतेः सर्वोत्तमपक्षानन्तरङ्गतयाऽवलोकितुमवसरानलभत। **श्रीसुकर्णो-हट्ट-च्यांगकाईशेक-दम्पती-ट्रूमैन-दम्पती-**प्रभृतयो महत्यो विभूतयस्तस्याः परिचय-परम्परायां प्राथम्यमभजन्। १९५१ ई० वत्सरे भारतीयानां जीवनस्तरस्याभ्युन्नयनाय तथा समाजवादपद्धत्याः कल्याणकारिणि राज्ये विश्वसतां श्रीजवाहरलालनेहरूणां प्रभावात् प्रयासाच्च पञ्चवर्षीयाणां योजनानां प्रारम्भोऽक्रियत तथा च महता परिमाणेनोद्योग-कृषि-परियोजनादयोऽपि तासु प्राचलन्। तासां परियोजनानां विलोकनाय श्रीमतीन्दिराऽपि गच्छति स्म तथा तथ्यमिदं हृदयङ्गमं विदधाति स्म यद् देशस्य केन प्रकारेण कायाकल्पो भवतीति। तादृशेभ्यः कार्येभ्य इन्दिरागान्धीमहाभागाऽपि तेषामादर्शाणामनुरूपाणि कार्याणि कर्तुं प्रेरणा अगृह्णात्।

नवीनसंविधानानुसारं प्रथमं महानिर्वाचनं १९५२ ई० वर्षे सम्पन्नम्। स्वदेशस्य सेवायां सङ्घर्षकालादेव तत्परस्य काङ्ग्रेसदलस्य विजयाय स्वयं श्रीजवाहरलालनेहरूमहाभागास्तथा श्रीमतीन्दिरागान्धीमहाभागाऽहर्निशं निर्वाचनयात्रा अकुर्वन्। यत्र तत्र स्वतन्त्रप्रत्याशिनामाग्रहाच्छ्रीमतीन्दिराऽपि निर्वाचनोपयोगीनि भाषणान्यकार्षीत्। निर्वाचनारम्भात् पूर्वमेवोत्तरप्रदेशस्य प्रदेश-काङ्ग्रेससमित्या श्रीमतीन्दिरा राज्यविधानसभायै प्रत्याशित्वाय निवेदिता परं तया स्वयमेव निषिद्धम्। सा समाजसेवा-कर्मण्येवानुरक्ताऽऽत्मनि सुखमविन्दत्। श्रीमतीन्दिरा भारतीय-सङ्गीत-नृत्ययोः कृते तथा विशिष्य भारतीयबालचलचित्राणां विकासाय च विशिष्टानां संस्थानां स्थापनामप्यकरोत्। सहैव सा '**भारतीय-बाल-कल्याण-परिषद**'स्तथा भारतशासनस्य '**केन्द्रीय-समाज-कल्याण-सङ्घस्य**' सदस्याऽप्यासीत्। श्रीजवाहरलालनेहरूमहाभागानां कृतेऽपि सा तदानीं प्रत्यक्षतो राजनीतौ प्रवेष्टुं नैच्छद् यतस्तेषामावासे समागच्छतामतिथीनां स्वागत-सत्काराणां व्यवस्थां सैव निर्वहति स्म।

निर्लोभं जनता-जनार्दन-जगत्-सेवार्थमेवानिशं,
स्वात्मानं सुसमर्प्य किञ्चिदपरं सौख्यं हृदा नेच्छताम्।
सत्यानि श्रयतां हितं विदधतां सेवासु लीनात्मनां,
शश्रूषा-सरणिः परंव विरला धन्या क्षितौ राजते ॥३४॥

श्रीमतां नेहरूणां श्रीमतीन्दिरा तदानीमेकाकिनी विश्वस्ता सहायिका, जन-सम्पर्काधिकारिणी तथा सौविध्यप्रेक्षिका सेविकाऽऽसीत्। १९५२ ई० वर्ष एव यदा **श्रीमती रूजवेल्ट** समागता तदा श्रीमतीन्दिरा स्वीयेन समुचितव्यवहारेणताममोहयत्। विश्वस्य महान्तो नेतारस्तदा त्रिमूर्तिभवनमागच्छन्ति स्म। **नेहरू-**

परिवारस्य विश्वेन सह सम्पर्कः सुतरां वर्धमान आसीत्। १९५३ ई० वत्सरस्य **मईमासे** श्रीनेहरूभिस्सह श्रीमतीन्दिरा **महाराज्ञ्या एलिजाबेथ**—द्वितीयस्या राज्यारोहणसमारोहे लन्दनमगच्छत्। तत्रापि सा स्वीयेन प्रभाविना व्यक्तित्वेन शालीनतया च तामप्यमोहयत्। ततः प्रत्यावर्तनकाले श्रीमतीन्दिरा स्वतन्त्ररूपेण प्रथमवारं **सोवियतसङ्घस्य** तथा **स्कैण्डिनेबियाई**-देशानां यात्रामकरोत्। यत्र तया श्रीनेहरूणां भाविन्या यात्रायाः पृष्ठभूमिः सज्जिता। तदानीं सा यया विधया रूसवासिनां मनांस्यमोहयत् तद्विषये समुल्लेखयता रूसदेशे भारतस्य तात्कालिकेन राजदूतेन श्रीमता के० पी० एस० मैनन्-महाभागेन लिखितमासीद् यद्—"श्रीमतीन्दिरैकेदृशी व्यक्तिरस्ति यस्याः सौन्दर्यं वैयक्तिकमप्यस्ति तथा समष्टिगतमपि सा च स्वीयं सम्मोहमपि न जानाति।"

१९५४ ई० हायने सा श्रीजवाहरलालैः सह चीनदेशस्य यात्रामकरोत्। ततः परमिण्डोनेशियायां सम्पद्यमाने बाण्डुंग-सम्मेलनेऽप्यगमत् तत्र च सा पितृभिः सह स्वयं विश्वस्य प्रतिनिधिभिः परिचयमकार्षीत्। तदानीमेशियाऽफ्रीका-देशयोरनेके नेतारोऽन्ताराष्ट्रियेषु प्रसङ्गेषु श्रीमत्या इन्दिरागान्धी-महाभागायाः परिज्ञानेन निग्रहणशक्त्या च भृशं प्रभाविता अभूवन्। वस्तुतस्तत् सम्मेलनमिन्दिराया अन्ताराष्ट्रियेषु विषयेषु तस्याः परिज्ञानस्य दीक्षान्तसमारोह आसीत्। तदनन्तरं सा पुनरपि रूसदेशस्य यात्रामकरोत्। तत्र षोडशदिनानि स्थित्वा तत्रत्यं जनजीवनं यान्त्रिकं विकासं जनप्रदर्शनानि निकटवर्तीनि क्रीमिया-जार्जिया-ताशकन्द-समरकन्द-प्रभृतीनि स्थलानि नगराणि चालोकयत्। तस्या यात्राया अनन्तरमेव तयाऽनुभूतं यद् रूसदेशो भारतस्य महत् सत्यं च मित्रमस्तीति।

१९५५ ई० वर्ष एव श्रीमतीन्दिरा काङ्ग्रेसकार्यकारिण्याः सदस्यात्वेन वृता किञ्च ततः परं काङ्ग्रेसनिर्वाचनसमितेः सदस्या तथा भारतीय-काङ्ग्रेस-समिते राष्ट्रियैकतापरिषदोऽध्यक्षाऽपि निर्वाचिता। काङ्ग्रेसस्य राजनीतौ श्रीमतीन्दिरागान्धी पितृभ्यः श्रीजवाहरलालनेहरूभ्यः किञ्चिदधिका वामपथस्यानुयायिन्यासीत् तदनुसारमेव सा स्वीयं समर्थनमपि करोति स्म। १९५७ ई० वत्सरे सा 'इलाहाबाद-काङ्ग्रेस-समिते'रध्यक्षाऽभूत्। तस्मिन्नेव वर्षे तया व्यापिने निर्वाचनाय समग्रस्य देशस्य निर्वाचनयात्रा अपि विहिताः। श्रीलालबहादुरशास्त्रिणस्तदानीं रैलमन्त्रिणो निर्वाचन-प्रभारिणश्चावर्तन्त। श्रीशास्त्रिणः श्रीजवाहरलालमहाभागानां कार्यभारं बहुधा स्वयं स्वीकृत्य निर्वहन्ति स्म। प्रत्याशिनां विषये श्रीमतीन्दिराऽपि तैस्सहातिनैकट्येन कार्याण्यकरोत्।

□

[६]

लक्ष्मी-कला

दायित्व-पूर्णस्य पदस्य गौरवम्

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्म-मालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

—श्रीसूक्त० १२।

पूर्वैर्वंश्यजनैः पवित्रधरणौ न्यस्ता पुरा या शिला,
तत्राग्र्यैः स्वपराक्रमैः सुरुचिर-प्रासाद आरच्यताम्।
सर्वेषामियमेव भाति रुचिराऽऽकाङ्क्षा हृदब्जे यतः,
'सन्तत्या इदमेव सात्त्विकसुखं यत्सा यशोऽर्जयेत्' ॥१॥

काङ्ग्रेसदलस्याध्यक्ष्यपरम्पराऽपि नेहरूपरिवारस्यैकाऽपूर्वा घटना मन्यते। स्वस्य बुद्धिवैशद्येन राष्ट्रसेवानिष्ठया त्यागेन तथा कार्यनिर्वहणक्षमत्वेन क्रमशः पं० मोतीलालमहाभागास्तथा श्रीजवाहरलालमहानुभावाः काङ्ग्रेसाध्यक्षपदममण्डयन्। १९५१ तः १९५४ ई० वत्सरपर्यन्तं प्रधानमन्त्रिपदेन सहैव काङ्ग्रेसदलस्य नेतृत्वमप्यध्यक्षरूपेण श्रीजवाहरलालमहाभागैरेव निर्व्यूढम्। १९५५ तः १९५८ ई० पर्यन्तं श्रीढेबरमहाभागा आध्यक्ष्यं स्वशोभयन्। १९५९ ई० वर्षस्यारम्भे श्रीढेबरमहोदयाः काङ्ग्रेसाध्यक्षपदमत्यजन्। जनवरीमास एव काङ्ग्रेसस्य नागपुरेऽधिवेशनं सम्पन्नं यस्मिन् सहकारिकृषेः प्रस्तावः स्वीकृतस्तथा समाजवादप्रजातन्त्रे काङ्ग्रेसदलं स्वलक्ष्यरूपेणाङ्ग्यकरोत्। तदानीं नवीनं रक्तमानेतुं बहुशश्चर्चितम्।

काङ्ग्रेसस्यानेके नेतारः श्रीमत्या इन्दिरागान्धीमहाभागाया नाम काङ्ग्रेसदलस्याध्यक्षतायै प्रास्तुवन्। श्रीजवाहरमहाभागाः प्रस्तावमिमं श्रुत्वा किञ्चिद् विस्मिताः परमन्ते तैर्निर्णीतं यदस्मिन् विषये ते स्वप्रभावस्याल्पमप्युपयोगं न करिष्यन्तीति। महता काठिन्येन श्रीमती गान्धी प्रसादिता यत्ता नियोजनपत्रं पूरयेयुः। तेषु दिवसेषु नेतृणां जनसम्पर्काय पदयात्राः प्रवर्तिता आसन्। श्रीमतीन्दिरा स्वपितॄणां निर्वाचनक्षेत्रस्य यात्रायां व्यस्ताऽऽसीत्। तदैव २ फरवरी १९५९ ई० दिने साऽज्ञासीद् यत् सा काङ्ग्रेसाध्यक्षाय निर्वाचितेति। स्वपितृपादानामिवैव साऽपि केवलं द्वाचत्वारिंशद्वर्षाणामपरिपक्वे वयसि तादृशे महति पदेऽभिषिक्ताऽभूत्। नेहरूपरिवारस्य सा तृतीयाकाङ्ग्रेसाध्यक्षावर्तत तथा महिला-

ध्यक्षासु सा चतुर्थी महिलाऽऽसीत्। इतः पूर्वं **'सरोजिनी-नायडू-एनीबेसेण्ट-नेलीसेनगुप्ता'**श्चेदमध्यक्षपदमशोभयन्।

श्रीमत्या इन्दिरामहाभागायाः साफल्येन सर्वेऽपि नितरां प्रासीदन्। फरवरीमासस्य नवमे दिने यदा काङ्ग्रेसस्य संसदीय-समित्या सर्वैः श्रीमतीन्दिरागान्धी महाभागा सम्मानिता तदा श्रीनेहरूमहोदयाः स्वस्याः स्नेहभागिन्याः सुतायाः साफल्यं वीक्ष्य मनस्याह्लादेन परिपूरिताः। तत्र तदीयस्वागते भाषमाणास्तेऽकथयन्—

"इन्दिरा मम पुत्री विद्यते तथाऽहं तस्यै स्निह्यामि। सम्भाव्यते यद्यहं तद्विषये स्वीयां सम्मतिं दद्यां तर्हि सा पक्षपातपूर्णा मन्येत, किन्त्वहं तस्या उत्तमे स्वभावे कार्यकरणशक्तौ सद्विचारे तत्परतायाञ्च गर्वमनुभवामि। सा मत्त उत्तराधिकारे कान् संस्कारान् प्राप्तवतीत्येतत् तु नाहं जाने; परं मम विचारोऽस्ति यत् सा सर्वान् सत्संस्कारान् स्वस्या मातुरेव प्राप्नोत्।"

भारतीयराष्ट्रिय-काङ्ग्रेसाध्यक्षपदं विभूषयन्तीन्दिरा स्वकीयप्रतिभायाः कर्तव्यपरायणतायास्तथा स्वदेशस्यावश्यकतानां प्रपूर्तेरवसरानलब्ध। यद्यपि तदानीन्तना विचारकास्तादृशसमुन्नतपदप्राप्तिमभिलक्ष्य कांश्चित् प्रश्नानुदभावयन्, तथापि सा **'क्रिया केवलमुत्तर'**मिति मन्वाना **'यत् स्वीकृतं तत्कथं सम्पादयेय'**-मित्येवं मनसि निर्णीय कर्मणि संलग्नाऽभूत्। सा प्रत्यहं कार्यालयं प्रातर्नववादनकाले गच्छति स्म, मध्याह्ने सार्धद्विवादनसमये गृहं परावर्तते स्म। स्वीये कार्ये नावीन्यमानयन्त्या तया प्रथमवारं सर्वेभ्यः काङ्ग्रेस-कार्यालय उद्घाटितः। प्रायः पञ्चाशत्सङ्ख्यातोऽप्यधिकाः सांसदा ईदृशा आसन् ये सायाह्ने तथा रविवासरेषु तत्रागत्य काङ्ग्रेसस्य कार्याणि साधयितुं सहभागिनो भवन्ति स्म।

यत्र स्वयं मान्यजनो विधत्ते, कार्यं तदा तत्र समेऽपि चान्ये।
कार्यं विना प्रेरणया प्रसक्ताः, कुर्वन्ति कर्माणि न तत्र चित्रम्॥२॥

आडम्बर-विहीने जीवनयापने श्रद्दधाना श्रीमतीन्दिरा गान्धी काङ्ग्रेसं प्रति जनताया विश्वासं दोलायमानमनुभूय तथा सन्तोषपूर्णां प्रगतिमानेतुं निश्चित्य काङ्ग्रेसस्य कार्यकारिण्यां परिवर्तनाय स्वार्थपूर्णैर्विवादैश्च पृथग्भूय कार्यं विधातुं सयत्नाऽभूत्। कार्यकारिण्यां तत एव तया प्रगतिशीलविचारवन्तस्तरुणा आनीताः। निःसङ्कोचं सा पं० श्रीनेहरूनपि कार्यकारिण्यां नाग्रहीत्। काङ्ग्रेसाध्यक्षपदग्रहणानन्तरं शीघ्रमेव श्रीमतीन्दिरागान्धीमहाभागा समग्रस्य भारतस्याकर्षणकेन्द्रतां प्राप्नोत्। तदीयैः कार्यैर्वामपथस्यानुयायिनः काङ्ग्रेसनेतारः श्रीकृष्णमैननप्रभृतयश्चापि विस्मितिमवाप्नुवन्। तद्वर्षस्यारम्भे यदा तिब्बत-प्रदेश उपद्रवा अभूवन् तदा सा दलाईलामा-महानुभावस्य महत्स्वागतमकार्षीत् किञ्च चीन-शासनस्य

दमननीतेः प्रत्यक्षरूपेणालोचनं तथा निन्दनमप्यकार्षीत् । जून-जुलाईमासयोः सा केरलस्य कम्यूनिस्ट-प्रशासनस्यापवारणायापि महान्तं योगमदात् । अन्ततश्च ३१ जुलाईदिने संविधानस्य ३५६ तमधाराया अनुसारं नम्बूदिरिपादशासनं समाप्तम् । तदनन्तरं तदीयप्रयासादेव केरलेषु काङ्ग्रेस-मुस्लिमलीगयोर्मैत्री साधिता काङ्ग्रेसाय च विजयश्रियः किरीटं प्रापितम् । यदा काङ्ग्रेस-मुस्लिम-लीगयोः समालोचनमभवत् तदा सा महाभागा स्पष्टतयाऽवादीद् यत् 'केरलेषु सकलाः साम्प्रदायिकाः सन्ति । तत्र नायराः सन्ति, यीशुधर्मानुयायिनो विद्यन्ते, एझावा वर्तन्ते तथा मुस्लिमा विद्यन्ते । अतो मुस्लिमदलं साम्प्रदायिकं नास्तीति ।'

तेष्वेव दिनेष्वेकं पारिवारिकं काठिन्यमपि श्रीमती गान्धी प्रापत् । श्रीफीरोज-गान्धीमहोदयः सहसैव हृद्रोगेणाक्रान्तोऽभूत् । श्रीमतीन्दिरा सर्वाणि कार्याणि विसृज्य पत्युः सेवायां संलग्ना । शीघ्रं स्वास्थ्यलाभाय सा तं महाभागं काश्मीराननयत् । अत्यधिकमुत्तरदायित्वपूर्णानां कार्यभाराणां स्थितावपि श्रीमतीगान्धी पितृन् प्रति पतिं प्रति च कर्तव्यानि विस्मर्तुं नाशक्नोत् । एतदतिरिक्तं सैकस्या स्नेहमय्या मातुरिव स्वीयौ पुत्रावपि निरीक्षितुं समुचितं निदर्शयितुं च न व्यस्मार्षीत् ।

श्रीफीरोजमहानुभावः स्वास्थ्यमलभत । ततः परं भूयोऽपि सा काङ्ग्रेस-दलस्य कार्ये सन्नद्धाऽभवत् । श्रीफीरोजमहोदयोऽपि संसदः कार्येषु प्रावर्तत । श्रीमतीन्दिरा तेषु दिनेषु प्रधानमन्त्रिण आवास एव वसति स्म किञ्च साऽभि-लषति स्म यत् फीरोजमहाभागोऽपि तत्रैव वसेत्, परं स्वतन्त्रतन्त्रानुरागिणे तस्मै तथा नारोचत । सांसदेभ्यः प्राप्यमाणे भवने स वस्तुं प्रवृत्तः केवलं भोजनार्थं तत्रावश्यमायाति स्म । स हि महानुभावः सिद्धान्तप्रिय आसीत् तदीयमभिधानं समग्रेऽपि देशे कर्मठतायै तथा निःस्वार्थचर्चायै प्रसिद्धमभूत् । श्रीमतां नेहरूमहा-भागानां स हृदयेन सम्मानं करोति स्म तथा श्रीमत्येन्दिरया पुत्राभ्यां च परमं प्रेमाधारयत् । काङ्ग्रेसदलस्य स एकल एवेतादृशः सदस्य आसीद् यो हि काङ्ग्रे-सस्य नीतीनां स्वयं श्रीमतां नेहरूणाञ्चालोचनेऽपि निःशङ्कतामेव स्व्यकार्षीत् ।

काङ्ग्रेसाध्यक्षपदे वर्तमानायाः श्रीमतीगान्धीमहाभागायाः कार्यभारो-ऽतितरां प्रवृद्ध आसीत् । सा पितुः पत्युः पुत्रयोरात्मनः समाजस्य देशस्य च कार्येषु संलग्नमानसा निरन्तरं स्वीयया प्रतिभया श्रमेण चावश्यकानि कार्याणि साधयति स्म । नवनवा आयोजनाः कार्यकलापा अपि तया काङ्ग्रेसस्य माध्यमेन स्वदेशहिताय प्रवर्तिताः । विस्थापितानां व्यवस्थापनाय, मुस्लिमानां समस्याः समाधानाय, विदेशिनामत्यल्पसङ्ख्यकानाञ्च काठिन्यवारणाय, पत्रकाराणां सम्प-र्काय च विभिन्नाः कार्यालयास्तयोद्घाटच सर्वेषां सुव्यवस्थाः सम्पादिताः । उड़ीसामतिरिच्य प्रायः सर्वेषां राज्यानां सम्पर्कयात्राः साऽकरोत् । यदा साऽत्य-धिकं पीडाकारिणा रोगेण भृशं पीडिताऽवर्तत तदाऽपि तया विश्रान्तिर्नेप्सिता ।

अश्मरीरोगस्य परिज्ञानमपि तदीयनिर्वाचनाद् द्वित्रदिनपूर्वमेवाभूत्। काङ्ग्रेसस्याग्रिमायोजनाय विचारगोष्ठ्या आयोजनं, कार्यकर्तॄणां प्रशिक्षणं, सम्पर्काभिवृद्धये पदयात्रास्तथा काङ्ग्रेस-दले वर्तमानस्यर्णस्यापाकरणं धनादिसङ्ग्रहाश्चेत्यादयस्तस्या ईदृशाः प्रयासा आसन् ये स्वल्पकाल एव तां विश्वस्तां कार्यक्षमां बुद्धिमतीं बहुमुखप्रतिभासम्पन्नां परमोच्चनेत्रीं च प्रमाणयितुमलमभूवन्।

१५ अगस्त १९५९ ई० दिने स्वतन्त्रतादिवसमुपलक्ष्य तया सन्दिष्टं यत्—"पर्वतारोहणे जनो यावदूर्ध्वं गच्छति, यात्रा तावत्येव दुस्तरा भवितुं प्रवर्तते तथा मार्गः सङ्कुचितोऽभिमुखारोहवांश्च भवति।" दुर्भाग्यवशात् तदा साऽप्यनुभूतवती यत् काङ्ग्रेसदलं तया सहारोढुं सम्मतं नासीत्। सा हि महाभागा तदानीमान्तरिक-विषयाणां समाधानेषु तथा राष्ट्रियेषु प्रकरणेष्वपि ध्यानमदात्, यथा—'उपनिवेशवादविरोधिन आन्दोलनाय काङ्ग्रेसस्य समर्थनं, अफ्रीकार्थं भारतीयपरिषदो निर्माणं, दक्षिणाफ्रीका-ब्रिटिशन्यासालैण्डयोर्जातिवादस्य भर्त्सनं च।

एवं सत्यपि चीनस्याक्रमणेन तिब्बतस्य च बलान्निगरणेन दलाईलामा-महोदयेन साकमागतानां परस्सहस्राणां तिब्बतवास्तव्यानामावासव्यवस्थया चीनस्य भारतेन सह विरुद्धप्रवृत्त्या चाहतानां श्रीजवाहरलालनेहरूमहाभागानां तादृश्यां स्थितौ श्रीमतीन्दिरा तेषां साहाय्यमावश्यकमाकलय्य निरन्तरं तैः सह स्थातुं निर्णीय च काङ्ग्रेसाध्यक्षपदमत्यजत्।

श्रीफीरोजगान्धि-महोदया अपि रक्तचाप-रोगेण पीडिता आसन्। ते चिकित्सकैः प्रेरिता अपि विश्रामं न गृह्णन्ति स्म। सर्वदा लोकसभायां वादाय स्वाध्यायपूर्वकं सज्जा भूत्वा गच्छन्ति स्म। एकदा पूर्ववदेव संसद्युपस्थिताय प्रकरणाय तर्कानुपस्थापयितुं विषयसामग्रीमधीत्य च शयनमकार्षुः। प्रातर्वक्षसि काचित् पीडाऽजायत, परं तामुपेक्ष्य यथावत् कार्याण्यकुर्वन्। २ सितम्बर १९६० ई० दिने चिकित्सकाय सूचितं तदापि तेन विश्रामाय निवेदितं किन्तु तदप्युपेक्षितम्। पञ्चदिवसानन्तरं पीडाया आधिक्येन स्वयं मृत्तैलयानं सञ्चाल्य ते चिकित्सावासं गतास्तत्र च हृद्रोगेणाक्रान्ताः। श्रीमती गान्धी तदा केरलेष्ववर्तत। वृत्तं श्रुत्वा सद्य एव परावृता शुश्रूषायां च संलग्ना। परं ८ सितम्बर १९६० ई० दिनस्योदयात् पूर्वमेव तस्या हस्तं स्वहस्ते गृहीता एव ते प्राणानत्यजन्। इत्थमेकः स्पष्टवक्ता निर्भीको भारतस्याभ्युदयाय समर्पितः कुशलः प्रशासको नवोदितस्य राष्ट्रस्य हितचिन्तकोऽसमय एव प्रयातः।

श्रीमत्या इन्दिरायाः हृदयमेव त्रुटितम्। श्रीनेहरूमहाभागा भृशं खिन्ना अभूवन्। सर्वेऽपि शोकाकुला आसन्। अहो दैवगतिश्चित्रा!!!

सत्यं श्रित्वा शुचितमपथे केवलं राष्ट्रसेवां,
कर्तव्यं स्वं मनसि नियतं मन्यमानान् विधाता।
नित्यं नीत्याऽखिलमपि निजं जीवनं याप्यमाना—
नीर्ष्याग्रस्तः स हि न सुखितान् प्राणिनो द्रष्टुमीष्टे ॥३॥

'शोकाकुलं मानसं मुहुर्मुहुरन्तरेवान्तर्व्यथयति। प्राचीनाः स्मृतयो वीचय इवोच्चावचतां प्राप्य विचारान् दोलायन्ते। निश्चेष्टतया तु ता अतितरां प्रवर्द्धन्ते। तस्यामवस्थायां किङ्कर्तव्यतया विमूढता शरीरं दुनोति।' अत एव यथा-कथञ्चिदात्मानं धारयन्ती श्रीमतीन्दिरा गान्धी सचेष्टतामेवैकं शरणं मत्वा वर्षाभ्यन्तर एव स्वां व्यस्तयितुं पुना राष्ट्रसेवायां निरताऽभूत्। सर्वेऽपि पूर्वे राजनीतिका गतिविधयः प्रारब्धाः। श्रीफीरोजस्य देहावसानात् कतिपयमासानन्तरं सा **'मैक्सिको'**-यात्रां व्यदधात्। ततः साऽमेरिकायामगच्छद् यत्र सा **'येल-विश्व-विद्यालये'** हालैण्ड-स्मृति-व्याख्यानान्यददात्।

१९६२ ई० वर्षे भारते महानिर्वाचनानि सम्पन्नानि, तेषु सा दलाय च्छन्दाकलनप्रचारमकरोत्। आसीत् सा तदानीं काङ्ग्रेसदलस्य 'राष्ट्रियैकता-परिषदोऽध्यक्षा।' सा साम्प्रदायिक-सद्भावस्य धर्मनिरपेक्षतायाश्च नीत्यै महत्त्वं दिशन्ती जबलपुरस्य साम्प्रदायिकोपद्रव-पीडितेभ्यः शान्तिपूर्वकं समन्वयाय तत्रागच्छत्। तस्मिन्नेव वर्षे पितृभिः सहाफ्रीकादिराज्यानां यात्रामकार्षीत्। अयमेवावसर आसीद् यदा सा यथा-प्रसङ्गं 'जोयोकेन्यास-मिल्टनओबोटे-जूलियसन्येरेरे—कैनेडी'-प्रभृतिभिः शासनप्रमुखैरपि मिलिता। १९६२ ई० वर्षे श्रीमतीन्दिरा गान्धी यूनेस्कोस्थस्याधिशासिमण्डलस्य सदस्याऽभवत्।

१९६२ ई० वर्षस्याक्तूबरमासे तिब्बतस्य कारणात् प्रायो विंशतिसहस्र-मिताश्चीनसैनिकाः सेला-दर्रा-मार्गतो भारतं प्रविष्टास्तत्राक्रमणेन ते भारतस्य पूर्वोत्तर-सीमप्रदेशस्य चतुर्दशसहस्रवर्गमीलमितं क्षेत्रं स्वायत्तमकुर्वन्। भारताय सैनिक-पराजयस्य तथा घोराया विपदः कारणात् प्रधानमन्त्रिणो भृशमाहताः। चीनानां विश्वासघातेन दुःखितास्ते स्वकर्तव्यं पालयन्तः समग्रं राष्ट्रमेकताबद्धतया शत्रोः साम्मुख्याय प्रैरयन्। तदैवेन्दिरामहाभागाया आध्यक्ष्ये 'नागरिकसुरक्षा-समितिः' संयोजिता तद्वदेव च सर्वत्र स्थानीयाः सुरक्षासमितयोऽपि सङ्घटिताः। श्रीमतीन्दिरा सङ्कटग्रस्तेषु क्षेत्रेषु तेजपुर-जहालपुरादिषु गत्वा जनानां सैनिकानाञ्च मनोबलं विश्वासञ्चावर्धयत् साहाय्यार्थं च खाद्यसामग्रीमूर्णावस्त्राण्यौषधय आवश्यकान्युपकरणानि च प्रेषयितुं सन्नद्धाऽभवत्।

☐ श्रीनेहरूणां महाप्रयाणम्

पूज्येभ्यः स्वपितृभ्य आप्य बहुशो देशानुरागाश्रितान्,
संस्कारान् परमोच्चनैष्ठिक-तपस्त्यागादिभिः सन्ततम्।

ये सम्पाल्य ततोऽधिकं शुभयशःस्तोमं श्रिताः संसृतौ,
मान्यास्तेऽत्र जवाहराऽभिधवरा देशार्थमेवार्पिताः ॥४॥

न जाने केन कारणेन चीनाः सहसैकपक्षीयं युद्धविराममघोषयँस्तथा विजितात् क्षेत्रात् सेनां प्रत्याहरन् । किन्त्वसामयिकेन च्छलेन विश्वासघातेन खिन्नाः श्रीजवाहरलालमहाभागा अत्यन्तं चिन्तितास्तथा प्रत्यहं नव-नवाना-मागतानां समस्यानां समाधानाय संलग्नाः स्वास्थ्यं प्रति निरपेक्षतया चान्तरे-बान्ता रोगाक्रान्ता अभूवन् । श्रीमती गान्धी तदानीं स्वपितृपादानां सेवा-शुश्रूषासु सर्वात्मना सन्नद्धासीत् तथा गार्हस्थ्यस्य भारमपि सा यथावन्निर-वहत् । अप्रैलमासे सा न्यूयार्कस्य विश्वमेलके सम्मिलितुमगात् । तेषु दिनेषु **'कामराजयोजना'**या अपि प्रभाव आसीत् । श्रीनेहरूणामस्वास्थ्यस्यान्यानि कारणान्यप्यासन् येषु "श्रीकृष्णमैनन्महोदयस्य रक्षामन्त्रिपदाद् विमोचनं, सर्व-कारीयकर्मसु शैथिल्यं, महात्मनां श्रीगान्धिनां नीतेर्दूरे वर्तनं, सत्यामपि स्वतन्त्र-तायां वैदेशिकपद्धत्यैव भारतीयानां जीवनयापनार्थमाग्रहस्तथा वास्तविक-समाज-वादार्थिकनीतिभ्यां परा व्यवहरण"-मित्यादीनि मुख्यान्यभूवन् । नानाविधा-भिरालोचनाभिरुत्तेजितास्ते काङ्ग्रेसस्य भाविन्यधिवेशने स्वासामार्थिकयोजना-सम्बन्धिनीनां नीतीनां समर्थनाय दृढं निश्चित्य च १९६४ ई० वर्षस्य जनवरी-मासे भुवनेश्वरे सम्पद्यमानेऽधिवेशने पठनाय भाषणमलिखँस्तत्र गत्वा चापठन् । भाषणस्य समुचितः प्रभावो व्याप्तः परं तत्पूर्तेः प्रागेव ते सहसा पक्षाघातेन पीडिता अभवन् । देहल्यामानाय्योपचारात् ते शनैः शनैः स्वस्थतां प्राप्ताः ।

आसीत् तेष्वक्षयः शक्तेर्भाण्डागारस्त तथा साहसस्यापि नाभून् नैयून्यम् । तथाऽप्यन्तशैथिल्यं तु वर्तत एव । अप्रैलमासारम्भे ते भाषणप्रदानमप्यारभन्त । मोहमय्यां काङ्ग्रेसस्यैकस्यामुपवेशन्यामिन्दरया सह ते गत्वा १८ मई दिवसे ततः परावृत्ताः । ततः परं ते देहरादूनं प्रस्थितास्तथा पूर्ववदेवान्यप्रवृत्त्या सहैव सम्मा-न्याया **आनन्दमय्या** मातुर्दर्शनार्थमपि द्वित्रवारमगच्छन् । ततः २६ मई दिने देहली-मायाताः । 'पालम'वायुयानावतरणस्थले श्रीलालबहादुरशास्त्रिणस्तेषां स्वागतं व्याहरन् । २७ मई दिने प्रातस्ते जागृताः परं किञ्चिद्वैकल्यमनुभवन्तः पुस्तकपठने प्रवृत्ताः शैथिल्यमनुभूय च विष्टरे शयिताः । चिकित्सका उपेताः । श्रीमतीन्दिरा-गान्धीमहाभागा तेषां प्राणरक्षार्थं स्वीयं रक्तं दातुमपि प्रार्थितवती, किन्तु दैवं किमप्यन्यदेव चेष्टते स्म । मध्याह्ने द्विवादनासन्ने काले तेषां रक्षणप्रयासा वैफल्यं गताः । ते महायात्रायै प्रयाताः....एकः प्रकाशपुञ्जो निर्वाणं प्राप्तः.... । देशस्य विदेशस्य च सर्वोऽपि नेतृवर्गः प्रशासकगणस्तेषां परिचितवर्गश्च कोऽपीदृशो नावर्तत यस्तेषां महाप्रयाणमाकर्ण्य हार्दं दुःखमनुभवन् प्रवहन्नश्रुनेत्रो नाभूत् ।

व्यक्तित्वस्य बलेन पूर्ण-निचितान् विद्या-विवेकाञ्चितान्,
सामञ्जस्य-समन्वितान् दृढमतीन् कर्म-प्रभावादिभिः ।

नीत्या स्पष्टतरान् प्रशासनपटून् श्रीनेहरून् विद्वरान्,
श्रुत्वा हन्त ! दिवङ्गताञ्जगदभून्मग्नं विषादाम्बुधौ ॥५॥
राष्ट्रेऽभूद् वज्रपातो नृपनयकुशलाः कर्मठा दीप्तिमन्तो,
नक्षत्रा देशभक्ताः प्रतिपदमुदिताः सर्वदा जागरूकाः ।
कालस्याङ्के प्रसुप्ताः सकलमपि जगच्छोकसिन्धौ विमुच्य,
प्रेयांसस्त्यागनिष्ठाः सुविमलयशसो हन्त ! नेतृप्रवीणाः ॥६॥

श्रीजवाहरलालनेहरूमहाभागानां महायात्राया अन्तिमानि दर्शनानि प्राप्तुं भारतीया अत्यन्तं व्याकुलास्त्रिमूर्तिभवने पयसां पूर इवोपागच्छन् । विश्वस्य राष्ट्रनायकाः प्रमुखा नेतारोऽप्यात्मनः प्रियाय सुहृदेऽन्तिमं श्रद्धाञ्जलिमर्पयितुमुपातिष्ठन् । सम्पूर्णं राष्ट्रं स्तब्धमासीत् । सप्तदश-वर्षाणि भारतस्य प्रधानमन्त्रिपदं विभूषितवतां श्रीनेहरूणां दूरदर्शिता, स्वदेशं प्रत्यगाधोऽनुरागः, कुशलं नेतृत्वं निरन्तरं परिश्रमं च संस्मरन्तस्तेभ्योऽन्तिमं विदायमदुः । दाहसंस्कारः श्रीमता **'राजीवगान्धि'**ना विहितः । तेषां भस्मावशेषः प्रयागे गङ्गायां तथा राष्ट्रस्य कृषिक्षेत्रेषु तेषामिच्छानुसारमेव विसर्जितः । तेषां दाहस्थलं 'शान्तिवन'-नाम्ना राष्ट्रतीर्थमिव सर्वैः श्रद्धेयं तथा वन्दनीयं देहल्यां यमुनायास्तट-निकट-वर्तिनि क्षेत्रे चिरं विराजते ।

श्रीमतां जवाहरलालनेहरूणां स्वर्गप्रयाणानन्तरं मन्त्रिमण्डलस्यापातिकमुपवेशनमाकारितं तथा वरीयस्त्वक्रमं विचिन्त्य **'श्रीगुलजारीलालनन्दा'**-महाभागः कार्यवाहकप्रधानमन्त्रिपदे ससम्मानं प्रतिष्ठापितः ।

श्रीमतीन्दिरागान्धीमहाभागा पूज्यानां पितृचरणानामसामयिकेन स्वर्गप्रस्थानेनातितरां शोकाकुलाऽवर्तिष्ट । तस्याः परमस्नेहभाजां पितॄणां सहसा स्वःप्रयाणेनासह्यं कष्टमनुभवन्त्यपि श्रीलालबहादुरशास्त्रिणां सम्मत्यनुसारं सर्वाण्यप्यौर्ध्वदैहिकानि कर्माणि समसाधयत् । श्रीनेहरूमहाभागैः स्वीये 'मृत्युपत्रे' यत् सूचितमासीत्तस्यापि पूर्णरूपेण पालनं तया विहितम् । श्रीमत्या इन्दिरायाः कष्टं न केवलं तस्या एवापि तु सकलस्यापि भारतस्याभूद् यतः स्वयं श्रीनेहरूमहाभागा अपि भारतीयेभ्य आत्मानं कदापि पृथङ्नामन्यन्त । तैः स्पष्टमेवात्मनोऽन्तिमे पत्रे लिखितमासीद्—

"अहं, तस्मिन्नुत्तराधिकारे योऽस्माकं विद्यते, गर्वमनुभवामि तथाऽहं वार्तामिमां जानामि यदस्मासु प्रत्येकमिवाहमपि तस्या अविच्छिन्नायाः शृङ्खलाया योजकाङ्गमस्मि यस्य प्रारम्भो भारतस्याविस्मरणीयेऽतीते इतिहासस्य प्रातः कालेऽभूत् । तां शृङ्खलामहं विच्छेत्तुं नाभिलषामि, यतोऽहं प्रेरणां गृह्णामि । किञ्च मम मनसाऽस्या इच्छायाः साक्ष्यरूपे तथा भारतस्य सांस्कृतिकन्यासाय ममान्तिम-श्रद्धाञ्जलिरूपेऽहमनुरुणध्मि यन्मम भस्मन एका मुष्टिका प्रयागे (इलाहाबादे) गङ्गायां प्रक्षिप्येत, यतः सा तस्मिन् महासागरे गच्छेद् यो भारतस्य चरणं स्पृशति ।

परं मम भस्मनोऽधिको भागोऽन्येन प्रकारेण समापनीयः। अहमभिलषिष्यामि यत् स व्योमयानेन नीत्वोर्ध्वमाकाशतस्तेषु केदारेषु विकिरणीयो यत्र भारतस्य कृषकाः परिश्राम्यन्ति, यतो हि स भारतस्य धरित्र्या धूलिना च सम्मिलितो भवेत् तथा भारतस्यैक ईदृशो भागः सम्पद्येत यस्य पार्थक्य-परिज्ञानं कथमपि कर्तुं न शक्येत।"

☐ श्रीशास्त्रिणां नेतृपदेऽभिषेकः

मौनं मान्यजनानुयान-निरता निःस्वार्थनिष्ठान्विताः,
सूक्ष्म-प्रज्ञ-नयाः स्वचिन्तन-धनाः स्वाधीनता-सैनिकाः।
कर्तव्येषु परायणाः प्रथित-वाग्वैदुष्य-सम्भूषिताः,
श्रीला 'लालबहादुरा'ख्य-विबुधा नेतुः पदे स्थापिताः ॥७॥

स्वभावेन कोमलाः प्रतिज्ञया कठोरास्तन्वा लघवस्तथा मनसा विशालाः श्रीलालबहादुरशास्त्रिणः श्रीनेहरूणामतीव स्नेहभाज आसन्। तेषां स्थितौ ते निर्विभागीया मन्त्रिणोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागाऽपि तान् श्रद्धया वीक्षते स्म। तेषां निरन्तरं सामीप्यात् कौशलं दूरदर्शित्वं निःस्वार्थत्वं कर्मपटुत्वं तथा सद्विचार-सत्स्वभाववत्त्वञ्च काङ्ग्रेस-सदस्येषु विख्यातमासीत्। यदा प्रधानमन्त्रिपदाय निर्वाचनप्रश्न उपस्थितस्तदा कामराजमहानुभावः श्रीमतीमिन्दिरागान्धीमहाभागां प्रधानमन्त्रिपदे प्रतिष्ठापयितुमैच्छत्, परं सा स्वयं कस्मैचिज्ज्येष्ठाय तत्पदं दातुमुचितममन्यत, अतस्तया स्पष्टरूपेण निषिद्धम्। तस्मै पदाय तदीयां सम्मतिं कामयमानाः श्रीकामराजादयश्च यदाऽपेक्षितं नाम प्रस्तोतुं न्यवेदयँस्तदा सा श्रीलालबहादुरशास्त्रिणां नामासूचयत्। संसदोऽग्रे त्रीणि नामानि प्रस्तुतान्यवर्तन्त-**श्रीमोरारजीदेसाई-श्रीगुलजारीलालनन्दा-श्रीलालबहादुरशास्त्रिणां** च। श्रीमोरारजीदेसाईमहोदयस्तु नियमतश्छन्दाकलनमप्यवाञ्छत्, परमन्ते काङ्ग्रेसप्रतिष्ठायाः संरक्षणाय तथा दलविच्छेदभयान्मौनमस्थात्। श्रीकामराजेन विचारितं यत् साम्प्रतिक्यां विषमायां स्थितौ श्रीलालबहादुरशास्त्रिण एवैतस्मै पदाय समुचिता भविष्यन्ति, तेषां सर्वेऽपि दलस्य सदस्याः सम्मानं कुर्वन्ति, तेषु विश्वसन्ति तथा ते बहुमतं निश्चयेन प्राप्स्यन्तीति, तदनुसारं तेषां नाम प्रस्तावितम्, २ जून १९६४ ई० दिने च ते सर्वसम्मत्या काङ्ग्रेसदलस्य नेतारो निर्वाचिताः। ते सर्वकार-निर्माणायामन्त्रितास्तथा सप्ताहानन्तरं प्रधानमन्त्रिणः पदस्य ते शपथमगृह्णन्।

दृढव्रताः सत्यपथानुयायिनः, प्रशासने तत्प्रगतौ च तत्पराः।
श्रीशास्त्रिणो लालबहादुराभिधाः, प्रधानमन्त्रित्वममण्डयँस्ततः ॥ ८ ॥

स्वदेशं निरन्तरं प्रगतिपथे नेतुं प्रवृत्ताः श्रीनेहरूणां सांनिध्यमविस्मरन्तस्ते तन्नैयून्यं पूरयितुं श्रीमतीन्दिरागान्धीमहाभागां मन्त्रिमण्डले समाविश्य सहयोग-

प्रदानायाभ्यार्थयन् विदेशमन्त्रिपदं च स्वीकर्तुं न्यवदेयन्। पूर्वं तु सा निषेधमेवाकरोत् परं श्रीशास्त्रिणामाग्रहं सम्मानयितुं तथाऽऽत्मानं कर्मसु नियोज्य शोकं विस्मर्तुं **'सूचना-प्रसारण-मन्त्रिपदं'** स्व्यकार्षीत्। तस्मिन् महति पदे वर्तमानया तया पूर्णया निष्ठया सत्येन जागरूकतया च स्वीयं दायित्वं निर्व्यूढम्। पितॄणामिवैव सर्वाणि कार्याणि यथाशीघ्रं निर्वर्तयितुं साऽवाञ्छत्। तस्याः पुरः काऽपि पञ्चिका निर्णयायाग्रिमं दिनं प्रतीक्षितुं नावाशिष्यत। स्वीयैः पूर्वानुभवैः सा सकलमपि कार्यविधिं पूर्णेन कौशलेन विदधती सर्वेषामपि समादरं प्राप्नोत्।

श्रीमतीन्दिरागान्धी स्वीये मन्त्रालये यत्किमपि नावीन्यं प्रयोगशीलमर्थवच्च कार्यमासीत् तस्मै महत्त्वं दत्त्वा शिक्षां मनोरञ्जनं च परस्परमन्योन्याश्रितं मत्वा तदनुकूलमाकाशवाणीतः प्रवर्तयितुं निरदिशत्। दूरदर्शनस्य प्रवर्तनं तस्या एव दूरदर्शितायाः परिणाम आसीत्। तस्याः सूचना-प्रसारण-मन्त्रित्वकाल एव नवीनेभ्यश्चेष्टाचित्रेभ्यः स्वीकृतिः प्राप्ताः, प्रयोगधर्मवद्भ्यश्चलचित्रेभ्य ऋणसाहाय्यदानस्य निर्णयो विहितस्तथा नियन्त्रक-मण्डलस्य स्वरूपं व्यापकं विधाय नीतावौदार्यमानीतम्। १९६४ई० वर्षे श्रीमतीन्दिरामहाभागाया उत्तरप्रदेशाद् राजसभायै निर्वाचनमभूत्। श्रीनेहरूणां 'फूलपुर'—क्षेत्राल्लोकसभायै निर्वाचनार्थमपि सा निवेदिता किन्तु तया तद्विषये निषिद्धम्। मन्त्रिपदे वर्तमानया तया नैकेषां देशानां सद्भावनायात्रा विहिताः। यत्रापि साऽगच्छत् तत्र तत्कर्म-कौशलेन सहैव श्रीजवाहरलालनेहरूमहोदयानां पुत्रीत्वेनापि सम्पूर्णः सम्मानस्तस्या अदीयत। तदग्रिमे वर्षे मद्रासनगरे भाषाविवादमाध्यमेनोपद्रवाः सञ्जातास्तदाऽपि सा स्वस्वभावानुसारं तत्र गत्वा तत्रत्यान् प्रत्यबोधयत्। स्पष्टमेव सा भीषणस्य झञ्झावातस्य चरमे बिन्दौ विद्यमानाऽपि नाबिभ्यत्।

सुदृढा निजकर्मपालने, करुणामूर्तिरथापदां विधौ।
निरहङ्कृतिरुन्नताऽपि सा विरताऽवर्तत देशसेविका ॥९॥

नाटकानां नृत्यकलानां क्षेत्रे प्रोत्साहन-प्रदानेन स्वीयां कलाभिरुचिं प्रकटय्य चान्ताराष्ट्रियचलचित्रसमारोहं सैव प्रारभत। भारतशासनस्य प्रतिनिधित्वेन मास्कोतः प्राप्तेन निमन्त्रणेन सोवियतसङ्घस्य यात्रां विधाय तत्र तद्देशीयनेतृभिर्भारतशासनस्य मैत्र्याः सुदृढत्वं तथा भारतायार्थिक-सैनिक-साहाय्यादानाय यथावन्निर्णयं समसाधयत्। ततः परं श्रीनेहरू-स्मारक-प्रदर्शिन्या उद्घाटन-समारोहस्याध्यक्ष्यं निर्वोढं न्यूयार्कमप्यगच्छत्। श्रीमतीन्दिरामहाभागा स्वपदे वर्तमानाऽपि समाज-कल्याणकार्येषु नितरां ध्यानं दत्ते स्म। मन्त्रिपदप्राप्त्यनन्तरं तस्यै स्वीकृते शासकीये (१ सफदरजंगमार्गस्थे) भवने स्थिता सा श्रीनेहरूणामिवैव प्रतिदिनं प्रातरागतानां जनानां काठिन्यान्यावश्यकताश्च श्रुत्वा तेभ्यो यथाशक्यं साहाय्यमपि प्रादात् सहैव तेभ्यो वार्तालापान् विधाय प्रासीदत् प्रेरणा अगृह्णात् तथा शक्तिं प्राप्नोत्। जनास्तद् विनिमये स्वीयान् स्नेहाननुरागान् श्रद्धाश्चादुः।

जनहितनिरतेभ्यो सर्वदा स्नेहभाग्भ्यो,
विपदि च सहभाग्भ्यो राष्ट्रचिन्तापरेभ्यः।
वितरति जगदेतत् स्नेह-सम्मान-शक्तीः,
प्रथयति च तदीयां सर्वतोदिक्षु कीर्तिम् ॥१०॥

श्रीशास्त्रिमहाभागानां प्रतिष्ठा लोकप्रियता च तेषां शासनकाले नितरामवर्धताम्। ९ जून १९६४ ई० तः ११ जनवरी १९६६ ई० पर्यन्तं तैः प्रधानमन्त्रिपदं मण्डितम्। ते सुदृढा गान्धिवादिन आसन्। भारतीयजनतायां नैके निष्ठावन्तस्तेषामनुयायिनोऽप्यवर्तन्त ये पाकिस्तानयुद्धस्य तथा ताशकन्द-सम्मेलनस्यातीव प्रशंसामकुर्वन्। ते मन्त्रिमण्डलीयासु विचार-परिषत्सु सदस्यान् सदैव विचार-विनिमयेन प्रोदसाहयन्, निर्णयानां प्रसङ्गेषु सर्वेषां सम्मतीरनयँस्तथा नीति-निर्धारणविषय उच्चकोटिक-परामर्शदातॄणां विचारान् परिज्ञाय सर्वतोभावेन विमृश्य च नीतीर्निरधारयन्। कच्छस्य मरुभुवमाश्रित्य पाकिस्तानेन सह यो विवाद आसीत् तस्यापि शान्तिपूर्णं समाधानं तैर्गवेषितमभूत्। शान्तिप्रिया विनम्राश्च ते स्वदेशरक्षार्थं स्वप्राणानपि होतुं सर्वदा सन्नद्धा आसन्।

ते यदा प्रधानमन्त्रिपदं भूषितवन्तस्तदानीं देशोऽपि दुर्दैवच्छायया विपन्न एवासीत्। युद्धस्य वर्धमानेन व्ययभारेण तथाऽनावृष्टेः कारणादार्थिकी व्यवस्था दोलायमानेव प्राचलत्, अहरहश्चिन्तातान्तास्ते स्वदेशायैव जीविताः स्वदेशायैव च मृता अपि। युद्ध-सङ्कटस्य तथाऽन्नसङ्कटस्यापवारणाय ते—'**जय जवान-जय किसान**' इति नादमपि प्रावर्तन्त। संस्कृति-संस्कृत-संस्कार-सदाचार-सेवा-सद्विचार-परम्पराभिः संसिक्तानां तेषां प्रभावश्चातितरां समैधत।

कतिपय-मासेभ्यः पाकिस्तानीया गुप्तप्रवेष्टारो भारतं प्रविश्य गुप्तरूपेणैव सेतूनां भञ्जनस्य सञ्चारव्यवस्थाया ध्वंसनस्य च योजनाः साधयितुं प्रसक्ता आसन्, पाकिस्तानेन विचारितमासीद् यत् काश्मीरवासिनो विद्रोहमाचरिष्यन्ति तथाऽऽक्रामकाणां सहयोगिनो भविष्यन्तीति। परमभूत् ततो विपरीतमेव। काश्मीर-सर्वकारेण सहस्रशो गुप्तरूपेण प्रविष्टाः पाकिस्तानस्य चरा निगृहीतास्तथा बहुशस्तेषु निहता अपि। इत्थं भारतशासनं प्रति सर्वथा निष्ठावद्भिः काश्मीरशासकैस्तथा नागरिकै राष्ट्रभक्तेरपूर्वमुदाहरणं प्रस्तुतम्।

१९६५ ई० वत्सरे पाकिस्तानेन भारतमाक्रान्तम्। जनता जागरिता। श्रीशास्त्रिणः प्रशस्तशिलेव सुस्थिरा आसन्। श्रीमतीन्दिरागान्धी स्वस्वभावानुसारं शीघ्रमेव रणभूमावाक्रमणस्थल्यामुपागच्छत् सैनिकानामुत्साहानावर्धयत् तथा स्वीयैर्भाषणैर्देशावासिषु स्फूर्तिं जागरूकताञ्चोदपादयत्। शत्रवः पराभूताः युद्धं च निरुद्धम्। सन्धिवार्तायै श्रीलालबहादुरशास्त्रिण**स्ताशकन्दं** गताः किन्तु त एवं गता यत् पुनरागता एव नैव। केवलं तेषां शून्यं शरीरं महान्तं विषादं नीत्वा भारतमागमत्। तस्याघातस्य सूचनाऽपि सर्वप्रथमं श्रीमतीन्दिरागान्धी-

महाभागैव प्राप्नोद् यतः सा सूचना-प्रसारण-मन्त्रि-पदेऽधिष्ठिताऽऽसीत्। श्रीशास्त्रिणः स्वदेशाद् दूरे स्वदेशाय ११ जनवरी १९६६ ई० वर्षे स्वीयान् प्राणान् समार्पयन्।...

स आघातो भारतमस्तभ्नात्। देशः स्वकीयस्य द्वितीयस्याप्यद्वितीयस्य प्रधान-मन्त्रिणो मृत्योः शोके न्यमज्जयद् यः केवलमष्टादशमासानेव तस्मिन् पदे स्थातुमशक्नोत्। इयति स्वल्पे समयेऽपि श्रीलालबहादुरशास्त्रिणः स्वदेशवासिनां हृदयानि जित्वा तेषां सम्मानं प्राप्नुवन्। तस्मादेव तदभावदुःखदुःखिता जनताऽपृच्छत्—

"जय जवान्-जय किसान" वचोऽत्र यस्य गुञ्जितं,
प्रमुच्य वैर-भावनाः स्वराष्ट्रमत्र पुञ्जितम्।
स लोक-शोक-मोचनः सदा प्रदीप्त-लोचनः,
स्वदेश-शत्रु-शोचनः क्व विद्यते क्व विद्यते' ?॥११॥
स शारदाप्रसादसूः सरस्वती-प्रसादभाक्,
प्रबुद्ध-बुद्धिरिद्धवाक् सुसिद्धगीर्विशुद्धधीः।
स संस्कृतस्य संस्कृतेश्च भक्ति-भाव-भावितः,
स्वनेतृ-मालिका-मणिः क्व विद्यते क्व विद्यते ?॥१२॥
यदीयवाचि सत्यता कृतौ न काऽप्यनित्यता,
हृदि स्थिरा धृतिः परा परेषु साहस-स्वराः।
अकम्पनीय - धैर्यवानलोलुपः सुकर्मठः
स शान्तिमार्ग-शोधकः क्व विद्यते क्व विद्यते ?॥१३॥
न निर्धनत्वमात्मनोऽपनोदनाय जायते,
प्रमाणयन्निदं प्रधान-मन्त्रितामभण्डयत्।
स राजनीति-सिन्धुरः स्वराष्ट्र-नीति-बन्धुरः,
स्व—तन्त्रता-धुरन्धरः क्व विद्यते क्व विद्यते ?॥१४॥
प्रमाद-मार्ग-संश्रितान् प्रबोद्धुमेव योऽदिशत्,
'पुरः पदं निधीयतां स्व-रक्षणं विधीयताम्।'
स्वदेश - रक्षणार्थमुत्सृजन्नसून् दिवङ्गतः,
स शास्त्रि-सत्तमोत्तमः क्व विद्यते क्व विद्यते ?॥१५॥

तथा स्वयं भारतमातुरपि स्थितिस्तदा खिन्न-खिन्नैवावर्तत। यतः सा हि—

सञ्जाता भरतावनिः क्षतहृदा पुत्रं स्वकीयं दृशो,
दूरीभूतमवेक्ष्य हा विकलिनी खिन्नानना चिन्तिता।
पृच्छन्ती च जनान् प्रसह्य तनुजो 'लालः' क्व यातोऽधुना ?,
ब्रूते मूर्च्छति वेपते विलपति क्रन्दत्यलं निन्दति॥१६॥
हन्त! यातो दिवं श्रीमान् 'शास्त्री लालबहादुरः'।
भारतं भा-रतं कर्तुं, तस्मै सन्तु नमांसि नः॥१७॥

□

[७]

द्युति-कला

शुभे प्रधान-मन्त्रिणः पदे विराजितेन्दिरा

इयं ते राट् यन्तासि यमनोऽसि ध्रुवोऽसि धरुणः।
कृत्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा॥

—शतपथब्रा० ५।२।१।२५

स्वसंस्कृतेः समुच्चयाय सद्विचार-चञ्चुरा,
स्वराष्ट्रमन्नतं विधातुमुद्यता यता सदा।
समाजवाद-पोषिका महामतिर्महीयसी,
शुभे प्रधान-मन्त्रिणः पदे विराजितेन्दिरा॥ १॥

यदा श्रीमतां शास्त्रि-महाभागानां दिवङ्गमनस्य सूचना स्वदेशमागता तदैव विधानानुसारं कार्यवाहक-प्रधानमन्त्रिणो भारः **श्रीगुलजारीलालनन्दा**-महोदयाय प्रदत्तः, यतो हि मन्त्रिमण्डले स एव महाभागो वरिष्ठ आसीत्। इत्थं द्वितीयवारं श्रीनन्दामहोदयः प्रधानमन्त्रिणः पदं स्वल्पाय कालाय न्यभालयत्। वस्तुतो भारतस्य संविधानानुसारं संसदो बहुमतशालिदलं स्वीयं नेतारं निर्वाचयति तथा स एव मन्त्रिमण्डलं निर्मातुमामन्त्र्यते। निर्वाचितो नेतैव स्वस्य मन्त्रिमण्डलस्य सदस्यान् नियोजयति। अनया पद्धत्या पुनर्नवीनं नेतारं निर्वाचयितुं सर्वेऽपि तत्परा अभूवन् किन्तु प्रश्नोऽयमियताऽऽकस्मिकेन रूपेण पुर उपस्थितोऽभूद् यत् काङ्ग्रेसे परस्परं कर्षाकर्षित्वं भवितुं प्रारभत। काङ्ग्रेस-कार्यकारिण्या नेतृषु महान् मतभेद आसीत् तथा राज्यशासनानि स्वायत्ततया अधियाचनाः प्रस्तुवन्ति पृथगेवानयन्ति स्म।

तदानीं प्रधानमन्त्रिपदस्यानेकेऽधिकर्तार आसन्, येषु **श्रीमोरारजी देसाई-श्रीयशवन्तरावचह्वाण- गुलजारीलालनन्दा-जगजीवनराम-सादोबा-पाटिल**प्रभृतयोऽवर्तन्त किन्तु सर्वेषु किमपि नैयून्यं, कश्चन संवादः काचनानुपयोगिताऽवश्यमेव प्रस्फुटिताऽदृश्यत। **श्रीकामराज**-महाभागोऽपि काङ्ग्रेसदलस्य नेतृत्वाय स्वं प्रत्याशित्वमुद्घोषयितुमैच्छत् परं स स्वयमेवाजानाद् यदहमस्मै पदाय योग्यो नास्मि, यतः स केवलं मातृभाषां तमिलमेवावेदीत्। भारत-सदृक्षे बहुभाषा-भाषिणि देशे कस्यापि हिन्दीविदो वैदेश्यभाषाविदश्च सहैव भारतीयानां जनानां विश्वास-सम्पादनक्षमस्य निर्वैरिणो जनस्यैवावश्यकतां सर्वेऽकामयन्त। बहुशो बहुषु दृष्टिपातानन्तरं 'श्रीमतीन्दिरागान्धी महाभागा तादृशाय सर्वोच्चपदाय समुपयुक्ता विद्यत' इति

सर्वैरनुभूतम्। देशे विदेशे च तस्याः प्रचुरा ख्यातिरासीदेव। तस्या अजातशत्रुत्वं तथाऽखिलभारतीय-नेत्रीरूपेण सम्मान्यत्वमपि विदितमेवासीद्, अतः श्रीकामराज-महाभागैः कार्यकारिण्यां तस्या अभिधानं प्रस्तावितं किञ्चेदमपि कथितं यन्नेतुर्निर्वाचनं निर्विरोधं सर्वसम्मत्या सम्पादनीयं यदुत्तमं गरिममण्डितं च भविष्यतीति। किन्तु श्रीमोरारजीमहाभागा व्यक्तं छन्दाकलनं विधातुमकथयन्, कारणं तस्य तेऽसूचयन् यदिन्दिरापेक्षयाऽन्येऽपि बहूपयुक्ता जना विद्यन्ते। यदा विषयेऽस्मिन् श्रीमतीन्दिरा पृष्टा तदा सा केवलमियदेवाकथयद् यद् निर्णयः सदस्यैरेव करणीयोऽस्ति यत् ते कं प्रधानमन्त्रिपदे स्थापयितुं वाञ्छन्ति?।

निर्वाचनव्यवस्था समजायत। सर्वेपि स्वस्वशक्त्यनुसारं स्वस्वप्रत्याशिनं जयमालया भूषयितुं प्रयत्नशीला आसन्। श्रीकामराजः सर्वात्मना श्रीमत्या इन्दिरायाः पक्षेऽवर्तत। ये पुरातनवादिन आसँस्ते श्रीमोरारजीदेसाई-महाभागानां पक्षे सङ्घटनोद्युक्ता आसन् निर्वाचनतिथिश्च १९ जनवरी १९६६ ई० निर्णीताऽभूत्। १९६६ ई० जनवरीमासस्य द्वितीये दिने श्रीमतीन्दिरा सम्मान्याया आनन्दमयीमातुर्दर्शनार्थमपि गता तया च साशीर्वादमेकमुखरुद्राक्षस्य मालाऽपि तस्यै दत्ता। साशीर्वादं च सूचितं यदियं माला यावद् भवत्या ग्रीवायां स्थास्यति, तावद भवत्याः सर्वत्र विजयो भविष्यतीति। १९ जनवरी-दिने प्रातस्तरां यदा समग्रमपि नगरं कुज्झटिकाया आवरणिकामावृत्य प्रसुप्तमभवत् तदा साऽऽत्मनोर्द्वयोराराध्य-स्थानयोरगच्छत्—प्रथमं सा राजघट्टे यमुनायास्तटे महात्मनां श्रीगान्धिनां समाधिस्थलं प्राप्ता। तत्र तेषां समाधेः समक्षमुपस्थाय प्रार्थना विहिताऽऽशीश्च याचिता। ततः सा शान्तिवनं गता यत्र श्रीजवाहरलालनेहरूणां पार्थिव-शरीरस्य दाहसंस्कारोऽक्रियत। यदा सा स्वेषां पितृपादानां समाधेरग्रतः स्थिताऽऽसीत् तदा तेषां तत्पत्रमसमरद्—यत्तैस्तस्यास्त्रयोदशे जन्मदिवसे लिखितमासीत्—

ईदृक् कार्यं किमपि न कदाऽप्यत्र कार्यं निगूढं,
यत् स्यादन्यैर्भवदभिमतं गोपनीयं प्रयत्नात्।
इच्छा तादृश्यथ भवति चेद् भूरि भीतेः प्रमाणं,
तन्नो योग्यं, त्यज भुवि ततस्त्वं भवेः शूरवीरा ॥२॥

शूरा भव त्वं तनये ! तदा स्वयं, प्राप्स्यन्ति वस्तूनि ततस्तवान्तिके।
त्वच्छूरतायां न भयं भविष्यति, कार्यं न लज्जाजनकं करिष्यसि ॥३॥

सूर्येण मैत्री सम्पाद्या, कार्यमस्माभिरुत्तमम्।
कार्यं प्रकाशे येन स्याद्, गोप्यं किञ्चिदपीह न ॥४॥

इमां निकष-पट्टिकां यदि पुरो निधायात्मनो,
विधास्यसि समाः क्रिया विगतभीश्च शान्ता तदा।
प्रकाशतनया भविष्यसि मनः प्रसन्नं च ते,
स्वराष्ट्रजन-सेवनेऽनवरतं रतं स्थास्यसि ॥५॥

इत्थं स्थैर्य-धैर्याभ्यामात्मप्रेरणां लब्ध्वा ततः सा त्रिमूर्तिभवनमप्यगात्। तत्र पितृणां प्रकोष्ठे यथावद् विष्टरस्य निकटवर्तिनि लेखनपटले लेख्यपत्र-पञ्चिकायां लिखिता 'राबर्ट फास्ट' कवेः सा कविताऽपि तदीय-स्मृतिमुपेता —

गहनं किल कान्तारं, रम्यास्तरवः सुशीतला च्छाया।
प्रणपूर्त्यै किन्तु मया, शयनात् प्रागस्ति यातव्यम्॥६॥

सकलमिदं विचारयन्त्यपि **'यद् भावि तद् भविष्यती'ति** विश्वस्य, संसदः केन्द्रीये प्रकोष्ठे मतदानाय परिणामज्ञानाय तथा वार्ताः प्रसारणाय समुपस्थिते जनसमूहे निखिलैः सदस्यैः सह श्रीमतीन्दिरागान्धीमहाभागाऽप्यतिष्ठत्। अपराह्णे प्रायस्त्रिवादनसमये निर्बाचनाधिकारी मतगणनायाः परिणामं श्रीकामराजस्य हस्तेऽर्पयत् तेषां प्रसन्ना मुखमुद्रैव परिणामस्यानुकूल्यं सूचयति स्म। तैः पूर्वं तमिल-भाषया परिणामो घोषितस्ततः परमाङ्ग्लभाषयाऽनूद्य श्रावितः। तत्र श्रीमती-इन्दिरागान्धी-महाभागा पञ्चपञ्चाशदुत्तर-त्रिशतमितानि मतानि प्राप्नोत् तथा श्रीमोरारजीदेसाई-महोदयः केवलमूनसप्तत्युत्तरैकशतमितानि मतानि लब्धवान्। श्रीमतीन्दिरा संसदः काङ्ग्रेसदलस्य नेत्री निर्वाचिता। सर्वेपि तस्यै वर्धापनान्य-र्पयितुमुत्सुका आसन्। सा संसदत्सदस्यैः सह पृष्ठभागे स्थिताऽवर्तत। विनम्र-भावेन तत उत्थाय प्रथमं मोरारजीभ्रातुर्निकटे गत्वाऽऽशिषोऽकामयत। प्रणम्य साऽवदत्—'दीयतामाशीर्वादा मोरारजीभ्रातः! यत् पुर उपागतवतां दायित्वानां भारोद्वहने क्षमा भवेयम्।' ते स्मितिं विनाऽकथयन् —'अहं तुभ्यमात्मन आशीर्वा-दान् ददामि।'

ततः परं मञ्च उपस्थायात्मानं देशसेविकात्वेन वृतां मत्वा दलस्य समक्षं भाषमाणया श्रीमत्या गान्धीमहाभागया निगदितमासीत् —

"अद्य मम स्वान्तं सम्भृतं विद्यते तथा नाहं वेद्मि यत्कथं भवतां धन्यवादं कुर्याम्? एतस्मिन्नवसरेऽस्माकं महतां नेतृणां— महात्मगान्धिनां, येषां चरणयोः स्थित्वा मया शिक्षणस्यावसर उपलब्धस्तथा मम पितुः पण्डितमहाभागानां श्रीलालबहादुरशास्त्रिणां च स्मरणमायाति। श्रीशास्त्रिणस्तथा पण्डितश्रीपन्त-महाभागा एव मां स्वतन्त्रता-प्राप्तेरुत्तरवर्तिन्यां राजनीतावानयन् किञ्च यदा यदैव मया राजनीतेस्त्यागवार्ता विचारिता, ते मां राजनीतौ स्थितये प्रैरयन्। एते नेतारोऽस्मान् मार्गमदर्शयन् साम्प्रतं मार्गेऽस्मिन्नेव चाहमग्रे वर्धितुमभिलषामि। श्रीलालबहादुरशास्त्रिणः शान्तये स्वजीवनस्य बलिदानमकुर्वन्। अस्माभिः शान्ति-स्थापनायाः प्रयासैः सह स्वकीयो देशः शक्तिशाल्यपि सम्पादनीयः किञ्चास्य सुरक्षायाः सम्पूर्णव्यवस्था विधातव्या।

अहमात्मानं सदैवैकां देशसेविकाममानयम्, यथा मम पितर अत्मानं देशस्य प्रथमं सेवकं मानयन्ति स्म, अहमप्यात्मानं दलस्यास्य देशस्य च महत्या जनतायाः सेविकामवगच्छामि।

अस्माकं देशोऽतीव प्राचीनोऽस्ति तथास्य महत्यः परम्पराः सन्ति। अस्त्यत्र देश ईदृशं किमपि यद् यस्य कारणान्निरक्षरतायां पश्चाद्वर्तितायां च सत्यामपि, अस्य जना महतां महतां प्रत्याह्वानानामाभिमुख्यायोत्थिता भवन्ति। अहं सर्वथाऽऽशावत्यस्मि यद् वयमेकत्वेन प्रत्येकं समस्याया आभिमुख्यं कर्तुं शक्नुमः।

अहं विशिष्य श्रीमोरारजि-देसाई-महाभागानां धन्यवादं चिकीर्षामि यतस्त एकतायै कार्यं कर्तुं समकल्पयन्। राजनीतौ निर्वाचनं सामान्या वार्ता विद्यते, परमेकवारं निर्वाचने निष्पन्ने सतीदमेव वास्तविकमुचितं च भवति यन्मतभेदान् विस्मृत्य वयं सर्वे संयुज्य कर्माणि सम्पादयेम विशेषतस्तस्मिन् समये यदा देशस्याग्रे भूयांसि काठिन्यानि वर्तन्ते।

अहमाशासे यद्भवद्भिर्मयि यो विश्वासो विहितः, अहमात्मानं तदनुरूपं साधयितुं शक्ष्यामि। अहं पुनरेकवारं भवतां सर्वेषां धन्यवादं विदधामि।"

साभिवादं संक्षिप्यैवं निवेद्य सदनाद् बहिः प्रतीक्षामादधानां राष्ट्रियकार्यकर्तॄणां जनानाञ्च वर्धापनाः स्वीकर्तुं श्रीमतीन्दिरागान्धी संसद्भवनाद् बहिरायाता। प्रायो दशसहस्र-जनानां समवायेन तस्या जय-जयघोषैः स्वागतञ्च विहितम्। श्रीनेहरूणां नीतिषु विश्वसन्ती श्रीमतीन्दिरा गान्धी भारतीयानां हृदयेषु महान्तं समादरं तथा तेषां स्वातन्त्र्यसङ्ग्रामस्य नेहरूपरिवारेण कृतानां त्यागानां परम्परां प्रति कृतज्ञतावशात् पर्याप्तं सौहार्दं सम्प्राप्ताऽऽसीत्। प्रारम्भे श्रीनेहरूणां सांनिध्येन राजनीतौ प्रविष्टा, क्रमशः प्रावीण्यं प्राप्य काङ्ग्रेसदलस्याध्यक्षतां भूषयित्वा भारतस्य प्रधानमन्त्रि-पदं सा समभूषयदिति ज्ञात्वाऽपारमानन्दमनुभवन्तो भारतीया अतीव हर्षनिर्भरा आसन्।

ततः परं सा सर्वेषामभिनन्दनानि वर्धापनानि शुभाशंसनानि शुभाशासनान्याशीर्वचनानि माल्यार्पणानि स्वागतानि च सविनयं सादरभरं स्वीकुर्वती राष्ट्रपतिभवने श्रीमद्भिर्महामहिमराष्ट्रपति-श्रीराधाकृष्णन्महाभागैः सम्मिलितुमगच्छत्। राष्ट्रपतयः साभिनन्दनं सर्वकार-निर्माणाय न्यमन्त्रयन्। सायं सप्तवादनवेलायां सफदरजंगमार्गस्य समक्षं धवल-निवासस्थानस्योद्याने समायोजिते संवाददातृ-सम्मेलने, दीप्तिमतीं शाटिकां धृत्वा कर्बुरवर्णवतीमूर्णा-प्रावरणीं चावृत्य श्रीमती गान्धीमहाभागा प्रायेण द्विशतमितानां संवाददातॄणां प्रश्नानुत्तरयन्ती भावि-नीति-सम्बद्धानादर्शान् विचारांश्च यथायथं प्राकाशयत्। यद्यपि साऽत्यन्तं सावधानतया कयाऽपि प्रमुखया नीत्यात्मानं नैव समबध्नात् तथापि तार्किकाणां प्रश्नानामतीव कौशलेनोत्तराण्यदात्। ये प्रश्ना असम्बद्धा निरर्थका वासँस्तान् मधुरस्मित्याऽमोचयत्'। तत्रैव कैश्चन पृष्टस्य "प्रधानमन्त्रिपदे निर्वाचनोत्तरं तत्रभवत्या महिलात्वेन तत्रभवती कीदृशमनुभवती'ति-प्रश्नस्योत्तरे सा स्पष्टमवादीद् "अहमस्मै कार्यायात्मानं महिलां न वेद्मि। यदि नाम कस्या अपि महिलायाः समीपे कस्यापि व्यवसायस्य योग्यता विद्यते तर्हि तस्यै तस्य व्यवसायस्य

सम्पादनायानुमतिर्दातव्यैव। किञ्चाहं नास्मि नारी-स्वातन्त्र्यस्य समर्थिका। अहं मनुष्योऽस्मि। स्वीये कर्मावसरे स्वां नारीं नाकलयामि। भारतीय-संविधानानुसारं लिङ्ग-भाषा-राज्यादिभेदभावेभ्यः परे सर्वे नागरिकाः समानाः सन्ति। अहं भारतस्य नागरिकमात्रमस्मि। अहं देशस्य प्रथमा सेविकाऽस्मि---देश-सेविका।"

विश्वस्य सर्वाधिक-विस्तृतस्य, देशस्य सर्वोत्तम-शासनस्य।
सत्तां समर्प्यातितरां प्रमोदं, प्राप्ताः स्वदेश्या महिला-कराब्जे ॥ ७ ॥

निर्वाचितां सर्वगुणैः सुशोभितां, पदे प्रशस्ते महिलां महीयसीम्।
विज्ञाय सर्वोऽपि जनश्चमत्कृतो, जगच्च नूनं बहु विस्मितिं गतम् ॥ ८ ॥

२४ जनवरी १९६६ ई० दिने श्रीमतीन्दिरा गान्धी प्रधानमन्त्रि-पदस्य शपथमगृह्णात्। शपथग्रहण-समारोहे सा महाभागा राजतेन तन्तुसन्तानकर्मणाऽलङ्कृतां सितां शाटीं परिधाय शान्तया स्पष्टया वाचा श्रीराधाकृष्णन्महोदयैरुच्चारितान् शब्दान् पुनरावर्तयत्। तस्मिन् समारोहे श्रीमती विजयलक्ष्मी-कृष्णमैनन्-प्रभृतयोऽपि समवेता आसन्। श्रीमती गान्धी पदस्य गरिमाणं प्राप्यापि सहजां विनम्रतां नात्याक्षीत्। तस्मादेव सा सर्वेषां सद्भावना अभावयत्। निर्वाचने प्रतिप्रत्याशिनः श्रीमोरारजीभ्रातॄनपि सा स्वीये मन्त्रिमण्डलेऽग्रहीत्। देशस्य स्वाभिमानाय तथा काङ्ग्रेसदलस्य सिद्धान्तान् प्रति निष्ठायै सा प्रधानमन्त्रिपदे वर्तमाना मनागपि शिथिलतां नाङ्ग्यकार्षीत्। सेदमप्यजानाद् यदिदं पदं '**कण्टक-मुकुट**'मिव विद्यते तथापि सा साहसेन स्वदेशसेवार्थमात्मानं समार्पिपत्। सा तु स्पष्टमेव मनुते स्म यत्—

पञ्चाशत्कोटिसङ्ख्यावति जननिवहे सन्ति या याः समस्या—
स्तासां सङ्ख्याऽस्ति तावत्यनुपदमुदिता भारते व्यात्तवक्त्रा।
शय्या नेयं प्रशास्त्रे कुसुमविरचिता वेद्मि तत् सर्वमेतत्—
सेवार्थं राष्ट्रमातुर्नुदति परमिदं मुख्यनेत्री-पदं माम् ॥९॥

अत एव सा २६ जनवर्यां गणतन्त्रदिवसमुपलक्ष्याकाशवाण्या राष्ट्राय प्रथमं सन्देशं प्रसारयन्त्यकथयत्—"त्रिंशद्वर्षेभ्यः पूर्वमद्यतन एव दिवसे मया हृदयानि झङ्कुर्वत्सु शब्देषु परःसहस्रैर्जनैः सह स्वतन्त्रतायाः शपथं गृहीतमासीत्। १९४७ ई० वर्षे तच्छपथं पूर्णतामगच्छत्। निखिलेन विश्वेन स्वीकृतं यज्जनतन्त्रे धर्मनिरपेक्षितायाञ्चाधारिताया एकस्याः प्रगतिशीलशक्तेरुदयोऽभूदिति। श्रीजवाहरलालनेहरूणां प्रधानमन्त्रित्वस्य सप्तदशवर्षेषु धर्म-समुदाय-भाषाणां समस्ताभिर्विभिन्नताभिः साकमस्य देशस्यैक्यमेकं तथ्यं सम्पन्नं तथा जनतन्त्रस्य जन्माभूत्, तेन मूलानि गृहीतानि।

अस्मदीय-जनानां जीवनं समुचितं विधातुमस्माकं प्रथमं चरणमासीत् नियोजित आर्थिकविकासः। पराधीन-जनेभ्यः स्वातन्त्र्यप्रदानाय भारतं सदा स्वीयं

स्वरं समुदनयत्। यस्मादनेकेभ्य आशाऽमिलत्, साहस: प्राप्त:। भारतस्य सीमभ्यो बहि: स राष्ट्रेषु मैत्र्या: शान्तेश्च स्वरविस्तारकरूपेण श्रुत:।

अस्माकं पुरतो या महत्य: समस्या: सन्ति, ता अहं विनम्रतापूर्वकं समाधातुमभिलषामि। महात्मगान्धिना मम जनकेन च प्रवर्तिता: परम्परास्तथा भारतं प्रति स्वीयं विश्वासं विलोक्य मह्यं शक्तिर्विश्वासश्चोपलभ्येते। भारतेन स्वस्यापराजेयत्वस्य प्रमाणानि नैकशो दत्तानि। पूर्ववद् विगतेषु वासरेष्वपि तेन स्वस्य साहसस्य तथा नवीनानामाह्वानानामाभिमुख्यस्य क्षमतायाश्च परिचय: प्रस्तुत:। अत्र भारतीयताया एक: सुदृढ आधारो विद्यते य: कीदृश्या अपि परीक्षाया: साम्मुख्ये प्रभवति।

आगामिनो मासा कठिना: सन्ति। अस्माकं समक्षमगणिता: समस्या: सन्ति या: प्रति तत्कालं ध्यानदानमावश्यकं विद्यते। वर्षाया अभावे बहुषु भागेषु दुष्काल आपतित:। परिणामतस्तत्र कृष्युत्पादनं न्यूनमभवत्। विदेशादार्थिकसाहाय्यस्य तथा निर्यातााल्लाभस्य यावत्याशाऽवर्तत तावती नाभूत्। विदेशि-मुद्राणां नैयून्येनौद्योगिकोत्पादनेऽपि प्रभाव: सञ्जात:। अस्माभिरेतानि काठिन्यानि दृष्ट्वा न सन्तप्तव्यं किञ्च साहसोऽपि नापाकरणीय:। अस्माभि: ससाहसं सम्मुखीनैर्भवितव्यम्, अस्माभि: स्वस्खलितै: शिक्षितव्यं तथा भूयस्तानि न भवेयुस्तथा वर्तितव्यम्।

अकालस्यास्मिन् वर्षेऽस्माभिरात्मजनेभ्योऽन्न-सङ्ग्रह: कर्तव्य एव। तच्छासनस्य प्रथमं कर्तव्यम्। आयातितस्य तथा देशस्यान्नव्यवस्थां तस्योचितवितरणं प्रति च तत्कालमस्माभिर्ध्यानं दातव्यमस्ति। अन्नस्य व्यवस्थां तथा वितरणस्यास्माकं सर्वा योजना: प्रवर्तयितुं वयं राज्यसर्वकाराणां तथा सर्ववर्गीयाणां जनानां पूर्णं सहयोगमाशास्महे। केरलसदृशानि क्षेत्राणि प्रति, यत्राभावस्य स्थितिरतीव गम्भीरा विद्यते, विशिष्य ध्यानं दास्यते। अकालस्य क्षेत्रेषु मातॄणां बालानामाहारं प्रति विशिष्य ध्यान-प्रदानाय वयं यतिष्यामहे, यतस्तेषां स्वास्थ्यं स्थायिन: सङ्कटस्योपागमनाद् रक्षितुं शक्येत।

केवलमधिकमुत्पादनमेवास्माकं खाद्यसमस्यां समाधातुं शक्नोति। कृषकान् यावज्जलं रासायनिकमुर्वरकं, सुबहूत्पत्तिकराणि बीजानि, यान्त्रिकं साहाय्यमृणञ्च प्रापयितुं रुचिरा योजनाऽस्माकं समीपे वर्तते। कृषे: क्षेत्र आत्मनिर्भरत्वं सर्वत: प्रथममावश्यकमस्ति। एतेन न केवलमस्माकं महत्यास्तथा निरन्तरं प्रवर्धमानाया जनसंख्याया आवश्यकता पूरणीयाऽपि तु निर्यातायाप्यधिकमुत्पादनं कर्तव्यं विद्यते। आर्थिकोन्नतेरस्माकं नीतौ सार्वजनिकक्षेत्रे सुदृढोद्योगस्य विद्युतो यातायातस्य गतिशीलाया विस्तृतेर्महत्त्वपूर्णा भूमिका वर्तते। अस्मादृशीषु स्थितिष्विदं केवलमिदं वाञ्छनीयमेव नास्ति परमावश्यकमप्यस्ति। एतया सार्वजनिके क्षेत्रे नवीनानुद्यमानारभ्य तेषां सुचारुरूपेण प्रवर्तनं तथाग्रिमविनियुक्तद्रव्याय पर्याप्तलाभप्रापणमप्यनिवार्यं भवति। अस्माकं योजनानां स्वरूपे सार्वजनिकस्य स्वात्मन: क्षेत्रस्य

मध्ये परस्परं न किमपि वैमत्यम्। अस्माकं मिश्रिताऽर्थव्यवस्थायां नैजोद्योगः फलितः पुष्पितश्च तथा सर्वकारपक्षतस्तस्मै साहाय्यमपि प्राप्तम्। वयं तस्याभिवर्धनं तस्मै सहायता-प्रदानं च न रोत्स्यामः।

साम्प्रतिकीभिर्घटनाभिरस्मभ्यं तान्त्रिक्या आत्मनिर्भरतायाः पूर्णाः सम्भावना गवेषयितुमनिवार्याः कृताः सन्ति। वयं विदेशाद् यस्याः सामग्र्या आयातं कुर्मोऽभियान्त्रिक्याः क्षेत्राय याः सेवाः स्वीकुर्मस्तथा यद्यद्ज्ञातव्यं वयं बहिर्भागात् प्राप्नुमस्तदस्माकं देशीयस्रोतोभ्यः कथमुपलब्धुं शक्यते ? अस्माकमुन्नतिरस्माकमाविष्कृतेः परिष्कृतेः परिवर्तनस्य संरक्षणस्य च क्षमतया संयुक्ताऽस्ति। अस्माकं समीपे गुणवतां वैज्ञानिकानामभियन्तॄणां तन्त्रकर्मिणां च नास्ति नैयून्यम्। अस्माभिस्तेषां समीचीन उपयोगः कर्तव्य एव।

अन्येषां क्षेत्राणामिवार्थिके विकासेऽपि कामनायास्तस्याः क्रियान्वयनस्य च मध्ये महती खातिका विद्यते। एतां खातिकां पूरयितुं प्रशासने यान्यपि परिवर्तनान्यावश्यकानि भवेयुस्तान्यस्माभिः ससाहसं सम्पादनीयानि। अस्माभिर्व्यवस्थापनस्य तथा प्रशासनस्य नवा आधुनिकाश्च प्रकारा आत्मसात् करणीया एव। सर्वकारतन्त्रेऽधिकं कार्यक्षमताऽऽनेतव्या। आवश्यकताऽनुभवितव्या यतस्सा जनानावश्यकता अत्यधिकं जागरूकाः कर्तुं शक्येत।

अस्माकं परम्परां स्मृतौ धारयद्भिरस्माभिः सर्वानेव देशान् प्रति शान्तेर्मैत्र्याश्च नीतिः स्वकृताऽस्ति, स्वीतन्त्रयाः सम्मतेरधिकारोऽवश्यमेवात्मनो निकटे रक्षितः। स्वस्या विदेशनीतेः स्थिरीकरणसमयेऽस्माभिर्येषां सिद्धान्तानां पालनं कृतमस्ति, तेऽस्माकं देशस्य परम्परानुसारिणः सन्ति तथा राष्ट्रियेण हितेन सम्मानेन चापि साम्यं भजन्ते। मम पितृपादानां मौलिकाः सिद्धान्ता, येषां कृते ते शास्त्रिणश्च समर्पिता आसन्,अस्माकं मार्गदर्शनं कुर्वन्तः स्थास्यन्ति। अहं शान्तेरन्ताराष्ट्रियसहयोगवर्धनस्य च दिशि कार्यं करिष्यामि, येन सर्वेषु स्थलेषु जना निर्भयं समानतया स्थातुं शक्नुयुः।

वयं शान्तिं वाञ्छामः, यतो ह्यस्माभिरेकमन्यद् युद्धं कर्तव्यमस्ति—दीनताया रोगस्याज्ञानस्य च विरुद्धं युद्धम्। कार्यमन्नं वस्त्रं गृहं स्वास्थ्यं शिक्षा चेत्येषां विषयेऽस्माकं देशस्य निर्बलमथ चाल्पाधिकारवन्तं वर्गं, यस्मै सामाजिक-सुरक्षाया आधिक्येनावश्यकता विद्यते, अहं प्राथमिकतायां प्रथमं स्थानं ददामि।

युव-वर्गायाधिका अवसरा उपलब्धव्याः। भारतस्य तरुणैरिदं ध्यातव्यं यदद्य देशाय ते यद्ददति, तदेव श्वो देशस्तेभ्यः प्रतिदास्यति। देशोऽभिलषति यत् त उन्नता भवेयुः। विज्ञापनस्य कलाया विचारस्य क्रियायाश्च विश्वं तानाह्वयति। अस्माभिर्नूतनाः सीमा उत्तरणीयाः सन्ति, नवीनानि क्षितिजानि स्प्रष्टव्यानि तथा नवान्युद्देश्यानि साधनीयानि सन्ति।

अस्माकं धर्मा भाषा राज्यानि च यानि कानि वा भवन्तु, वयमेकस्यैव देशस्य जना: स्म:। वयं सर्वे कृषका: कर्मकरा: शिक्षकाश्छात्रा:, वैज्ञानिकास्तान्त्रिका:, उद्यमिनो व्यवसायिन:, राजनीतिज्ञा जनसेवकाश्च स्वपक्षत: पूर्णतया प्रयतेमहि। अस्माभि: सुदृढै: सहनशीलैरनुशासितैश्च भवितव्यं यतो हि सहनशीलताऽनुशासनञ्च लोकतन्त्रस्याधारभित्तिभूते स्त:। वयं यं प्रगतिशीलं समाजं यां न्यायपूर्णां सामाजिकव्यवस्थाञ्च निर्मातुमिच्छाम:, लक्ष्यस्यैकेन परिश्रमेण सहयोगेनैव ते सम्भाव्येते।

अद्याहं स्वमात्मानं स्वदेशस्य निर्मातॄणामादर्शाणां लोकतन्त्रस्य धर्मनिरपेक्षतायाश्च नियोजितायाः सामाजिकार्थिकोन्नतेस्तथा देशस्य मध्ये शान्तिं तथा मैत्रीं प्रति वचनबद्धां भावयामि।"

एतेन सन्देशेन समग्रमपि भारतं राष्ट्रं श्रीमत्या इन्दिरा-महाभागाया वास्तविकीं कर्तव्यभावनां स्वदेशस्य स्थितिमावश्यकतां च ज्ञातुं प्राभवत् स्वदेशाय कथं केन वर्तितव्यमिति च स्पष्टमबोधत।

स्पष्टा स्थितिर्व्यक्तविचारपूर्णा भाषा तथा भावनिबद्धदृष्टिः।
छलं विना वस्तु-विधाननीतिः प्रीतिं समुत्पादयतीह लोके ॥१०॥

□ स्वदेशस्य नेतृत्वं सङ्घर्षश्च

स्वदेशस्य नेतृत्वमुद्योतयन्ती, महत्त्वप्रपूर्णं पदं शोभयन्ती।
जनान् सेवमानाऽसमाना स-माना व्यराजत् सदैवेन्दिरा भासमाना ॥११॥

श्रीमत्या इन्दिराया भारते प्रधानमन्त्रिरूपेण चयनं समसामयिकेतिहासे स्वपद्धतेः प्रथमैव घटनाऽऽसीत्। तस्याश्चयनञ्चाभवत् स्वस्य प्रगतिशीलस्याधुनिकदृष्टिकोणस्य कारणात् स्वस्या जन-सेवायाः कारणाद् राजनीतेस्तथा राज्यकार्यस्यात्मनो मूल्यवतामनुभावानां कारणात्। १ मार्च १९६६ ई० दिने सा प्रधानमन्त्रिरूपेण संसदि प्राविशत्। वैदेशिकास्तु श्रुत्वैव विस्मयं प्राप्नुवन् यत् पञ्चाशत्कोटिजनवसतिशालिनो राष्ट्रस्य प्रशासनसूत्रमेकस्यै महिलायै समर्पितम्। सर्वतोऽधिकमाश्चर्यं त्वमेरिकावासिनोऽन्वभवन्, यतस्तेषां राष्ट्रे राष्ट्रपतिपदाय महिलाया निर्वाचनस्य कल्पनाऽपि दुःशकैवासीत्।

विश्वस्य राजकीययात्रासु प्रथमां यात्रां श्रीमती गान्धी राष्ट्रपतेः श्रीमतो-**जॉनसन**-महोदयस्य निमन्त्रणेन २७ मार्च १९६६ ई० दिने वाशिंगटन-नगरं प्राप्यामेरिकाया राजकीयायात्रातः प्रारभत। तत्रत्येषु वार्ताहरेषु प्रश्नानुत्तरयन्ती सा भारतस्य महिलानां स्वतन्त्रता-सङ्ग्रामे, राजनीतौ, सार्वजनिके जीवने प्रामुख्येन स्थितीरनुरक्तीस्तथाऽभियान्त्रिक - राज्यपाल-राजदूत-न्यायाधीश-राजनयिकादिपदेषु सफलतापूर्वकं कार्याणि कुर्वतीनां साफल्येन प्रत्यपादयत् तथैव प्रशासकीयेषु

पदेष्वपि महत्त्वपूर्णां भूमिकां ता निर्वहन्तीति प्रत्याय्यात्मनो महिलात्वेन निर्वाचने न किमपि वैचित्र्यमस्तीत्यवा बोधयत्। भारते तदानीं १९६६ ई० वत्सरे संसद्यूनषष्टि-मिता महिलासदस्या आसन्, सप्तदशराज्यानां विधानसभासु तु भूयस्यो महिला-सदस्या विधायिका अवर्तन्त। श्रीमती सुचेता कृपलानी च भारतस्य सर्वतो महतो राज्यस्योत्तरप्रदेशस्य मुख्यमन्त्रिपदे विराजमानाऽभवत्। इत्थं भारतीयैरावैदिक-कालात् स्वीकृतो महिलानां सम्मानभावः साम्प्रतं यावद् यथावत् प्रवर्त्यत इति स्पष्टतया कथनेन सा भारतस्य गौरवमप्यवर्धयत्।

अमेरिकायां श्रीमतीन्दिरागान्धी सर्वातिशायि-सम्मानं प्राप्नोत्। राष्ट्रपति-महाभागास्तेषां पत्नी चातीव सौहार्दं प्राकटयताम्। तत्र विहितानां वार्तानां परिणत्या तस्मै वर्षायातिरिक्तसाहाय्यरूपेण पञ्चाशत्कोटिडालरमुद्राणां साहाय्य-राशौ वर्धनं प्रतिज्ञातम्। भारतामेरिकयोः परस्परं सद्भाव-मैत्री-संवर्धिन्या मनः-स्थितेर्वातावरणं सम्पाद्य श्रीमती गान्धी ततो लन्दन-पेरिस-मास्को-नगराणामपि यात्रामकरोत्। सर्वत्र साऽऽत्मानंराष्ट्रपति-श्रीजॉनसन-महोदयस्य कथनानुसारं 'पूर्णा स्वाभिमानिनी, अत्यन्तं शालीना योग्या च महिला विद्यत इत्येव नासाध-यदपि तु पूर्णतः स्वीय-पद्धतेर्निर्णयवती स्वाधीनचित्ता प्रशासिका'ऽस्तीत्यपि पूर्णतया प्राचीकटत्।

श्रीमतीन्दिरागान्धी महाभागा यस्मिन् वर्षे प्रधानमन्त्रिपदाय निर्वाचिताऽऽ-सीत् स वर्षो वस्तुतोऽनेकासां समस्यानां वर्ष आसीत्। १९६५ ई० वर्षे पाकिस्तानेन सह प्रवृत्तस्य युद्धस्य समाप्त्यनन्तरं १९६६ ई० वत्सरे युद्धे जातानां क्षतीनां पूरण-मत्यावश्यकमभूत्। देशे यानि विकासकार्याणि प्रवर्तितान्यासन् तेषामभिवृद्धये सुदृढस्य प्रयासस्यापेक्षाऽवर्ततैव। केरलेषु तस्मिन्नेव वत्सरे खाद्यान्नस्य सङ्कटो ऽपि भीषणतां प्राप्तः, मिजोक्षेत्रस्था नागाविद्रोहिण उत्पातेन जनान् भीषयन्ति स्म, बङ्गेषु कृष्णापणिका भ्रष्टाचाराश्च व्यापारिणोऽन्नसङ्ग्रहेण कलकत्तानगर्यामन्ना-भावं समुदपादयन्। वामपथानुसर्तारः पश्चिमबङ्ग प्रशासका असहयोगेन केन्द्रशासनं निन्दन्ति स्म। इत्थं प्रायः सर्वासु दिक्षु मुखानि व्यादाय समस्या उपस्थिता आसन्। तथापि धैर्येण साहसेन च सर्वासां समाधानाय श्रीमतीन्दिरा गान्धी दिवा-निशं प्रयस्यन्ती सम्पूर्णेन विवेकेन तत्पराऽभूत्। समाहिताश्च भूयस्यः समस्याः। तया महाभागया खाद्यान्ननीतौ पुनर्विचारं कर्तुं तथा १९६२ ई० त आरब्धाया **राष्ट्रस्यापात-स्थितेर**पवारणाय वचनं दत्तम्। एको नवीन आर्थिकः कार्यक्रमः प्रस्तावितः। भारतीय-रूप्यक-मुद्राया ३६ प्रतिशतमवमूल्यनं विहितम्। सर्वकारीय-प्रयासाः प्रोत्साहिताः। प्रथमदुष्कालानन्तरं केरलेषु पश्चिमबङ्गेषु च खाद्यान्न-प्रेषणायादिष्टम्। उत्कल-मध्यप्रदेश-महाराष्ट्राणामभावग्रस्तक्षेत्रेषु भ्रमणं विधाय राज्यसर्वकारा व्यापिन्याः सहायतायाः कार्याणि खाद्यान्नवितरणस्य

व्यवस्थाश्च विधातुं प्रबोधिताः। सघनायाः कृषेः कार्यक्रमः समर्थितः। उपलब्धस्य खाद्यान्नस्य सत्वरतया यत्र तत्र प्रेषणं कृतम्। पर्याप्तरूपेण वास्तविकमूल्यवतीनां विपणीनां व्यवस्था सम्पादिता। द्वितीयवारमापतितस्य दुष्कालस्य स्थितौ बिहार-पश्चिमबङ्गाल-केरलेषु काङ्ग्रेसेतरसर्वकारेभ्यो यथासम्भवं सहयोगः प्रदत्तः। इत्थं सा महाभागा सङ्कटापन्नायामवस्थायां स्वल्पात् स्वल्पतरं काठिन्यं कष्टं चानुभूय पारमुत्तरणेनात्मानमेव धन्याममन्यत।

किञ्चाक्तूबर १९६६ ई० मासि देहल्यामेकं **त्रिपक्षीय-सङ्घनिरपेक्ष-शिखरसम्मेलन**'मायोजितम्। **मिस्र-यूगोस्लावियाभ्यां** सह भारतस्य नैकटिक-सम्बन्धाय पुनर्जीवनदानाय च भारतस्य विदेशनीतावुपनिवेश-विरोधिनीनां प्रवृत्तीनां पुनः संस्थापनाय च प्रयतितम्। राष्ट्रपति-**श्रीटीटो-राष्ट्रपतिश्रीनासर-**महोदयाभ्यां साकं सम्मन्त्र्य संयुक्तरूपेणोत्तरवियतनाम-प्रदेशेऽमरीकाया अग्न्यस्त्रवर्षणं पणं विनाऽवरोद्धुं निवेदितम्। एता उपलब्धयो वस्तुत एकस्मै देशायैकस्यै प्रशासिकायै महत्त्वपूर्णा एवावर्तन्त। भारतीय-संस्कृतेरयमेव सिद्धान्तोऽत्र तया स्वीकृत आसीद्, यत्—

अकृत्वा पर-सन्तापमगत्वा खल-मन्दिरम्।
अक्लेशयित्वा चात्मानं यत् स्वल्पमपि तद् बहु॥ इति।

इयदेव नैव; तेष्वेव दिवसेषु भाषाणामाधारेण पञ्जाब-प्रान्तस्य विभाजन-प्रश्नोऽपि तीव्रतां प्राप्तः। तस्य दीर्घकालादागतवतो विवादस्य समाप्त्यै १-११-६६ ई० दिने प्रधानमन्त्रिमहाभागया विभाजनस्यापि स्वीकृतिर्दत्ता। तया स्वीकृत्या हरियाणावासिनो विकासस्य समुचितानवसरानलभन्त। विपक्षा विरोधमप्यकार्षुः। केचन हरियाणा-पञ्जाब-दिल्लीषूपद्रवा अप्यभूवन्। गोरक्षान्दोलनमपि तदैवारब्धम्। श्रीगुलजारीलालनन्दामहोदयोऽपि त्यागपत्र-मदात् कारणं च तस्य स्वीयानां सहयोगिनामदूरदर्शितां व्यावृणोत् तस्यान्दोलनस्य प्रतिक्रिया-स्वरूपं च १९६७ ई० वत्सरे सम्पन्नेषु महानिर्वाचनेषु काङ्ग्रेसदलेन पूर्ववद् बहुमतं नाधिगतम्। केवलं २८२ स्थानानि जित्वैव सन्तोषं प्राप्नोत्। गोरक्षान्दोलनप्रभावाज्जनसङ्घेन देहल्यां बहुमतेन विजयः प्राप्तः। मद्रास-प्रान्ते **'डी० एम० के०'**-दलेन तथोत्कलप्रदेशे **'स्वतन्त्रदलेन'** शासन-सत्ता स्वायत्ती कृता। तदा श्रीमतीन्दिरा गान्धी मनागपि मानसीं व्यथां चिन्तां वा नैवानुभवन्ती यथाकालं यथाप्राप्तं स्वीकृतवती, यतस्सा निश्चितरूपेण मनुते स्म यद्—

यत्र स्वेष्टं प्रतिनिधिमथ स्वेच्छया वीतभीका,
लोकाश्छन्दाकलन-विधिना साधु निर्वाचयेयुः।

जित्वा कुर्यात् प्रतिनिधिरपि स्वीय-कर्त्तव्यरक्षां,
तस्याख्याऽऽस्ते भुवन-विदिता वस्तुतो लोकतन्त्रम् ॥१२॥

किन्तु निर्वाचन-प्रचारकालस्य मासद्वयावधिकदिवसेषु तत्रभवतीन्दिरा-गान्धीमहाभागा पञ्चदशसहस्रोत्तरद्विशत-मीलमितां यात्रामकरोत् किञ्च षष्ट्युत्तरैकशतमितासु जन-सभासु भाषणान्यकरोत्। तदातनीं स्थितिं विवृण्वानेनैकेन लेखकेन लिखितमासीत्—

"तासामाभिजात्यवर्गीये सौष्ठवे, —यदधिसङ्ख्य-भारतीय-जनतायाः प्रेम्णः प्रशंसायाश्च कारणतां प्राप्तमभूत्, कियता चिदंशेनैकस्या गृहिण्याः स्वस्थं मातृत्वमपि सम्मिश्रितमासीत्। आभिजात्य-स्वरूपेण सह जनवादस्य समन्वयस्तासां राजनीतिक-सफलतानां रहस्यमवर्तिष्ट।"

श्रीमतीन्दिरागान्धी-महाभागा स्वयमेवैवमात्मन्यमंस्त, यत्—

सत्यं प्रभावयति पूर्णतया जनौघं, कृत्वा त्रुटीरपि जनो न जहाति चेत् तत्।
सोऽप्यत्र वेत्ति सकलां स्थितिमत्र पुंसः, सङ्गं करोति च ततः परमादरेण ॥१३॥

तथाविधायां स्थितावपि काङ्ग्रेसदलं प्रति निष्ठावतां नासीदल्पत्वम्। स्वाधीनतायै विहितानां त्यागानां बलिदानानां कथा धूसरिता नाभूवन्। वास्तविकं तत्त्वं जानानानां विवेकात् काङ्ग्रेसस्य प्रशासनादेव देशः प्रगतिमेष्यतीति विश्वसतां जनानां सौहार्दबाहुल्यात् तथा श्रीमत्याम् इन्दिरागान्धीमहाभागायां सर्वतोभावेन विश्वसनात् केन्द्रे तु काङ्ग्रेसदलेन बहुमतं प्राप्तमेव। श्रीमतीन्दिरा रायबरेलीतो लोकसभायै निर्वाचिता तथा १२ मार्च, १९६७ ई० दिने भूयोऽपि सा प्रधान-मन्त्रित्वाय निर्णीता। उपप्रधान-मन्त्रिपदं च श्रीमोरारजीभ्रात्रे दत्तम्। इत्थं काङ्ग्रेसस्य शासनं तु सञ्जातं परं देशे तस्य दलस्य यादृशमेकच्छत्रं साम्राज्यमासीत् तद्विच्छिन्नम्। अष्टसु राज्येषु विरोधिदलानां शासनमभूत्। तेष्वेव दिनेषु नवीनस्य राष्ट्रपतेर्निर्वाचनप्रसङ्गोऽप्युपागतः। श्रीमती गान्धी तस्मै पदाय धर्मनिरपेक्षतां विमृश्य श्रीमतो डा० **जाकिर हुसेन**-महोदयान् प्रत्याशित्वेन प्रास्तावयत्। विरोधिनामत्यन्तं विरोधे सत्यपि डा० **जाकिरहुसेनमहोदया** एव राष्ट्रपतिपदे निर्वाचिताः। एतेनेदं सिद्धमभूद् यत् प्रधानमन्त्रिमहाभागायास्तस्या भारतीयेषु कियानासीत् समादरः प्रभावः स्नेहश्च ?

देशं सेवितुमुद्यता गतभया निःस्वार्थभावान्विताः,
कर्मस्वेव सदा निजामधिकृतिं मत्वा गृहीतव्रताः।
सत्कार्यैर्जनमानसेषु नियतं पूर्णानुरागं श्रिताः,
सर्वत्रैव जयन्ति वैर-बहुला अप्यत्र निष्ठायुताः ॥१४॥

किन्तु स्वयं श्रीमतीन्दिरागान्धी महाभागा स्वदेशस्य रक्षार्थं निरन्तरं चिन्तिता सती प्रच्छन्न-शत्रुभ्यो भारतं संरक्ष्य तदुन्नतये तत्पराऽवर्तत। सा ६ जून, १९६७ ई० दिने लोकसभायां पश्चिमेशियायाः सङ्कटार्थमिज-रायलमुत्तरदायि व्यावर्णयत्। महत्या अक्तूबर-क्रान्तेः स्वर्णजयन्त्यां समवेतुं सा मास्को-नगरमगच्छत्। २२ अगस्त १९६८ ई० दिने चैकोस्लोवाकि-यातः सोवियत-सैन्यस्य परावर्तनाय सोवियतसङ्घं प्रभावयितुं वचनमदात्। १४ अक्तूबर १९६८ ई० दिने सा संयुक्तराष्ट्र-सङ्घस्य सामान्य-सत्रं समबोधयत्। तस्मिन् वत्सरे दल-परिवर्तकानां प्रवाहोऽपि वर्धमान आसीत्। काङ्ग्रेसस्य कार्यकारिण्यामिन्दिरागान्धी-महाभागायास्तथा नियुक्ति-पूरकेषु स्थानेषु दक्षिणमार्गवतां प्राबल्यमभूत्। अत एव राज्यसभाया द्विवार्षिकनिर्वाचने-ष्ववकाशग्राहिणां काङ्ग्रेससदस्यानां स्थाने केवलं चतुःस्त्रिंशत्स्थानान्येव काङ्ग्रेस-दलेन प्राप्तानि। भाषा-विवादा अपि प्राचलन्नेव। राजस्थानेऽनावृष्ट्याः कारणाद् बाड़मेर-क्षेत्रे भीषणो दुष्काल आपतत्। हिंसका उपद्रवास्त्रोटन-स्फोटन-घटनाः सततं यत्र-तत्र प्रावर्तन्तैव। पत्रकारकर्मचारिणां केन्द्रीय-कर्मचारिणाञ्च वेतनवृद्धये कार्यविरोधा अप्यक्रियन्त।

बङ्गाल-बिहारोत्तरप्रदेश-पञ्जाब-प्रदेशेषु काङ्ग्रेसातिरिक्त-सर्वकाराणां पतनं तथा तत्र सर्वत्र राष्ट्रपति-शासन-स्थापनेन सहैव हरियाणाप्रदेशे मध्यावधि-निर्वाचने काङ्ग्रेसाय तदा स्पष्टबहुमतप्राप्तिकार्याणि श्रीमत्या इन्दिरायै गौरववर्धकान्येवाभवन्। तदा पाकिस्तानेन सहान्तरिकसङ्घर्षभावना वर्धमाना ऽऽसीत्, ततस्तेन चीनदेशेन साकं संयुज्य पूर्वसीमान्तस्य मिजोविद्रोहिभ्यः सैन्यप्रशिक्षणं शस्त्रप्रदानं चारब्धम्। तेषां दमनाय दाढ्र्येन प्रवर्तितं तथो-त्तरपूर्वक्षेत्राणां समस्याः समाधातुं, मेघालयस्य पृथग् राज्यं विधातुं मिजोरमञ्चासमप्रदेशात् पृथक्कृत्य पूर्वसीमान्तायारु**णाचल**-नामप्रदानाय च विचारितम्। विश्वन्यायाधिकरणेन 'राजनीतिक-कारणेभ्यः' **कच्छक्षेत्रस्य** मरुभुवो विवाद-विस्तृत्या **'कंजरकोट-छाड़बेट'**-सहिता ३३० वर्गमीलमिता भूमिः पाकिस्तानाय दत्ता। सत्यपि प्रतिकूलेऽस्मिन् निर्णये विश्वन्यायाधिकर-णस्य प्रत्यर्पण-पणानुसारं स निर्णयो भारतेन स्वीकृतः। अस्मिन् संवत्सरे श्रीमतीन्दिरागान्धी-महाभागा दक्षिण-पूर्ववर्तिनामेशिया-देशानां तथा लातीन्य-मरीकादेशैः साकमेव विश्वस्य 'कैरोनियन-द्वीपसमूहामरीका-इङ्ग्लैण्ड-पश्चिम-जर्मन-राष्ट्राणां' सद्भावना-यात्रा अप्यकार्षीत्।

काङ्ग्रेस-दले वर्तमाना वैचारिकमतभेदास्त्वरितया गत्यैधन्ते स्म। के चन दलस्य कार्यकारिण्यां श्रीमतीन्दिरामहाभागाया विरुद्धमाचरणानि विधायान्ये च **'स्वतन्त्रदल-जनसङ्घ'**—सहयोगेन संयुक्त-सर्वकार निर्मितयेऽपरे च धनिनां

पक्षग्रहणेनेतरे च समाजवादपुष्टये समागृह्णाना अवालोक्यन्त। एवं सत्यपि—

धृत्वाऽद्भुतं धैर्यमपूर्वसंयमं, मनो नियम्याथ समग्र-साहसात्।
बाधाः पराकृत्य पुरः प्रयान्ति ये, त एव सिद्धिं तरसाऽऽप्नुवन्ति ॥१५॥

इति किंवदन्तीं मनसि निधाय कदापि सा मानसं वैचारिकं वा शैथिल्यं नाप्नोत् तत एव च सा सर्वत्र विजयिनी समवर्तत।

स्वदेशस्य जनता पूर्णरूपेणेयं जानाति स्म यदत्र श्रीमतीन्दिरागान्धी-महाभागा यतः प्रभृति प्रधानमन्त्रिपदेऽतिष्ठत् तत एव देशे प्रगतिशीलानि कार्याणि सम्पन्नानि तैश्च देशास्यार्थिक-स्वरूपपरिवर्तनेन सहैव सामान्या जनताऽप्यत्यन्तं प्रभाविताऽभवत्। प्रधानमन्त्रिपदग्रहणात् पूर्वमिन्दिरामहाभागाया मनसि या या भावना आसंस्तासां साकारतायै स्वैच्छिकोऽवसरोऽपि तया तदैव प्राप्त आसीत्। सा महाभागा स्वपितॄणां चरणचिह्नेषु चलन्ती तेषां नीतीरेव सर्वथाऽन्वसरत्। सा स्वीया आलोचनाः प्रति सर्वदा सहिष्णुरवर्तत परं दलस्य नीतिविषये यदा मिथ्याऽऽरोपाः क्रियन्ते स्म तदा कथमपि मौनं नास्थात्। किन्तु वास्तविकीं स्थितिं ज्ञातुमालोचकानवश्यमागृह्णात्।

श्रीमत्या इन्दिरा-गान्धी-महानुभावाया आन्तरिकेण विरोधेन तया प्रवर्तितानां प्रवर्त्स्यताञ्च कार्याणां साफल्ये विघ्नीभूता अनेके दलीयाः कार्यकर्तारोऽपि यतमाना अभूवन्। १९६९ ई० वर्षस्य १३ जनवरी-दिने मन्त्रिमण्डले परिवर्तनं विधाय सा **'विदेश-व्यापारापूर्ति'**-संज्ञकमेकं नवीनं मन्त्रालयं न्ययोजयत्। संसदि स्वीयेनाल्पीयसा बहुमतेन सा किञ्चिद् भीताऽत्यन्तं सावधाना चावर्तत तया दृढतया देशस्य निर्धनाया जनतायाः स्थितेः समुन्नयनायैको दशसूत्रीयः कार्यक्रमो घटितः। दक्षपथानुयायिनां विरोधे सत्यपि सा महासमितौ स्वप्रस्तावितं कार्यक्रमं स्व्यकारयदेव यस्मिन् धनागारिकाणां जीवन-बीमा-निगमस्य च राष्ट्रियत्वकरणं, भूतपूर्व-महाराजानां राज्ञां च वार्षिक-देयधनस्य समाप्तिरेकाधिकारिष्वौ-द्योगिक-परिवारेष्वङ्कुशो भूमेः परिष्कारः सार्वजनिकोद्योगानामभिवर्धनञ्चे-त्यादिसूत्राण्यप्यासन्। इत्थं दार्ढ्येनोत्थापितस्य समाजवाद्युपक्रमस्य कारणाद् दक्षपक्षानुसर्तारो दत्तावधाना अभवन्। तैश्चिकीर्षितं यत् कथमप्यस्या वर्धमान एकाधिकारो जनतासु प्रभावश्च श्लथनीयः किञ्च यथा कथञ्चिदियं सत्ताया अपाकरणीयेति।

दले वामपथानां दक्षिणपथानाञ्च विचारधारायाः सङ्घर्षो १९६९ ई० वर्षस्याप्रैलमासे काङ्ग्रेसस्य फरीदाबादाधिवेशनावसरे दल-विभाजनस्य सङ्केतान् दातुं प्रावर्तिष्ट। काङ्ग्रेसाध्यक्षस्य श्रीनिजलिङ्गप्पामहोदयस्य

तथा एस० के० पाटिल-मोरारजीभ्रातॄणां जनसङ्घ-स्वतन्त्रदल-डी० एम० के०-प्रभृति-साम्प्रदायिकानां प्रतिक्रियावादिनाञ्च पक्षं प्रति वलनं तेषां दक्षिण-पथविचारान् प्रकटीकुरुते स्म। तेषां कर्तव्येष्वेकाधिकारवादस्य गन्ध आयाति स्म यं श्रीमतीगान्धी दूरीकर्त्तुं वाञ्छति स्म। तस्मिन्नधिवेशने तस्या मनसीदं निश्चितमिवाभासत यदधुना दलस्य विभाजनं कथमपि रोद्धुं न शक्ष्यत इति' परं केनापि नाटकीयेन विधिनाऽधिवेशनेऽग्निर्लग्नः। परिणामतश्चाधिवेशनमपूर्णनिर्णयैः सहैव समाप्तम्।

ततः परं मईमासे सहसा **राष्ट्रपति-श्रीजाकिरहुसेन-महाभागानां देहावसानम**भूत्। राष्ट्रं पुनरेकस्य महतो देशसेवकस्य राष्ट्रकर्णधारस्य मृत्युना दुःखितं शोकाग्नि-सन्तप्तं चाभूत्। श्रीमतीन्दिरागान्धी तेषां पूर्णं समादरं करोति स्म; तस्मात् सा तेषां निधनेन खिन्ना सचिन्ता चासीत्। नवीनस्य राष्ट्रपतेश्चयनप्रश्ने काङ्ग्रेसस्यान्तर्निरुद्धो मतभेदः प्रत्यक्षीभूतः। श्रीमतीन्दिरागान्धी समाजवादि-विचारधारावतां **श्रीवराहवेङ्कटगिरिमहाभागानां** नाम प्रास्तौत् परं समाजवाद-विरोधिनः स्वस्य प्रत्याशिरूपेण **श्रीसञ्जीवरेड्डीमहानुभावानां** नाम प्रास्तुवन्। परस्परं शक्तिपरीक्षणं सम्पन्नम्, परं 'देशस्य जनता येन साकं भवति तस्यैव विजयो भवती'ति सुनिश्चितमासीत्। अन्ततो जनताया एव विजयोऽभूत्। **श्री वि० वि० गिरिमहाभागा** एव बहुमतेन विजयं प्राप्ताः। आसीदयं विजय इन्दिराया एव। हतप्रभाः सर्वे विरोधिनस्तेन पराजयेन पीडिताः श्रीमत्या इन्दिरायाः समर्थकयोः **श्रीजगजीवनराम-श्रीफखरुद्दीनअली-महोदययोरुपरि** ततः परं च श्रीमत्यामिन्दिरागान्धीमहाभागायामप्यनुशासन-सम्बद्धं व्यवहारमकुर्वन्।

७ जुलाई १९६९ ई० दिने काङ्ग्रेसमहासमितेरधिवेशनं पुनः 'बंगलौर'-नगरे प्रारब्धम्। श्रीमत्या इन्दिरागान्धीमहाभागाया दृढनिश्चयि व्यक्तित्वं तस्मिन्नधिवेशने प्रत्यक्षीभूतम्। आसीत् तदधिवेशनं काङ्ग्रेसदलस्य समग्रेऽपि जीवने महत्त्वपूर्ण-भूमिकात आरब्धं तथा महत्त्वपूर्णैर्निर्णयैः सह काङ्ग्रेस-विघटनेन समाप्तम्।

ये स्वीकृतं मार्गमनुव्रजन्तो, रुन्धन्ति नो विघ्नभयेन भूयः।
बाधास्तिरस्कृत्य पुरश्चलन्तस्त्युट्यन्ति ते किन्तु, नमन्ति नैव ॥१६॥

श्रीमतीन्दिरा स्वीयामर्थनीतिंप्रभावयितुं श्रीमोरारजीभ्रातॄन्वित्तविभागात् पृथगकरोत् तेन खिन्नास्ते स्वपदात् त्यागपत्रमदुः। ततः परं वित्तविभागोऽपि श्रीमत्येन्दिरागान्धीमहाभागयाऽऽत्मनिकट एव रक्षितः किञ्च चतुर्दश-प्रमुख-द्रव्यागारिकाणां राष्ट्रियकरणमपि विहितम्। राष्ट्रियकरणनीत्या सन्तुष्य

जनताऽत्यन्तमुत्साहेन तदीयमभिनन्दनमकार्षीत् । श्रीस्वर्णसिंहेऽनुशासनकार्य-प्रक्रियां कुर्वति काङ्ग्रेसदलस्य प्रतिशोधे श्रीमतीन्दिरायाः समर्थकाः श्रीसुब्रह्मण्य-महाभागं काङ्ग्रेसस्यान्तरिमं सभापतिं न्ययुञ्जन् । परतश्च पृथक् 'तैलंगाना'-प्रदेशस्य कामनायाऽन्ध्रप्रदेशस्य दीर्घकालिकमुग्रञ्चान्दोलनमकार्षुः। तेषां याच्ञां सा न स्वीकृतवती । मध्यप्रदेशे सं-वि-द-सर्वकारस्य पतनं जातम् । गुर्जरप्रदेशे झञ्झावातो जलोत्प्लवनं च, उत्तरप्रदेशे तथा पश्चिमबङ्ग-प्रदेशेऽपि नदीषु पयसामुत्प्लवनानि, पश्चिमबङ्गप्रदेशे 'बङ्गाल-बन्द'संज्ञकमान्दोलनं चायपत्रिकोद्यान-वस्त्रयन्त्रालय-शण-यन्त्रालयादि-कर्मचारिणामान्दोलनानि विविधाः कर्मविरामाश्च नितरां प्रवृद्धा भूत्वा देशस्यार्थिकीं सामाजिकीं च स्थितिं विकर्तुं तत्परा इव प्रत्यायन्त । तथापि धृतधीरा कर्मवीरा श्रीमतीन्दिरागान्धी मनागपि विचलिता नाभून्न वा सा स्वीयेषु सङ्कल्पेषु शिथिल-विचाराऽवर्तिष्ट । सत्यमेवेदमस्ति यत्—

सङ्कल्पान् कल्पयित्वा पुनरथ लघु तत्पूर्तये दत्तचित्ता,
दृष्ट्वा विघ्नानुपेतान् हृदि कथमपि ये नैव भीतिं भजन्ते ।
दैवं तेभ्योऽनुकूलं भवति जनगणश्चात्र सिद्धौ सहायो,
भूत्वा सर्वाणि कर्माण्यनवरतपरिश्रान्तितः संविधत्ते ॥१७॥

वर्षेऽस्मिन्नेवामेरिकाया राष्ट्रपतयः श्रीनिक्सनमहानुभावा, ईरानस्य शाहमहाभागा, रूमानियादेशस्य राष्ट्रपतयः, बुल्गारिया-न्यूजीलैण्डयोः प्रधान-मन्त्रिणस्तथेण्डोनेशियादेशस्य विदेशमन्त्रिणो भारतमायाताः । श्रीमतीन्दिरा च—अफगानिस्तान-जापानेण्डोनेशिया-बर्मादिदेशानां सद्भावना-यात्रार्थं गता। परस्परमेतैर्गमनागमनैस्तैः सह व्यापारिकाः सांस्कृतिकाश्च सम्बन्धा अपि दृढतां प्राप्ताः।

☐ नवं सङ्घटनं नवा गतिविधयः

विस्मृत्य वृत्तं घटितं पुरातनं, दुर्नीतिपूर्णं बहुधा प्रवर्तितम् ।
ध्येयं स्वकीयं प्रति गन्तुमुत्सुका, नूत्नानि कार्याणि समाचरन्त्यरम् ॥१८॥

काङ्ग्रेसस्य विभाजनानन्तरमिन्दिरा-समर्थकानां दलं 'नवीनकाङ्ग्रेस'-'सत्ता-काङ्ग्रेस'-'इन्दिरा-काङ्ग्रेस'-नाम्ना च ख्यातिमगच्छत् परेषां च 'सङ्घटन-काङ्ग्रेस' इति संज्ञा प्रावर्तत। ८ जनवरी १९७० ई० वर्षे संसदि राज्ञां विशेषाधिकाराणां तथा राजाधिदेयानां समाप्तिघोषणाऽक्रियत। राष्ट्रियकरणवदेवास्य विधेयकस्यापि वैधता-विषये प्रत्याहूतिरदीयत, लोकसभायां पारिते सत्यपि राज्यसभायामेकस्य मतस्य न्यूनतया च तदस्वीकृतमभूत् तदा राष्ट्रपतीनामध्यादेशेन नरेशानां मान्यता निरस्ता । वित्तमन्त्रित्वाधिकारेण

श्रीमतीन्दिरा १९७०-७१ ई० वर्षयोराय-व्ययकं संसदि प्रास्तौद् यत् पूर्ववर्तिभ्यो भिन्नं प्रगतिमत् सामान्य-जनानामाकाङ्क्षापूरकञ्चासीत्। सामाजिक-न्यायस्य तथार्थिकविकासस्य समन्वयकारि तदायव्ययकमतीवोपयोगि सर्वेषां हितकृदुपेक्षितक्षेत्राणामुन्नतिकृच्चावर्तत।

पाकिस्तानेन सह विवादः, शेखमुजीबुर्रहमानस्यावामी-लीगस्य पाकिस्तानीये महानिर्वाचने स्पष्टा बहुमतप्राप्तिः, आन्ध्रोत्तरप्रदेशयोर्जलोपप्लवाः, भिवण्डी-चन्द्रनगरयोः साम्प्रदायिकोपद्रवाः, पञ्जाब-हरियाणा-प्रदेशाभ्यां समस्या-समाधानं, बङ्गाल-केरलोत्तरप्रदेशेषु राष्ट्रपति-शासन-प्रवर्तनं केरल-प्रदेशस्य मध्यावधिकनिर्वाचने काङ्ग्रेसाय स्पष्टबहुमतोपलब्धिः, मेघालयाय पूर्णराज्यस्य स्वरूप-प्रदानघोषणा तथा राज्यसभाया द्विवार्षिक-निर्वाचनेषु नवीन-काङ्ग्रेसस्य स्थितेरवरोहश्चेति घटनास्तदानीन्तनीनां राजनीतिकारोहावरोहस्थितीनां परिचयायालम्भवन्ति।

विशालस्य भारतस्य प्रधानमन्त्रिपदे विराजमाना श्रीमतीन्दिरागान्धी-महाभागा सर्वासामायान्तीनामायास्यन्तीनां समस्यानां स्थितीनां गभीरेण चिन्तनेन स्फुरन्त्या मनीषया विमलेन विवेकेन समाधानं विदधती दृढेन विश्वा-सेनाग्रे वर्धमाना **मारीशस**-संयुक्तराष्ट्रसङ्घस्य रजतजयन्त्यां भागं गृह्णती सा भारतस्य समूह-निरपेक्षतायास्तात्कालिकेन सन्दर्भेण व्याख्यामप्यकरोत्। तस्मिन् वत्सरे वैदेशिकेष्वतिथिषु—बेल्जीयमस्य सम्राजः, पश्चिमजर्मनदेशस्य विदेशमन्त्रिणः, पोलैण्डदेशस्य राष्ट्रपतयस्तथा जापानस्य विदेश-मन्त्रिणा-प्रभृतयः प्रमुखा आसन्।

एवं सत्यप्यान्तरिकी देशस्य स्थितिः सुदृढा नासीत्। विरोधिनो निरन्तरं विभिन्नैः प्रकारैस्तां प्रच्यावयितुं चेष्टन्ते स्म। संसदि स्वीयां ह्रसीयसीं शक्तिमनुमायान्ते २९ दिसम्बर १९७० ई० दिने मध्यावधिकच्छन्दाकलनाय श्रीराष्ट्र-पतिभ्यः परामर्शं प्रदाय घोषणामकारयत्। कांग्रेसेऽन्तः प्रविष्टस्य दुर्गन्धस्य परा-करणायदेशस्य दूषितवातावरणस्य स्वच्छतायै च निर्वाचनमेवासीदेकं निदानम्। श्रीमती गान्धी स्वीयानां समाजवादिनां लक्ष्याणां पूर्तेरुद्देश्येन जनतायाः सहमतिं प्राप्तुं जनताया राजसभायां निःसङ्कोचमागमत्। यतः सैवं व्यचारयद् —

यल्लोकस्य सदेप्सितं यदुदितं यत् सर्वतः शर्मदं,
यत्र स्वार्थपरा न काऽपि रचना नो वञ्चनं किञ्चन।
यत्सर्वैरनुमन्यते प्रथमतो देशार्थमावश्यकं,
न स्याद् यर्हि तदेव तर्हि वितथं किं लोकतन्त्रं न तत् ॥१९॥

छन्दाकलन-घोषणामाकर्ण्य सर्वाणि दलानि नैर्वाचनिकसन्धि-सन्धानाय संलग्नाः। 'सङ्घटन-काङ्ग्रेस-स्वतन्त्र-दल-जनसङ्घाः सम्भूय नवीनं काङ्ग्रेसदलं पराभवितुमेकं 'महासहयोगि-सङ्घटन'मकार्षुः। १३ जनवरी, १९७१ ई० तः ५ मार्च, १९७१ ई० यावन्निरन्तरं निर्वाचन-यात्रासु व्यस्ता श्रीमतीन्दिरागान्धी वायुमार्गेण त्रिंशत्सहस्रमीलमिताया भुवो यात्रां व्यधात् किञ्च चतुःशताधिकासु सभासु भाषणम्यकरोत् । प्रतिदिनमष्टादश होरावधि नैरन्तर्येण विहितः श्रमस्तस्यै विजयश्रियमदात् । पञ्चाशदुत्तर-त्रिशतमिताः प्रत्याशिनः श्रीमतीगान्धी-महाभागाया नवीन-काङ्ग्रेसदलस्य प्रातिनिध्येन जित्वा संसदि स्थानान्यलभन्त । कृतेऽपि महासहयोगि-सङ्घटने प्रतीपविचारवन्तः पराजयं प्राप्ताः। 'इन्दिरां पराकुरुत स्वदेशं रक्षते'त्युद्घोषकाः स्वयं पराभूताः। श्रीमतीन्दिरागान्धी-महाभागा भूयोऽपि दलस्य नेत्रीत्वेन वृता। पुनः प्रधानमन्त्रिपदे प्रतिष्ठिता। तदा १८ मार्च, १९७१ ई० दिने सा विधिवत् स्वकीयस्य मन्त्रिमण्डलस्य घोषणामकरोत्।

परिहरति विवादान् स्फोरयत्यात्मनीतिं,
प्रहरति परवादान् सत्यतत्त्वं धिनोति।
विहरति च यथेच्छं मानवानां निकाये,
विकिरति भुवि सौख्यं कर्मनिष्ठः पटिष्ठः ॥२०॥

भूमौ नैति गतिं कदापि विषमां कल्याणकृन्मानवो,
गीतायं किल गीतमस्ति नियतं कृष्णेन सर्वात्मना।
तस्मात् सत्यपरास्त्यजन्ति न मुदा श्रेयःपथं श्रीजुषः,
कामं सन्तु पुनः पथीह विपदः किं वा शिवाः सम्पदः ॥२१॥

□

[८]

स्थिरा-कला

कर्तव्य-निष्ठा विरलश्च साहसः

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोऽस्माकं ब्रह्मास्माकं
स्वऽरस्माकं यज्ञोऽस्माकं पशवोऽस्माकं प्रजा अस्माकं वीरा अस्माकम् ॥

—अथर्व० का० १६, सू० ८, मं० १।

स्वीयोन्निनीषाश्रित-भूरि-चिन्तना, व्यर्थं प्रयस्यन्ति विदन्ति नैव ते।
नूनं जगत्युन्नयतोऽत्र मानवं, 'कर्तव्यनिष्ठा विरलश्च साहसः'॥१॥
मत्वात्मनीनं जननं हि सन्ततं, देशार्थमेवार्पितमत्रयो जनः।
संस्पर्धते कर्मसु वर्धतेऽग्रतो जित्वा स लोके लभते शुभं यशः ॥२॥

श्रीमत्या इन्दिराया नवीने मन्त्रि-मण्डले श्रीचह्वाणस्य निकटे वित्त-विभागः, श्रीफखरुद्दीनअलीअहमदमहोदयस्य समीपे खाद्य-कृषि-विभागौ, श्रीजगजीवनरामस्याधीनं सुरक्षाविभागस्तथा श्रीस्वर्णसिंहस्यान्तिके विदेश-विभाग आसीत्। देशेनानुमितमभूद् यत् सत्वरमेव साम्प्रतं समाजवादस्य स्वप्नः साकारतां प्राप्स्यतीति, परं पाकिस्तानमेका विपुला बाधा भूत्वा मध्य आगत्योपस्थितम्।

सङ्घर्षस्याभासस्तु पूर्वत एव भवति स्म। द्वौ तस्करावेकं भारतीयं व्योमयानमुत्प्लाव्य पाकिस्तानं नीतवन्तौ तत्र च तद्दग्धं तथा पाकिस्तान-शासनेन तौ तस्करौ परावर्तनायापि निषिद्धौ। समग्रेऽपि देशे क्रोधस्य वीचि-व्याप्ता परं श्रीमतीन्दिरा संयमेन स्थिराऽतिष्ठत्। पाकिस्तानस्य महानिर्वाचने पूर्व-पाकिस्तानस्य विधानसभायाः सर्वेषु नव-स्थानेषु श्रीमुजीबुर्रहमानस्य **'अवामीलीग'**स्य विजयोऽभूत्। तेन व्यग्रो **राष्ट्रपतिः श्रीयाह्याखाँ** ढाकायां प्रवर्तमानं राष्ट्रिय-विधानसभाया अधिवेशनमनिश्चिताय कालायारुणात्। तद्विरुद्धं शेखमुजीबुर्रहमानः शान्तिपूर्णमसहयोगान्दोलनं प्रावर्तयत् तदा तं निगृह्य स्लामाबादं नीतवन्तस्तत्र च सैनिकन्यायालयेऽभियोगं प्रचाल्य मरणदण्डः श्रावितः। सहैव पूर्व-बङ्गालप्रदेशस्य जनतायां कठोरं पाशविकं सवेगं दमन-चक्रं प्रवर्तितम्। प्राणभयादातङ्किता जनाः शरणोपलब्धये भारत-मायातुं प्रवृत्ताः। स्वल्पेनैव कालेन सार्धसप्तकोटि-सङ्ख्यावतो देशात् प्राय एककोटिमिता हिन्दवो मुस्लिमाश्च शरणार्थिनो भारतमागमन्।

क्रूराणां कुटिलात्मनां च मनसां या वञ्चना-वृत्तयो,
वर्तन्ते नहि ताः कथञ्चिदपि सद्भावा विदन्ति प्रजाः।
सत्यं ते न समाश्रयन्ति नहि वा कुर्वन्ति ते प्रत्ययं,
दुष्कृत्यैः परिपीडयन्ति च मुधा दीनाञ्जनान् नित्यशः॥३॥

भरतावनिजन्मभृतां प्रथिता, शरणागतवत्सलताऽस्ति भुवि।
कथमीदृशि सङ्कटजे समये, पुनरत्र विलुप्यतु सा प्रथितिः॥४॥

इति मनसि निधाय प्रत्यहं पीडितानां,
शरणमुपगतानां चिन्तया क्लान्तिमाप्ता।
निखिलमपि जगत् तत्-कष्टनाशाय बोद्धुं,
विविध-विषय-यात्रा इन्दिरा देव्यकार्षीत्॥५॥

ये वै देशाः कुटिल-मतयः स्वार्थपूर्णा अभूवन्,
मौनं धृत्वा त इह निपुणा नो सहायं ह्यकार्षुः।
सन्धिं तस्मादवन-विषयं रूसदेशेन कृत्वा,
तस्मिन् काले स्थितिमतिदृढां सा व्यधाद् भारतस्य॥६॥

किञ्च—

शरणार्थिषु मानवतावशतो विवशा सकृपं सततं व्यदधात्।
वसनाशनभेषजजाः सुविधास्तत एव तदाक्रमणं कृतवत्॥७॥

अथवा—

पूर्वबङ्ग-प्रदेशे या पाकिस्ताने च या स्थितिः।
ताभ्यां ध्यानं पराकर्तुमिदमाक्रमणं कृतम्॥८॥

वस्तुतस्तु —

पाकिस्तानस्य भारतं प्रतीदृशी दुर्नीतिः कियतश्चित् कालादवर्ततैव। तेन हि पूर्वं १९४७ तथा १९६५ ई० वर्षयोर्द्विवारं महती आक्रमणे अपि कृते अभूताम्। मध्ये च तेन कच्छक्षेत्रस्य मरुभूमावपि गुप्तः प्रवेशो विहित आसीत्। १९७१ ई० वत्सरे पुनस्तच्छान्तं न भूत्वा 'भारतं पूर्वबङ्गप्रदेशस्य साहाय्यं विदधाती'ति मिथ्याव्याजं मनसि निधाय ३ दिसम्बर १९७१ ई० दिने सायं सार्धपञ्चहोराऽवधिके समये भारतस्य पश्चिमसीमोल्लङ्घनं विधाय —"श्रीनगर-पठानकोट-अमृतसर-उत्तरलाई-आगरा-चोहटन-जोधपुर-अवन्तीपुर-अम्बाला-" नगरवर्तिषु विमानावतरणस्थलेषु वायविकाक्रमणेन विस्फोट-गोलकानवर्षयत्। आसीदिदं तस्यैकवारं पुनर्भारताय रणायाह्वानम्।

तद्दिने श्रीमतीन्दिरागान्धी राजधान्यां नासीत्। आसीत् सा कलकत्ता-नगर्याम्। तत्रैवास्याक्रमणस्य सूचना तत्रभवत्यै प्रापिता सा च स्वीयान्

सर्वान् कार्यक्रमान् निरस्य दिल्लीमागच्छत् । ४ दिसम्बर, १९७१ ई० दिने च प्रातरेव राष्ट्राय सन्देशं प्रासारयत् । भारतीयान् सैनिकांश्चाक्रमण-प्रतिकारायादिशत् ।

ततः परं बांगलादेशस्य स्वातन्त्र्यसैनिकैर्मुक्तिवाहिनीसङ्घटकैर्भारतीयसीमग्रामे सम्भूय घोषिता स्वतन्त्रबाङ्गलादेशाय ६ दिसम्बर, १९७१ ई० दिने विधिवन्मान्यताऽपि प्रदत्ता। श्रीमतीन्दिरागान्धी यद्यप्यशान्तेः पक्षे नावर्तत, परं बलादापतितं युद्धं तु कर्त्तव्यमेवाभूत् । १० दिसम्बर-दिने दिल्ली-विश्वविद्यालये समायोजितायामेकस्यां सभायां भाषमाणा साऽवोचत्— "अद्य यदा युद्धमायातमेव तदा तु स्पष्टमेवास्ति यदस्माकं प्रथमं कार्यमस्ति युद्धे विजयप्राप्तिः। विजयोऽस्माकमवश्यं भविष्यति, कारणञ्चास्यास्ति यदस्माकं सेना सुदृढा वर्तते, शूरवीरा च विद्यते किञ्च सैका नवीन-प्रकारिका सेनाऽस्ति । तथा या जनता सेनायां नास्ति साऽपि देशस्यास्यातिमहती सेनाऽस्तीति।"

भारते पाकिस्तानाक्रमणस्योत्तरं भारतीयसैनिका यददुस्तदसाधारणमवर्तत। स्थलसेना-वायुसेना-नौसेना युगपत् सम्मिल्य परस्परं सहयोगमाचरन्त्यो यया पद्धत्या चतुर्दश दिनानि यावद् युद्धमकुर्वन्, तस्मिन् भारतेन पाकिस्तानस्य युद्धसाधनेषु २४४ टैंकयानानि, ९४ वायुयानानि, ४ युद्धपोताः, २ सबमैरीन-नावो १६ अस्त्रवर्षिका नावश्च सर्वथा विनाशिताः। पाकिस्तानेनास्मिन् युद्धे भारतस्य ७४ वर्गमीलमितायां भूमावधिकारः कृतो भारतेन च पाकिस्तानस्य प्रायः ३५०० वर्गमीलमिता भूमिः स्वाधीनीकृता। तस्मिन् युद्धे पूर्वपाकिस्तानस्य विजयरूपेणापि भारतेन प्रायश्चत्वारिंशत्सहस्रोत्तरैकलक्षवर्गमीलमितायां भूमावधिकारः कृत आसीत् । इदं सर्वं भारतस्य सेनायाः पूर्वपाकिस्ताने ढाकानगरं यावत् प्रवेशात् पाकिस्तानसैनिकानामात्म-समर्पणस्य बाध्यत्वाच्च सम्भवमभूत् । १६ दिसम्बर १९७२ ई० दिने जनरलनियाजीः सायं सार्धचतुर्वादिनसमये प्राय एकलक्षमितैः सैनिकैस्सहात्म-समर्पणमकार्षीत् । तेन महता विजयेन भारते भारतस्य मित्रदेशेषु पूर्वपाकिस्तान-वासिषु च महानानन्दोऽभवद् भारताय कृतज्ञस्य घनिष्ठस्य मित्रस्य सहयोगिनः समर्थकस्य चैकस्य नवीनस्य **बाङ्गलादेशस्य** समुदयोऽभूत् पाकिस्तानञ्चार्धं विभक्तम्।

तेन भारतस्य विजयेन श्रीमत्या इन्दिरायास्तथा भारतस्य, द्वयोरपि प्रतिष्ठायां चन्द्रचतुष्कं जटितम् ।

शौर्यञ्च धैर्यञ्च समे विधाय, कौशल्यपूर्णेन नयेन नित्यम्।
यो दृप्तशत्रूननुशास्ति सोऽत्र, श्रेयः श्रियां विन्दति वै जयस्य ॥९॥

पूर्वपाकिस्तानं 'बांगला-देशं' निर्मातुं शेखमुजीबस्य नेतृत्वाय तथा तस्य देशस्य जनताया बलिदानाय यावच्छ्रेयोऽस्ति, भारतस्य जनतायै, भारतस्य सैनिकेभ्यस्तथा भारतस्य प्रधानमन्त्रि-श्रीमतीन्दिरागान्धी-महाभागाभ्यस्तस्मात् कथमपि न्यूनं श्रेयः कस्यामपि स्थितौ दातुं न शक्यते। इदमपि परेषां जनानां कथनं सत्यं नासीद् यद् 'बांगला-देशे' यत् किमपि घटितं तस्य पृष्ठभागे भारतस्य हस्तमासीत्। एवं कथनं बांगलादेशवासिनां भावनानां बलिदानानाञ्चापमानमस्तीति लोकसभायां श्रीमती गान्धी स्पष्टमघोषयत्। भारतस्य समर्थने तात्पर्यमासीत् १-शरणार्थिनां भारान्मुक्तिः, २-मानवीयदृष्ट्या नैतिकं समर्थनं तथा ३-सामाजिकसङ्घर्षस्य समाप्तिः। विजयप्राप्तेरनन्तरं सत्वरमेव सेनाध्यक्षैर्मन्त्रिमण्डलेन विपक्षनेतृभिश्च परामृश्य १७ दिसम्बर-दिने सार्धाष्टवादन-वेलायामाकाशवाण्या श्रीमतीन्दिरागान्धी पश्चिम-युद्ध-स्थल्यामेकपक्षीयस्य युद्धविरामस्य घोषणामप्यकरोत्।

प्रधानमन्त्रिमहाभागा विजयस्यास्य सर्वं श्रेयो भारतीयेभ्य एव दत्वा तेषां सर्वतोभावेन कृतज्ञतां व्याञ्जयत्। भारतीय-जनमानसस्य शक्तेरुत्साहस्य च श्लाघां प्रकटयन्त्या तया निगदितमासीत्— "यदिमं सर्वं सङ्कट-सागरं तीर्त्वा वयमुद्धृताः स्मस्तत्र सर्वेषां भारतीयानां भवतां शक्तेराभिमुख्यस्य विश्वासस्य साहसस्याशायाश्च विशिष्टः सहयोग आसीत्। तस्मादेव वयं काठिन्यादुत्तीर्णाः स्मः। भारतीयाः सैनिका भारतीया वैज्ञानिका अभियान्त्रिका बुद्धिजीविनः कर्मकरा धनिनो निर्धनाः सर्वेऽपि समानेन भावेन पारस्परिकं विचार-वैमत्यं विस्मृत्यैकस्मिन् राष्ट्रिये सूत्रे निबद्ध्य यामेकतां प्राकटयन् सा सर्वथाऽभिनन्द-नीयाऽस्ति। अहमभिलषामि यत् सर्वैर्नीतिरेषा समाश्रयणीया। यतः —

लघुरपि समवायं प्राप्य सामर्थ्ययुक्तो,
भुवि वशयितुमीष्टे दृप्तशक्तीन् प्रकृष्टान्।
मदमुदित-गजानां बन्धने लब्धसिद्धि-
स्तृण-गुणन-समिद्धा रज्जुरत्र प्रमाणम्॥१०॥

बहुमुख-कृतिमन्तो भिन्न-भिन्नं वदन्तः,
पथि-पथि च विकीर्णा आत्म-दर्पण-जीर्णाः।
कुमति-तति-विशीर्णा नैव शान्ति लभन्ते,
तत उरु-जन-शस्तामेकतां संश्रयन्तु॥११॥

श्रीमतीन्दिरा गान्धी विजयोत्तरमपि विविधाभिश्चिन्ताभिर्व्याप्ता सती क्रमशः शरणार्थिनां पाकिस्तानस्य युद्धबन्दिनां च व्यवस्थायास्तथा पाकिस्तान-स्य कारागारे स्थापितानां बांगला-देशस्य स्वतन्त्रता-सङ्गरस्य सूत्रधाराणां

श्रीमुजीबुर्रहमानमहानुभावानां मुक्तेश्च प्रयासेषु पूर्णतया तत्परा भूत्वा सर्वाः समस्याः समादधात्। अस्यैव वर्षस्याभ्यन्तरिके काले सा चतुर्णां नवीन-राज्यानां—**१- हिमाचलप्रदेश-२- मणिपुर-३- मेघालय-४- त्रिपुरा**प्रदेशानां निर्माणमकरोत्। **१- अरुणाचल- २- मिजोरम**'—नामकौ द्वौ स्वायत्तप्रदेशावपि सा निरमात्। त्रीणि संवैधानिकानि संशोधन-विधेयकान्यपारयद् येषु - '२४ तम-संशोधनेन भारतीयजनतायै संविधान-संशोधनस्याधिकारः प्राप्तः। २५ तम-संशोधनेन राष्ट्रियाय हिताय सम्पदधिग्रहणे कृते सति विनिमयदानस्य बाध्यता समापिता। किञ्च २६ तम-संशोधनेन भूतपूर्वनृपतीनां विशेषाधिकारराज्यदेय-सौविध्यादीनां समापनं कारितम्। तेनैव—

अन्ताराष्ट्रिय-राजनीति-फलके चित्रं समुद्योतितं,
स्वीयान्तः क्रिययाऽङ्कितं सफलता-पूर्णं सुचित्रं च यत्।
आसीत् तत् परिपक्वदृष्टिलसितं देवीन्दिरायास्तथा,
तस्यास्तद्गत-कूटनीति-पटुताऽऽटोप—स्फुटत्वं श्रिता ॥१२॥

पाकिस्ताने याह्याखानः स्वीयं पराजयं स्वीकृत्य स्वपदात् त्यागपत्रं दत्त्वा मुक्तस्ततः परं राष्ट्रपतिपदे **'श्रीजुल्फिकार अली भुट्टो'**-महोदय आसीनः। श्रीमत्या गान्धी-महाभागाया निरन्तरप्रयासेन ७ जनवरी १९७२ ई० दिने श्रीमुजीबः पाकिस्तानस्य बन्धनाद्विमुक्तः। ११ जनवरी-दिने भारतीया जनता स्वदेशस्य राजधान्यां देहल्यां तस्य महाभागस्य हार्दिकं स्वागतमकार्षीत्। पाकिस्तानस्य युद्धे विजयप्राप्त्या श्रीमत्या इन्दिराया यशोनादः सर्वत्रागुञ्जत्। विजयप्रभावाद् भारतस्य सम्मानोतीवोन्नतोऽभूत्। निखिलमपि जगदजानाद् यदेशियाखण्डस्य राष्ट्रेषु भारतेन महत्त्वपूर्णं स्थानं प्राप्तमस्तीति। श्रीमतीन्दिरा-महाभागाया देशस्य सेवाः प्रति सम्मानं प्रकटयितुं राष्ट्रस्य सर्वोन्नतेनालङ्करणेन 'भारत-रत्न'मित्युपाधिना **महामहिम-राष्ट्रपति-श्री वी० वी० गिरि-महाभागा**स्तां सममानयन्। सा हि महाभागा स्वीयानां राजनीतिक-कौशल-सङ्घटन-प्रावीण्य-दूरदर्शिता-जनपरीक्षण-क्षमता-सूक्ष्मदृष्टि - सुदृढात्मविश्वास-प्रोर्जस्विता-ऽदम्योत्साह-गहनमानवप्रेमादिगुणैर्भारतस्य सर्वमान्या जननेत्र्येव नाभूदपि तु सर्वत्रान्ताराष्ट्रियस्तरस्य राजनेत्रीरूपेणापि महतीं प्रतिष्ठां प्राप्नोत्। वस्तुतः —

शान्तिं सहस्थितिमुदार-विचार-वृत्तिं,
निःस्वार्थ-भावममलां करुणा-प्रवृत्तिम्।
यः सेवते स पदमुन्नतमाप्य विराजतेऽत्र,
सेवा-फलानि मधुराणि भवन्ति लोके ॥१३॥

दृष्टिं विचार-सरणिं स्वमतिं च सूक्ष्मां,
स्थाने प्रयुज्य तनुते सकलेषु मैत्रीम्।

शुश्रूषयात्मसुखमाप्नुवतो जनस्य,
सम्मान एव भवति प्रथितः प्रकामम् ॥१४॥

श्रीमतीन्दिरागान्धीमहाभागा विनम्रतया राष्ट्रवासिभिर्विहितां सभाजनां स्वीकृत्य भूयोऽपि कर्तव्यपथे वर्धमाना नेहरूवंशस्य परम्परागतान् प्रख्याता-नश्रान्त-परिश्रमशीलता-गुणानविस्मरन्ती प्रतिवेशिदेशैः सह मधुरं सम्बन्धं स्थापयितुं १७ मार्च-दिने शेखमुजीबुर्रहमानमहानुभावस्य जन्मदिनोत्सवमभि-लक्ष्य ढाकानगर्याम्गच्छत् तत्र बांगला-देशजनताऽपि सजोषं कृतज्ञताभाव-समुल्लसितमतिप्रशस्तं तस्या हार्दिकं स्वागतं व्याहार्षीत् । २० मार्चदिने च भारत-बांगला-देशयोः प्रधानमन्त्रिभ्यां भारतीयद्वीपे शान्ति-सुरक्षा-स्वतन्त्रता-क्षेत्रीय-सम्प्रभुतानामक्षुण्णत्वस्योद्देश्येन ढाकानगर्यामेकस्मिन् संयुक्त-घोषणापत्रे हस्ताक्षरे विहिते। मार्च-मास एव भारते विजयोल्लासस्य वातावरणे मद्रासोत्तरप्रदेशादीन् काँश्चित् प्रदेशान् विहायान्यत्र सर्वत्र विधानसभानां महानिर्वाचनान्यपि श्रीमती-न्दिरा गान्धी-महाभागाऽकारयत्। तस्मिन् निर्वाचने तयोद्घोषकद्वयं प्रचारित-मासीत्—'१- आत्मनिर्भरता २- दैन्यापाकरणं च' । निर्वाचन-विजयाय सा प्रत्येकं प्रत्याशिनं योग्यताया आधारेण स्वयमवचित्य यत्र तत्र च दक्षिणपथानु-यायिभिः कम्यूनिष्टैः सह संयोजनमपि व्यदधात् । तस्मिन् निर्वाचने महान् विजयस्तद्-दलेन प्राप्तः । सर्वेषु २५२९ स्थानेषु सत्ताकाङ्ग्रेसदलेन १९२६ स्थानानि जितानि । नैके विपक्षाः पराजिताः ।

'सम्पत् सम्पदमनुधावती'ति लौकिकी किंवदन्ती तदानीं सत्याऽभूत्। मध्यप्रदेशे दस्यूनामात्मसमर्पणं, श्रमिकैक्याय गान्धिवादिदलेषु पारस्परिकैक्य-सम्पादनं, संयुक्तराष्ट्रसङ्घस्य 'ह्यूमैन इन्वायरमैन्ट-कान्फ्रेन्स'स्य प्लिवरीसत्रे सम्बोधनं, शिमलासन्धिस्तथा तदनुसारं पाकिस्तानस्य विजितक्षेत्रस्य प्रत्या-वर्तनं च क्रमशः सम्पादयन्ती महामात्या श्रीमती गान्धी यादृशं प्रशासनकौशलं प्रादर्शयत् तत्तस्या देशं प्रत्यगाधानुरागस्य फलमासीत् । १४-१५ अगस्तस्य मध्यरात्रौ संसदोऽधिवेशने भाषमाणा सा स्पष्टमवादीत् —

"आगच्छत, वयं न केवलं भारतस्य तथा तस्या महत्या जनतायाः सेवा-र्थमेकवारं पुनरात्मानं समर्पयेम, परं ततोऽप्यग्रे विश्व-शान्तये मानवकल्याणाय समर्पयेम । येन भविष्यत्यागन्तुका वंश्या विशालस्य विश्व-परिवारस्याङ्गरूपेण सम्मानस्य तृप्तेश्च जीवनं जीवितुं शक्नुयुः ।"

श्रीमतीन्दिरागान्धी महाभागा वस्तुतो देशस्य नेत्र्यपेक्षया देशसेविकात्वेना-त्मानं मन्यमानैव देशस्य वास्तविकीं स्थितिं प्रति पूर्णतया सावधानाऽवर्तत। सा विपक्षनेतॄणां कूटं सूक्ष्मया दृष्ट्या वीक्षमाणा कदाचित् खेदमनुभवन्त्यपि सेवाविधौ शैथिल्यं नाभजत्। सा जानाति स्म यत्—

श्रेयो मार्गे विघ्नबाहुल्यमेति, श्रेयःप्राप्तिर्वस्तुतः कष्टसाध्या।
ये वै प्राप्तान्यत्र कष्टान्यपास्य, वर्धन्तेऽग्रे ते जयं प्राप्नुवन्ति ॥१५॥

ततः साऽगस्तमासस्याष्टाविंशतितमे दिनाङ्के भारत-बांगला-पाकिस्तानानां मध्ये पारस्परिकं सन्धिमकार्षीद् यस्मिन् निर्णीतं यत् सर्वाः समस्यास्तथा युद्ध-बन्दिनां परावर्तनं मानवीय-धरातलेन समाधेयमिति। ६ सितम्बरदिने श्रीमती-न्दिरागान्धी निर्व्यूह-राष्ट्राणां चतुर्थेऽधिवेशने सम्मिलितुमल्जीरियादेशं गता। १४ अक्टूबर-दिने च सा सेवाग्रामेऽखिल-भारतीय-राष्ट्रिय-शिक्षासम्मेलनमुद्-घाटयत्। तस्मिन्नेवावसरे महात्मनां श्रीगान्धिनां कुटीरेऽप्यगच्छत्। २७ तो २९ अक्टूबर-दिनेषु सा महाभागा 'भूटान'-देशस्य यात्रामकरोत्। २ नवम्बर-दिने मोहमय्यां 'नेहरू-केन्द्रस्य' शिलान्यासं विधाय ३ नवम्बरदिने तृतीयस्यैशियास्था-न्ताराष्ट्रिय-व्यापारमेलकस्योद्घाटनं व्यदधात्।

□ प्रतीपगानां विरलैव नीतिः

मार्गे शुभे शान्तधिया प्रयान्तं, संवीक्ष्य सद्यः कुहना द्विषन्तः।
मिथ्या-प्रवादैः परिदूषयन्ति, प्रतीपगानां विरलैव नीतिः ॥१६॥

श्रीमतीन्दिरागान्धी-महाभागायाः समुत्थान-पतनयोः समीक्षणं विदधत एकस्य पत्रकारस्य विचारेषु स्पष्टमिदं प्रतिपादितमासीद् यद् 'भारतस्य राज-नीतिकीं स्थिरतां विश्वे वर्धमानां प्रतिष्ठाञ्चालोक्य तदानीमनेके देशा विद्वेष-भावनाग्रस्ता अभूवंस्तथा शान्तिपूर्णाणविकविस्फोटानन्तरं तु ब्रिटेनामरीका-जर्मन-देशास्तु विशिष्य भारताद् रुष्टा आसन् किञ्च तेषां गुप्तचरसंस्था भारतेऽतीव सक्रियतया कार्यं कुर्वाणा अवर्तन्त। यद्यपीमाः संस्थाः प्रारम्भात् स्वतन्त्रताकालादेव गतिशीला आसन् परं तेषु दिवसेषु स्व-देशस्य सामाजिकार्थिकस्वरूपं समीक्ष्य तच्छ्लथं विधाय राजनीतिकीमस्थिरतामानेतुं सक्रिया अभवन्। ता वाञ्छन्ति स्म यद् भारत-श्रीलङ्का-बाङ्गलादेश-पाकिस्तानेषु या तेषां प्रतिकूला स्थितिः शासने-ष्वासीत् सा परिवर्त्यैवेति। तस्या वाञ्छायाः पूर्तयो, १-जनताया मानसेष्वात्म-हीनता-भावनोदयाय भ्रष्टाचारवर्धनेन, २- सर्वकार-विरुद्धं जनमतस्य सुसज्ज-तार्थं गुप्तधनसंग्रह-जनान्दोलन-प्रवृत्तिवर्धन-मिथ्याप्रचार-सत्ताप्रवर्तितव्यवस्था-भङ्गार्थिकव्यवस्थाहानिश्चेत्यादिना कार्यसाधनेन, ३- प्रत्यक्ष-विरोधाय जनताया उत्तेजनाय प्रशासनस्य करदानावरोधैनौद्योगिक-प्रतिष्ठानेषु कर्मावरोधेन हिंसा-प्रवर्तन-शिक्षण-संस्थास्वशान्त्युद्भावनपूर्वकं युवसु विद्रोह-जागरणेन तथा ४- पूर्व-विहिताशान्तेर्माध्यमेन प्रत्यक्षक्रान्तेराह्वानेन शासनस्य सत्तोच्चाटन-प्रयासैर्विधी-यन्ते स्म। तथेयं स्थितिः केनापि कूटनीतिकेन षड्यन्त्रेणैव सम्पाद्यते स्म।

एककोटिमितानां शरणार्थिनां भारेण प्राय एकलक्षमितपाकिस्तानस्य बन्दिनां संरक्षणव्ययेन तथा केवलं युद्ध एव द्विशतकोटिमुद्राणामतिरिक्तेन व्ययेन

संयुज्य भारतीयजनता सर्वकारस्यार्थिकस्थितिश्च प्रभाविते एव। तस्मिन्नेव समये प्रधानमन्त्रिपदासीनायाः श्रीमत्या इन्दिरागान्धी महाभागाया अपि प्रगतिमभिलक्ष्यासहना विपक्षा अर्धसत्याभिःस्वीयाभिर्युक्ति-प्रतियुक्तिभिः श्रीमतीमिन्दिरां तद्दलञ्च दूषयितुं मिथ्याऽऽरोपैः कलङ्कयितुञ्च प्रावर्तिषत। 'निर्वाचनेषु शासकीयसाधनानां दुरुपयोगस्यापारस्य धनराशेर्व्ययस्य चारोपौ तत्र प्रमुखावास्ताम्।' सन् १९७१ ई० वर्षे रायबरेली-क्षेत्रतो लोकसभायै श्रीमतीन्दिरागान्धी यदा निरवाच्यत तदा तदीयेन प्रतिद्वन्द्विना श्रीराजनारायणेन तद्विरुद्धमुच्चन्यायालये प्रस्तुता याचनाऽपि सत्यस्य न्यायस्य च प्राप्त्यपेक्षया तस्यामारोपिता विभिन्ना आरोपा जनतायां समाचारपत्रेषु च चर्चा-विषया भवेयुरिति राजनीतिकोद्देश्येनैव प्रेरिता अभूत्।

पूर्वोक्तानामारोपाणां माध्यमेनापि यदा विपक्षाः श्रीमतीन्दिरामहाभागां सत्तायाः प्रच्यावयितुमक्षमा अभूवँस्तदाऽऽर्थिककाठिन्यस्य राजनीतिकं लाभमवाप्तुं तैरौद्योगिकसंस्थानानां कर्मचारिणो माध्यमीकृताः। तेभ्यः सम्प्राप्तस्य शान्तिपूर्णस्यान्दोलनस्य कर्म-विरामस्य च दुरुपयोगं साधयद्भिर्विपक्षस्थैस्ते जन-समाचार-यातायातसाधनादीनां खण्डनाय प्रेरिताः। आसीत् तल्लोकतन्त्राय कलङ्कपूर्णं कृत्यम्! नैतावदेव; विरोधिदलानीन्दिरादलस्यासन्तुष्टान् सदस्यानपि विभक्तुमारभन्त। निष्ठावतामारक्षि-कर्मचारिणां हिंसात्मकान्दोलनाय धूम्रयान-कर्मचारिणां याचनाभ्योऽपि च तेषां समर्थनमासीत्। तदा छात्रा अप्युत्प्रेरितास्तेषां क्रोधस्यापि च पूर्णो लाभस्तैरवाप्तः। यतो हि—

परस्य दोषानपि सर्षपोपमान्, विविच्य मालूरफलोपमान् सदा।
प्रकाशयन्ते, न निजाँश्च दुर्गुणान्, गृणन्ति दृप्ता महतोऽपि दुर्जनाः॥१७॥

तदानीं स्वपराजयेन खिन्ना विपक्षवादिनः स्वीयानां याच्ञानां पूर्तये हिंसायामप्यवतरिताः, सर्वकारसम्पदो विनाशं त आत्मनां न मन्वाना एव तत्कृते उद्युक्ता अभवन्। तादृशं विध्वंसं विलोक्यैव राष्ट्रपति-श्रीगिरिमहानुभावाः स्वकीय एकस्मिन् राष्ट्रिये सन्देशे हिंसायाः सार्वजनिक-सम्पदां विनाशस्य च निन्दनमकार्षुः। विविधैर्दुरुपायै राजनीतिकं लाभमवाप्तुकामानां जालादुन्मुच्य स्वदेशस्यौद्योगिकार्थिक-ह्रासस्य परिहरणाय तादृश-संस्थानानामधिपक्षतः कर्मचारिणश्च सामूहिकरूपेणापि तैर्निवेदिताः। मई १९७३ ई० मास उत्तरप्रदेशस्यारक्षि-विद्रोहस्तस्मिंश्च-लखनऊविश्वविद्यालयच्छात्राणामाहुतिदानमन्ते च तदानीन्तनमुख्यमन्त्रि-'श्रीकमलापतित्रिपाठि'महोदयैः स्वीयमन्त्रिमण्डलेन सह त्यागपत्रदानं चेति सर्वा घटना विस्मयावहा एवावर्तन्त। तादृश एव विषमे समये विमान-सेवाकर्तॄणां कर्मचारिणोऽपि तैः कर्मविरोधायोत्प्रेरिताः।

इत्थं सत्यपि महति साफल्ये श्रीमतीन्दिरागान्धीमहाभागा शान्त्या शासनं कर्तुं नाशक्नोत्। यद्यपि देशोऽस्माकमन्नसङ्कटादुन्मुच्यात्मनिर्भरतां प्राप्नोत् तथापि बाङ्गलादेशस्य शरणार्थिनां कारणात् पाकिस्तानेन सह युद्धस्य कारणाच्चार्थिका दुष्परिणामा प्रकटितुं प्राभवन्। देशे त्रयोदश-प्रतिशतमिताया महर्घतायास्तथा व्यापारिवर्गेषु भ्रष्टाचार-बाहुल्याज्जनता त्रस्यन्तीवावालोक्यत। नैतावदेवापि तु स्वयं तदीये प्रशासने नेतृवर्गे चापि भ्रष्टाचाराभिवृद्धेश्चिह्नानि दृष्टिगोचरतामायातुं प्रवर्तितानि। देशस्य प्रतिप्रान्तं विघटन-वातावरणं प्रसृतमिवालोक्य श्रीमतीन्दिरागान्धी सर्वानपि सुघटितान् वस्तुं राष्ट्रियैकतां संवर्धयितुञ्च बहुशो न्यवेदयत्।

सन् १९७४ ई० वर्षस्यारम्भे गुजरात-प्रदेशे छात्राणामान्दोलनमारब्धम्, तस्यान्दोलनस्य साफल्येन प्रतिपक्षिणो महान्तमात्मविश्वासं प्राप्नुवन्। अन्यतो बिहारशासनमपदस्थं विधातुं कम्यूनिष्टा आन्दोलनमप्यकार्षुस्तस्यां स्थितौ च प्राक्तनः सम्मानितो नेता **श्रीजयप्रकाशनारायणमहाभागो**ऽपि तस्मिन् सम्मिलितः। आन्दोलनस्य सञ्चालन-सूत्रं स्वहस्तेऽगृह्णात्। सम्पूर्णेऽपि वर्षे श्रीजयप्रकाश-महाभागस्य नीत्या न्यूना अन्यूना बिहार-शासन-पराकरण-प्रयाससंवलित-प्रक्रियाः प्राचलन्नेव। प्रान्ते प्रतिपक्षमैक्ये सङ्कलयितुं स साफल्यमवाप्नोदेव। तेष्वेव दिवसेषु **श्रीमतः सञ्जयगान्धिनः** कारणादपि जनाः श्रीमतीमिन्दिरागान्धी-महाभागामालोचयितुञ्चेङ्गयितुमचेष्टन्त। साऽऽलोचना तस्य महाभागस्य **'मारुति-तैल-यानयोजना'**याः कारणादवर्तत। हरियाणाप्रदेशस्य भूमेरधिग्रहणस्य तथा योजना-प्रवर्तनाय धन-सङ्ग्रहणस्य विषयौ तत्र प्रमुखावभूताम्। यद्यपि तद्विषये स्वयं जनताऽजानाद् यदत्र विषये श्रीमती गान्धीमहाभागा स्पष्टमेवापरामृष्टा वर्तते किञ्च के चन भ्रष्टा मन्त्रिणः पदाधिकारिणश्चैवोत्तरदायित्वभाजः सन्तीति।

ईदृशीषु चरमोत्कर्षवतीषु घटनास्वपि प्रधानमन्त्रि-महाभागा २६ अप्रैल १९७५ ई० दिवसे **'सिक्किम'**प्रदेशं भारतसङ्घस्य द्वाविंशतितमं राज्यमघोषयत्। ततः परं २८ अप्रैल १९७५ ई० दिने च **'राष्ट्रमण्डल-प्रधानमन्त्रि-सम्मेलने'** 'समवेतुं **'जमैका'** नगरमयासीत्।

तस्मिन्नेव हायने '१२-जून' दिने, इलाहाबादस्योच्चन्यायालयेन स्वकीय एकस्मिन् निर्णये रायबरेलीतः श्रीमत्या इन्दिरागान्धी-महाभागाया निर्वाचनं कासाञ्चिदनियमिततानां कारणादवैधं घोषितम्। श्रीमतीन्दिरागान्धी-महाभागा पुनरप्युच्चतमन्यायालय आवेदनमकार्षीत्। प्रतिपक्षः प्रतिदिनमान्दोलनं प्रारभत यत् प्रधानमन्त्रिणा त्यागपत्रं दातव्यमिति। २४ जून १९७५ ई० दिने सर्वोच्च-न्यायालयस्य सत्तावकाशकालिकेन पीठेन श्रीमत्या गान्धीमहाभागाया आवेदनेन 'स्थगनादेशं' प्रसारयता घोषितं यद्—"अग्रिमादेशं यावत्, सा संसदः कार्यवाहिनीषु

भागं गृह्णती प्रधानमन्त्रिणः पदे स्थातुं शक्नोति। केवलं तस्या मतदानेऽधिकारो न भविष्यतीति।"

यद्यप्ययं निर्णय उच्चन्यायालयस्यासीत् तथा विंशति-दिनानामवधिरपि तस्या उच्चतमन्यायालये पुनरपि विचारार्थमावेदन-पत्रोपस्थापनाय दत्त आसीत् किन्तु विपक्षदलनेतारस्तावन्तं कालं निश्चेष्टमवस्थातुमनुत्सुका भूत्वा नैकान् विरोधप्रकारानाधृत्य कथमपि श्रीमतीमिन्दिरागान्धीमहाभागां पदाच्च्यावयितुमेवावाञ्छन्, फलतो बहुशश्चलयात्राः समायोजिताः, सभासु विरुद्धानि भाषितानि, सामूहिकावरोधः प्रवर्तितः, संसदः परिवारणस्यापि योजना निर्धारिता। एकस्य कूटनीतिकयुद्धस्यारम्भ एव तदानीं विरोधिदलेनारब्धम्। २५ जून १९७५ दिवस ऐतिहासिकं प्रदर्शनमायोजितं यस्य नेतृत्वं श्रीजयप्रकाशनारायणो व्यधात्। तत्रैवेदमपि घोषितं यद् 'इन्दिरा त्यागपत्रदानाय विवशयितुं २९ जूनतः सकलेऽपि देश आन्दोलनं करिष्यत' इति। इयदेव नैव, तेनेदमपि कथितं यदारक्षिणः सैनिकाश्च शासनस्य निर्वैधानिकानामादेशानां पालनमपि निषेधयेयुः। तदा स्थितेर्गाम्भीर्यं विचिन्त्य श्रीमती इन्दिरागान्धी-महाभागा तात्कालिकमन्तिममस्त्रं प्रयोक्तुं विवशाऽभूत्।

वस्तुतस्तदानीं श्रीमतीन्दिरागान्धी स्वपदात् त्यागपत्रं प्रस्तोतुं तथोच्चन्यायालयज्जनताया न्यायालयाच्च निर्णयं कारयितुमैच्छत् परं कनीयसः पुत्रस्य श्रीसञ्जयगान्धिनस्तथा केषाञ्चिदन्येषां सम्मतिप्रदानाग्रहेण सम्मत्या च २५ जून १९७५ ई० दिने देश **'आन्तरिकस्यापातकाल प्रवर्तनस्य'** घोषणामकारयत्। २६ जून-दिने घोषणोत्तरं राष्ट्रस्य नाम्ना वक्तव्यं प्रसारयन्ती साऽकथयत्—

"लोकतन्त्रस्य नाम्नि लोकतन्त्रस्य कार्य-व्यवस्थाभ्यो नकारात्मकं स्वरूपं दीयते। केचन जनाः सेनामपि समुत्तेजयितुं प्रवृत्ताः सन्ति। अन्येऽपि भूयांस ईदृशा एवानुचिता विचारा विपक्षैरनुस्त्रियन्ते। अत एव लोकतन्त्रस्य रक्षणाय साम्प्रतिकोऽयमुपाय एव समुचित आसीदित्यस्य प्रवर्तने महान् हेतुरस्तीति।"

पुनश्च साऽकथयत्—

"हिंसाया घृणायाश्चैकमीदृशं वातावरणं सुसज्जितं कृतमस्ति, यस्य फलस्वरूपमेकस्य केन्द्रीय-मन्त्रिणो हत्याऽभूत् तथा मुख्यन्यायाधीशस्य प्राणापहरणप्रयासा अक्रियन्त। विरोधिदलैः केन्द्रशासनं पूर्णरूपेण पङ्गु विधातुमावेष्टनान्दोलनत्रोटनस्फोटनानां तथौद्यौगिककर्मकराणामारक्षिणां सुरक्षा-सैनिकानां चोत्तेजनस्यापि कार्यक्रमा निर्धारिता आसन्।··· एतादृशः कार्यक्रमः सार्वजनिक-व्यवस्थापनायै गभीरः सङ्कटोऽभविष्यत् तथाऽर्थव्यवस्थामियतीं क्षतिग्रस्तामकरिष्यत् यद् व्यवस्थापनमतीव कठिनमभविष्यत्। एतस्यास्य सर्वस्यावरोधनमावश्यकमासीत्।

विरोधिभी रचित: कार्यक्रमो लोकतन्त्रस्यानुरूपो नास्ति। स प्रत्येकं निकषे राष्ट्र-विरोध्येवाभविष्यदतस्स नानुमतः······।" इत्यादि।

□ आपातकालस्य विचित्र-घोषणा

देशे जनाः केचन वैभवान्विता, अन्ये च केचिद् धनहीन-जीवनाः।
जोषन्ति चैतज्जनतन्त्रदूषणं, सद्योऽपचार्यं निजदेश-गुप्तये ॥१८॥
भ्रष्टाश्रया द्यूतरता विकर्मिणश्चौर्यार्जिना भूरि-विभेद-वृत्तयः।
आतङ्क-दुर्वृत्त-युता विगर्हिताः, कुर्वन्ति देशस्य मुधैव दुःस्थितिम् ॥१९॥
आलोक्य तत्तत्कृतमुद्धतायितं, देशस्य रक्षार्थमिहास्त्रमुत्तमम्।
मत्वा द्विषां दुर्दमनाय वर्तिता, आपातकालस्य विचित्र-घोषणा ॥२०॥

श्रीमतीन्दिरागान्धी प्रारम्भादेवात्मानं देशस्यैकां सेविकां मत्वैव राष्ट्रियेषु सेवाकर्मसु प्राणपणेन संलग्नाऽभवत्। यदा राष्ट्रवासिनस्तदीययोर्हस्तयोः स्वदेशस्य सर्वविधानां प्रगतीनां परिवर्द्धनाय नवभारतस्य निर्माणाय विकासबाधकानां तत्त्वानां पराकरणाय च गुरुतरं कार्यभारं प्रधान-मन्त्रि-पदरूपेणार्पितवन्तस्तदा सा स्वकीयेन दृढसङ्कल्पेन सहैव प्रत्येकं भारतीयं स्वं स्वमुत्तरदायित्वं परिज्ञाय तदनुरूपाणि कार्याणि कर्तुं प्रैरयत्। स्वदेशे वर्तमानानां समस्यानां समाधानाय जनताः प्रोद्बोधयन्त्या तया कथितं यत् सर्वासां समस्यानां समाधानम् 'अधिकैः श्रमैरधिकैरुत्पादनै'रेव भवितुमर्हति तदर्थमस्माभिः सर्वदा सावधानैर्भवितव्यम्।' **'स्वतन्त्रता शान्तिः प्रगति'**श्चेति त्रयं भारते वर्ततां वर्धतामिति निश्चित्यैव सा महाभागा प्रतिक्षणं चिन्तयन्ती देशे महत्त्वपूर्णा योजनाः प्रावर्तयत्। भौतिकानि विज्ञान-विजृम्भितानि साधनानि समाकलय्योद्योगेष्वात्मनिर्भरत्वमासादयत्। समाज-कल्याणं च सम्पादयितुं महिलानां बालानां दलितानां विकलाङ्गानां कृषकाणां कर्मकराणां तथा सर्वसामान्यानां सर्वविध-सौविध्यायावसरान् प्रापयत्। किन्तु राजनीतिक-स्वार्थवशाः प्रतिपक्षधराः प्रतिक्षणं छिद्रान्वेषणपराः कौटिल्य-वर्धनप्रखरा देशस्य प्रतिनगरं प्रतिग्रामं लब्धप्रसराश्च सन्तो लोकतन्त्रस्य वास्तविकीं रीतिमेव दूषयितुं प्रावर्तन्त तदाऽमनस्कतयाऽनिच्छन्त्याऽपि श्रीमती-न्दिरागान्धी-महाभागयाऽऽ**पातकालप्रवृत्तेर्घोषणा** विहितेति स्पष्टमेव। यतः—

परिस्थिति-वशाज्जनैर्मनसि यन्न चेच्चेष्टितं,
न यच्च सुखदं भवेत् सकल-मानवेभ्यो हितम्।
तथापि पुरतः स्थितं प्रकटमुत्कटं सङ्कटं,
समीक्ष्य बल-पूर्वकं भवति वर्तनीयं हि तत् ॥२१॥

आपातपरिस्थितेर्घोषणानन्तरं श्रीमतीन्दिरागान्धी भारते 'शोषण-विहीनस्य जातिविहीनस्य च समाजस्य निर्मितेर्लक्ष्यं प्रापयितुं १ जुलाई १९७५ ई० दिने

कतिपयानां कार्यक्रमाणां घोषणामकरोद् ये **'विंशतिसूत्रीयाः कार्यक्रमा'** इति संज्ञया सम्बोधिताः। आपातस्थितेः समर्थकैर्विश्वस्तं यदिमे कार्यक्रमा देशस्य कोटि-कोटि-जनेष्वाशायाः किरणा उद्‌बोधिता नवीनाश्चेतना उत्पादिताश्च। विंशतिसूत्रीयाणां कार्यक्रमाणां लक्ष्यमार्थिकविकासेन सहैव समाजिको न्यायोऽप्यासीत्। कार्यक्रम-मिमं प्रसारयन्त्या श्रीमतीन्दिरागान्धी-महाभागयोक्तमभूत्।

"अस्माकं जननाया अधिकांशो ग्रामेषु वसति। अस्माभिः कर्षणास्याधि-कतम-सीमसम्बन्धिनियमाः प्रवर्तनीयाः सन्ति किञ्च भूमिहीनेषु भूमेर्वितरण-व्यवस्थाऽपि द्विगुणितेनोत्साहेन सम्पादनीयाऽपि विद्यते। अनुपयोगिन्याः कृषिभुवो वितरणे विशिष्य जनजातीयो वर्गः प्राथम्येन सहयोक्तव्यः। भूमिरहितेभ्यः कर्म-चारिभ्यो भुवः स्वामित्वदानायापि व्यवस्था विधीयेति।"

आन्तरिकापातस्थितेर्घोषणया सहैव देशस्य ते सर्वेऽपि नेतारो बन्दीकृता ये देशेऽराजकतायाः प्रसारणेन राजनीतिकलाभाय प्रयासानकर्षुः। श्रीमतीन्दिरा स्वकीयस्य दलस्य तानपि नेतॄन् निग्राहितवती ये गुप्तरूपेण विपक्षाणां समर्थने प्रसक्ता आसन्। तया विश्वं दर्शितं यत् सत्यामावश्यकतायां कुसुमादपि कोमला सा वज्रादपि कठोरा भूत्वाऽपि देशस्य रक्षणे तत्परा भवतीति। अराजकान्यसामाजि-कानि च तत्त्वानि खिन्नानि भूत्वा सहैव भीता अप्यभूवन्। सामान्या जना वाता-वरणे मनाक् शान्तिमप्यन्वभवन्। दैनिकानि प्रयोज्यानि वस्तूनि सौलभ्यात् प्राप्तुं प्रावर्तन्त। सम्पूर्णेऽपि देशे सामाजिकी स्थिरता दृष्टिगोचरतामायाति स्म। राज-नीतिकसङ्कटस्य समाप्तिरजायत। प्रशासनतन्त्रे स्फूर्तिः पर्यलक्ष्यत। देशेऽनुशासन-वीचयो धावितुं प्रवृत्ताः। किं बहुना—

कार्ये तत्परता मतौ च समता सूत्पादने वृद्धिता,
व्याहारे शुचिता मिथो व्यवहृतौ निःस्वार्थता नार्थिता।
प्रज्ञायां पटुता परेषु मृदुता मित्रेषु निर्व्याजता,
येषां कर्मसु राजते भुवि सदा सम्प्राप्यते तैर्जयः॥२२॥

इत्यनुसारं तया समग्रेऽपि विरोधि-दले यन्मालिन्यं व्याप्तमासीत्तस्यापसा-रणाय तादृशि कर्माणि प्रवर्त्य देशस्य समुन्नतये बहु प्रयतितम्। तथासत्यप्यापात-कालघोषणयाऽऽतङ्कस्य वातावरणं तु प्रसृतमेव। देशस्य जनता विरोधि-दलानि च श्रीमतीन्दिरागान्धीमहाभागा कदाचिददृशं कठोरं चरणमपि प्रवर्तयिष्यतीति तु कदापि नाकल्पयन्। विरोधिभिरापातकालिकीं स्थितिमनुरुध्य भूयांस आरोपा अपि निरूपिताः, परं ते तथ्येभ्यो दूरवर्तिन एवासन्। यतो ह्यसंवैधानिकान्यलोक-तान्त्रिकानि कर्माणि विरोधिदलैरेव प्रवृत्तान्यभूवन्। तस्यां स्थितौ संविधानस्याव-हेलनं निरोद्धुं विहितेनानेनापातकालिक-प्रयासेन राजनीतिकापराधेन सहार्थिकाप-

राधकर्तारोऽपि दण्डभाज आसन्। समाचार-पत्रेष्वङ्कुशारोपणस्यापि संवैधानिक आधारस्तदानीमवर्तत। प्रतिक्रियावादिनां लघु-लघून्यपि वृत्तन्तांस्ते स्थूलस्थूलैर-क्षरैः प्रस्तूय जनतां सत्यात् परे यातुं प्रेरयन्ति स्म। भूयसोऽपवादान् प्रकाश्य जनेषु विकृतानां धारणां वर्धयन्ति स्म। अत एव तदानीं नियन्त्रणमाध्यमेन विचाराभि-व्यक्तिभ्यः केवलं रचनात्मिका दिगदीयत विनाशो नाक्रियत। आपातस्थितौ श्रीसञ्जयगान्धिनमुद्दिश्यापि बहव आरोपाः प्राकाश्यन्त। मारुति-यान-निर्माण-भूम्यधिग्रहण-धन-संग्रह-नगर-परिशोधन-परिवारनियोजनादिमाध्यमेन श्रीसञ्जये य आरोपा निहितास्तेषु विरोधिनां लक्ष्येषु श्रीमत्या इन्दिरागान्धीमहाभागाया विरोधस्य तस्याः सत्तायाः प्रच्यावनस्य प्रतिष्ठाया हननस्यैव लक्ष्याणि प्रमुखान्या-सन्। परमस्य सर्वस्य काण्डस्य पृष्ठभूमौ तत्त्वमिदमासीद् यत्—श्रीसञ्जय एको महत्त्वाकाङ्क्षी युवक आसीत्, तस्य दृष्टिरतीव निपुणा कार्यकरणपद्धतिः सहजा सरला चावर्तत। तस्मै तदानीं युवक-काङ्ग्रेसस्य कार्यभारोऽदीयत किञ्च श्रीमती-न्दिरागान्धीमहाभागाया विंशति-सूत्रीय-कार्यक्रमाणां तदतिरिक्तानाञ्च पञ्चसूत्र-कार्यक्रमाणाञ्चोत्तरदायित्वमपि तस्मै प्रदत्तमासीदतस्तेन स्वकौशलेन सर्वं सम्पा-दितमिति तत्र प्रधानमन्त्रिमहाभागाया नासीद् हस्तक्षेपः। एवमेवान्येऽप्यारोपाः कौटिल्य-कलुषिता एवासन्।

कलुषित-हृदयानां द्वेष-भावाश्रितानां,
भवति भुवि विचित्रा रीतिरत्र प्रतीपा।
यदुचितमपि कृत्यं साध्यते सत्त्ववृत्त्या,
तदपि मलिनबुद्ध्या वीक्ष्यते दोषपूर्णम्॥२३॥

आपात-स्थित्या समग्रोऽपि देशः सामान्यायामवस्थायां परावर्तितः। शान्तेः स्थिरतायाश्च स्थितेरानयनस्योद्देश्यमभिलक्ष्य प्रवृत्त आपातकालो विश्वासस्य वातावरणमुत्पादयितुं सफलोऽभूत्। यद्यपि बन्दिनां राजनेतॄणां विषयेऽसामाजिकै-स्तत्त्वैर्भिन्न-भिन्नाः कथानिका निर्मायापवादाः प्रसारिताः परं तादृक् किमपि न सम्पन्नम्। तैः सह सहानुभूतेः सौजन्यस्य च व्यवहारा अक्रियन्त। तत एव ते कारास्वपि स्वीयान् विचारान् मूर्तयितुं समर्था अभवन्। केचन नेतारो भूमिगता भूत्वा स्वदेशे विदेशेषु च गुप्तरूपेण गतास्ते केवलं राजनीत्यैव न विद्रुता आसन्नपि तु तेऽन्येष्वपराधकाण्डेष्वपि प्रसक्ता आसन्, तस्मादेव तेषां पारिवारिकैरपि कष्ट-मनुभूतम्। आसीत् स हि समय एकताया अनुशासनस्य स्वदेशस्य सुदृढतायाश्च। तत एव ये तद्विषयिणीं घोषणां 'शक्ति-प्रयोगं' 'लोकतन्त्रस्य मरण-दिनं' वा कथ-यित्वा तामनिन्दयंस्तदपि सत्यं नावर्तत।

आपातकालस्यान्तराल एव १० अक्तूबर १९७५ ई० दिने श्रीमती गान्धी केन्द्रीयमन्त्रिमण्डले परिवर्तनमकरोत्। ७ नवम्बर-दिने च सर्वोच्चन्यायालयस्य

वैधानिकपीठेन प्रधानमन्त्रिणो रायबरेली-निर्वाचनं सर्वसम्मत्या वैधं घोषितं तेन च भूयोऽपि श्रीमतीगान्धी स्वदेशस्य विशेषतो विरोधिनां पुरत आत्मसम्मानेन मण्डिता। १७ नवम्बर ई० दिने विरोधिनेता श्रीजयप्रकाशनारायणो मोचितः। ८ दिसम्बरदिने भारतीय मुद्रण-नियन्त्रणस्य सीम सङ्कुचितम्। २३ दिसम्बरदिने पुनरपि मन्त्रिमण्डले किञ्चित् परिवर्तनमानीतम्। रक्षामन्त्रालयस्य कार्यभारः परस्मै समर्पितः। अखिलभारतीयकाङ्ग्रेससमितेश्चण्डीगढनगरे सम्पन्ने पञ्चसप्ततितमे सम्मेलने नैकशः सुदृढानामुपायानां स्वीकरणाय निर्णीतं येष्वापातकालस्थितेः स्थगनं निर्वाचनानां स्थगनं तथा संविधानस्य पुनरीक्षणमपि सम्मिलितमासीत्। तदानीमेवेदमपि घोषितं यत् काङ्ग्रेसदलस्य पुनः सङ्घटनं करिष्यत इति।

इत्थं नानाविधासु प्रवृत्तिषु सतीष्वपि श्रीमतीन्दिरागान्धीमहाभागा कर्तव्य-पराङ्मुखी नाभवत्। सर्वा अपि पुर उपागताः समस्याः समाधातुं तत्परा सती स्व-देशस्य लोकतन्त्रं द्रढयितुं सर्वदा प्रायतत। विदेशेषु यात्रा विधाय दक्षिणाफ्रीका-देशस्य मुक्त्यान्दोलनेभ्यो भारत-पक्षतः समर्थनघोषणामप्यकरोत्।

सति मनसि शुभेच्छाशंसि-भद्रे विचारे,
विलसित - विविधोद्यच्छान्ति-भाव-प्रसारे।
श्रितवति च विकास-प्रोन्नति-प्राप्ति-भारे—
ऽप्यहह ! कुटिलनीत्या दूषितं लोकतन्त्रम् ॥२४॥

卐

[६]

स्थिति-कला

समृद्धेर्दिशि स्वस्तिमत् प्रस्थानम्

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्त समुद्रो योनिः ।
विख्याय चक्षुषां त्वमभितिष्ठ पृतन्यतः ॥

—यजुर्वेद० ११-२० ।

स्वदेश-सेवा-संसक्ताश्चिन्तयन्ते दिवानिशम् ।
समृद्धेर्दिशि जायेत प्रस्थानं स्वस्तिमत् कथम् ॥१॥
निन्दा-स्तुती नैव रुन्धः पथः श्रेयोऽभिवाञ्छताम् ।
कण्टकाः कुसुमायन्ते सत्य-मार्गानुयायिनाम् ॥२॥

एकोनविंशतिमासात्मकमापातकालं विमृशद्भिर्लेखकैः सूक्ष्मया दृष्ट्या पर्यालोच्य लिखितमस्ति यच्छ्रीमतीन्दिरागान्धी महाभागा निश्चेष्टा भूत्वा कदापि नातिष्ठत् । सा हि—

विश्वस्मिन् विश्वे व्याप्तं मुद्रास्फीति-सङ्कटमभिलक्ष्य कौशलेन भारते तं न्ययन्त्रयत् । फलतो मूल्येषु नैयून्यमेतुं प्रावर्तिष्ट । आर्थिकापराधिभ्यः कठोरान् नियमान् प्रासारयत् । अश्वेतधनस्य तथा दैनिकोपयोगि-वस्तूनां सङ्ग्राहकेभ्यः कठोरां दण्ड-व्यवस्थां व्यदधात् । अनुचितेन प्रकारेणार्जितायाः सम्पदः शासनेन ग्रहणस्य निर्णयं समपादयत् । तथाविधं विधातुं नियमेष्वावश्यकानि संशोधनान्यप्यकारयत् । उपभोक्तॄणां सौविध्यायावश्यकवस्त्वधिनियमं प्रावर्तयत् । वस्तु-निर्मातृभ्यो विक्रेतृभ्यश्च प्रत्येकं वस्तुनि पुटके वा तस्य निर्माणतिथेर्भारस्य मूल्यस्य चाङ्कनमनिवार्यमघोषयत् । प्रत्येकमापणे, निर्माणशालायां शासकीयाशासकीय-विक्रयकेन्द्रेषु वस्तुनो मूल्यस्य सूच्या बहिः प्रकटनमावश्यकं प्रत्यपादयत् । प्रत्येकमावासपरिसरे स्वयंसेवि-महिलानां समितयः संयोज्य ताभ्योऽनावश्यकप्रक्रियया वस्तु-सङ्ग्रहस्यापमिश्रणस्य च परीक्षणसौविध्यं समसूचयत् ।

मानवेभ्यः सर्वतः पूर्वं खाद्यान्न-व्यवस्थाऽनिवार्या भवति, तदर्थं खाद्यान्न-स्थितेस्तथेक्षूत्पादनादिव्यवस्थासु स्फूर्तिमानयत् । स्वीयेन कुशलेन नेत्रीत्वेन वितरण-व्यवस्थायां परिष्कृतिमकारयत् । इक्षूणामुत्पादने तु तदेयती वृद्धिरभूद् यतः शर्कराया निर्यातेन विदेशिमुद्रार्ज्जनमपि विहितम् ।

खाद्यान्नानां न्यूनता-परिहारायोत्पादनाभिवृद्धिरनिवार्याऽऽसीत्। अत एवोत्पादन-विवृद्धये लाभकारिण्यो योजना निर्मिताः। यास्वतिरिक्तताया भूमेः कर्षण-व्यवस्थाः, सेचनसाधनवृद्धिः, उर्वरकोत्पादनवर्धनं, तन्मूल्येषु नैयून्यं, भूमिगत-सलिस्याधिकक्येनोपयोगाय परियोजनाः कृषकेभ्यश्च विद्युत्प्रदान-व्यवस्थाश्चेति विशिष्य महत्त्वपूर्णा आसन्। सहैव लघवः कृषकाः स्वीयमुत्पादनं वर्धयितुं समर्थाः स्युरिति धिया ऋणदानपद्धतिषु सारल्यमानीतम्। कृषकाणां सौविध्याय ग्रामीणक्षेत्रेषु धनागारिका (बेङ्काः) उद्घाटिताः। एतस्य सर्वस्य परिणामोऽयमभूद् यत् खाद्यान्नानामापातः समाप्तस्तथा कृषकैरियदुत्पादितं येन देशः खाद्यान्नविषय आत्मनिर्भरोऽभवत्।

भूमि-परिष्कृति-कार्यक्रमा अपि तस्मिन् काले कल्याणकारिणः प्रवर्तिताः। तदाधारेण भूमि-रहितेभ्योऽतिरिक्ताया भूमेर्वितरणं कृतम्। तादृश-कार्यक्रमेभ्यो व्यावहारिकं रूपं दातुं मार्च १९७६ ई० मासे मुख्यमन्त्रिणामेकं सम्मेलनमायोजितं तत्र च मुख्यमन्त्रिणोऽष्टानां वार्तानां कार्यान्वियनाय परामृष्टाः। तासां वार्तानां कार्यरूपे परिणमनात् जनप्रतिनिधयोऽपि सम्मेलने समावेशिताः। ये जना अवैधरूपेण भूमिं प्रयुञ्जन्ति स्म तेषां गवेषणं विधाय तेभ्यो भूमिं गृहीत्वा च भूमि-हीनेभ्यः साऽदीयत। अवैधाधिकृताया भुवः सम्बद्धानि यानि २० सहस्रोत्तर १३ लक्षमितानि प्रकरणानि शासनस्य पुरत आयातानि तेषु ७ लक्षमितानि प्रकरणानि सत्वरं निर्णीतानि। तया योजनया लाभानां प्रापकेषु जनेष्वेकलक्षमिता जना अनुसूचित-जातीयास्तथा जन-जातीया अवर्तन्त।

शासनेन तस्यां दिश्यपि महत्त्वपूर्णं चरणं प्रवर्तितं येन प्रत्येकं जनस्तस्या आवश्यकतानुसारं स्वल्पमूल्यवद् वस्त्रं प्राप्तुं शक्नुयात्। सर्वेऽपि वस्त्रनिर्मातृयन्त्रालयाध्यक्षाः शासनेनादिष्टा यत् त एकस्यां निश्चितायां मात्रायां स्वल्पमूल्यवन्ति वस्त्राणि निर्मान्त्विति। तादृशाल्पमूल्यवतां वस्त्राणां वितरणार्थं स्थाने-स्थाने नियन्त्रित-मूल्यवन्ति विक्रयकेन्द्राण्यप्युद्घाटितानि। सारल्येन तत् कार्यं प्रचलेत् तदर्थञ्च सहकारिण्यः समितयोऽपि समायोजिताः। ग्रामेषु तादृशवस्त्रविक्रय-व्यवस्थायै ३७ सहस्रमितानि विक्रयकेन्द्राणि स्थापितानि। हस्त-वयनेन वस्त्रोत्पादनमपि शासनेन प्रोत्साहितम्। श्रीमत्या इन्दिरागान्धीमहाभागाया विंशति-सूत्रीयस्य कार्यक्रमस्यान्तर्गतं हस्तवयनोद्योगः पुनरुद्भावितस्तथोद्योगाय तस्मै गतिं दातुं १९७६ ई० वर्षे काश्चन परियोजनाः प्रवर्तिता यासामाधारेण भारतं १६२ कोटिमुद्राणां हस्तनिर्मितवाससां निर्यातमकार्षीत्।

ग्रामेषु वसतां गृहहीनानां दीनानामावासायेत्थं व्यवसितं यत् तेभ्यः केचन भूभागा भवन-निर्मितये देयास्तथा भवन-निर्माणोपयोगिन्यः सामग्र्योऽपि स्वल्पेन मूल्येन प्रापणीया इति। कतिषु चिद् राज्येषु येभ्यो भूभागा उपलम्भितास्तेभ्यो

भवन-निर्माणायर्णप्रदानव्यवस्थाप्यक्रियत। एकाकिन्युत्तरप्रदेशेऽनया योजनया तत्र द्वादशलक्षजना लाभान्विता अभूवन्। ग्रामेष्वेव निवसद्भ्यो: भूमिहीनेभ्य: कृषिकर्मकरेभ्यो निर्धनेभ्यो गृहनिर्माणस्य कार्यं पञ्चायत-संस्थाभ्यो दत्त्वा देशे विकसिताविकसिता: ३२,५०,००० संख्यका भूभागा निर्मूल्यं वितरिता:।

न्यूनायवद्भ्य: पेयपत्रिकोद्यानेषु कर्माणि कुर्वद्भ्य: कर्मकरेभ्यो गृहनिर्माणाय योजना निर्मितास्तासां परिपूर्तये च ५८००१६ कोटिमितानां मुद्राणां व्ययव्यवस्था व्यधीयत। तस्मिन्नेव वर्षे प्राय: सार्धषड्लक्षमितानि गृहाणि निर्माप्य सार्धद्विलक्षमितानां गृहाणां निर्माणाय कार्यारम्भा विहिता:।

नगराणां विकासार्थं राजधानीस्थक्षेत्रेभ्य: २० कोटिमुद्राणां व्यवस्था तथा नगरीय-विकासाय २३० कोटिरूप्यकाणां व्ययदिङ् निर्धारिता। नगराणामापणा: स्वच्छा विहिता। अवैधा भुवोऽधिकारा निराकृता:। देहल्यां शासकीयायां भुवि वसतां जनानां व्यवस्थापनाय तेभ्यो भूभागा अदीयन्त।

आर्थिकसमत्वसम्पादनाय शासनेन संसदा नगरीय-भूमि-सीमया विनियमनस्याधिनियम: पारितस्तदनुरोधेन च सीमतोऽधिकायां भूमौ शासनस्याधिपत्यं व्यवस्थापितम्। तेष्वेव भूभागेषु दुर्बलवर्गाणां भवननिर्माणयोजना विनिर्माय क्रियान्विता:। ग्रामीण-विकासाय प्रचलन्तीनां योजनानां प्रगतये तथा ताश्च लक्ष्यं यावत् प्रापयितुं १३.६५ कोटिरूप्यकाणां राशि: स्वीकृत:। तासु योजनासु पशुपालन-कृषि-सहकारिता-स्वास्थ्य-केन्द्र-कुटीरोद्योग-पारम्परिक-लघूद्योगानां विकासार्थं विशिष्य ध्यानं दत्तम्। तस्मिन्नेव वर्षे पञ्चायत-समितिभ्योऽतिरिक्तानां जनपद-परिषदां स्थापना अपि विहिता यासां माध्यमेन विकासकार्याणि सुतरां प्रगतिं श्रितानि। सीमान्त-कृषकेभ्य: सहयोगायाभिकरण-व्यवस्था सम्पादिता। तन्माध्यमेनाभिकर्तार: सीमान्तकृषकाणां कृषिकर्मकराणाञ्च गवेषणां विधाय तेषां काठिन्यान्यपाकुर्वन् साहाय्यं च प्रदातुं व्यवास्थापयन्। ईदृशकार्येभ्य: २००कोटिमुद्राणां व्यवस्थाऽभूत्।

दीनानां शोषितानां धनपति-विहित-व्यूह-मध्यङ्गतानां,
सामन्तानां समन्ताद् बहुविध-वितते बन्धने पातितानाम्।
भूस्वामित्वं श्रितानां कुसृति-विवशितोद्धारभारोज्झितानां—
मुद्धारार्थं विधानं विरचितमुचितं सौख्यदं शासनेन ॥३॥

अपि च— **ऋण-स्थगन-मोचने नियमिते तत: शोषिता:,**
कृषीवल-जना द्रुतं सुसरलै ऋणैस्तोषिता:।
सदुद्यम-रतास्तथा श्रमकरा: प्रबन्धादिषु,
प्रयस्य परिषत्स्वपि प्रतिनिधित्वत: पोषिता: ॥४॥

हठादुद्योगानां सततमवरोधाय स-बलं,
विसृष्ट्यै मुक्त्यै वा श्रमिक-निवहस्याशु चयनात् ।
गृहीतव्याऽवश्यं ह्यनुमतिरिति द्राङ् नियमितं,
ततः श्लाघ्यं सर्वैरपि भुवि तदा शासनमभूत् ॥५॥

इत्थमेव देशस्यार्थिक-विकासाय महत्सूद्योगेषु सम्पदामधिकाधिकं नियोजनाय योजना आहिताः। रुग्णानांय न्त्रालयानां व्यवस्थाः शासनेन स्वहस्तसात् कृतास्तथा विमान-परिवहन-बेङ्क-बीमा-कृष्णाङ्गारोद्योगानां राष्ट्रियकरणं सम्पादितम्। नैष्कर्म्यापनोदनाय नूतनानामुद्योगानां स्थापनाः, उद्योगेषु कार्यरतानां श्रमिकाणां शिशुभ्यः समुचित-शिक्षा-व्यवस्थां विधातुं केन्द्रीयविद्यालयानामन्येषां साहाय्यप्राप्त-विद्यालयानां स्थापनाश्चाप्यक्रियन्त ।

भारतस्य परममित्रेण रूसदेशेन १९५५ ई० वर्षस्य जूनमासे श्रीजवाहरलालनेहरूमहाभागानां रूसयात्रया सहैव प्रवर्तितायाः सहयोग-प्रक्रियाया नैरन्तर्येण भारतीय-महोद्योग-विकासेषु परमोन्नतिरभूत्। द्वयोरपि देशयोर्मध्ये व्यावहारिकार्थिक-वैज्ञानिक-तान्त्रिक-सांस्कृतिक-क्षेत्रेषु विहितानां सन्धीनां परिणत्या मिथो मैत्री-भावना सुदृढाऽभवत् । भारतस्य तटस्थया विदेशनीत्या तथा श्रीमत्या इन्दिरागान्धीमहाभागायाः शान्ति-सहास्तित्व-भावनाभ्यां भारत-रूस-देशयोर्वर्धमाना मैत्रीसम्बन्धा भूयोऽपि दृढतरा अभूवन् । तेषामेव परिणामोऽयं विद्यते यत्— सांस्कृतिकादान-प्रदानाभियान्त्रिक - वस्तुनिर्माण-भवन - निर्माण-साधनौषधोद्योग-कर्गद-सेचन-व्यापारादिषु सहयोगा वर्धन्त एव । स्वदेशे सोवियत-रूसदेशस्य सहयोगेन 'भिलाई-लोह-संयन्त्रो, बोकारोस्थो धातु-यन्त्रालयः, रांचीस्थाऽभियान्त्रिक-वस्तुनिर्माण-शाला, कोर्बो-रत्नागिर्योरल्यूमीनियमस्य तथा दुर्गापुरे खनि-खनन-यन्त्र-निर्मितेः, हरिद्वारे विद्युतो महद्वस्तु-निर्माणस्य बरौनी-मथुरयोश्च तैलशोधनस्य विशालानां निर्माणीनां परियोजनाः साफल्येन प्रवर्तमाना भारतस्यार्थिके विकासे साम्प्रतमपि योगं कुर्वन्ति ।

रक्षासु शिक्षासु च पूर्णदाक्ष्यमानेतुमुद्घाटच विधाः प्रशस्ताः ।
कृताश्च शान्त्यै सहयोग-लब्ध्यै मैत्र्याऽनुकूलाः प्रतिवेशि-देशाः ॥६॥
आपातकालस्य दिनेषु संयता, स्वराष्ट्र-सेवासु भृशं सुसङ्गता ।
आशासु सर्वास्वभवत् स्थितिः स्थिरा, व्यधादिदं चारु महीयसीन्दिरा ॥७॥

☐ सम्पत्तौ च विपत्तौ च महतामेकरूपता

सम्पत्तौ नातिमोदन्ते विपत्तौ न तुदन्ति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥८॥

शान्ति सहयोगञ्च सर्वैर्देशैः सह विधित्सया श्रीमतीन्दिरागान्धीमहाभागा पाकिस्तानेन साकं पत्राचार-सेवा-विमान-सेवा-धूमयान-सेवाश्च पुनः प्रारभत। युद्धबन्दिनः परावर्तत। पञ्चशीलोद्घोषेण सम्पादितां चीनदेशीयां प्राक्तनीं मैत्रीं भूयः स्वस्वभावानुसारं सर्वाः पूर्वा घटना विस्मृत्य चीनेन सहापि सम्बन्ध-परिष्काराय सा प्रायतत राजनयिकं सम्बन्धञ्च समस्थापयत्। श्रीलङ्का-बर्मा-बांग्लादेश-नेपालादिभिर्देशेभ्यः सहापि तथैवावर्तयत्। जम्मू-कश्मीरेषु स्थायिन्यै शान्तये काङ्ग्रेसदलस्य सहयोगेन **'शेख अब्दुल्ला महोदयं'** मुख्यमन्त्रित्वेनास्थापयत्। नागालैण्डं व्यवस्थापयितुं तत्रत्यामशान्तिमातङ्कवादितां च समापयितुं तत्र विकास-व्यवस्थाविधिमुन्नमय्य स्वेच्छया राष्ट्रवादि-सङ्घटनस्य काङ्ग्रेसे विलयमकारयत्। सिक्किमस्य जनताया भारते विलयस्य स्वप्नमपि सा विधानसभायां बहुमतं प्रापय्य साकारयत्।

विपक्षदलानां नेतारः श्रीमतीमिन्दिरागान्धी-महाभागां **'स्वेच्छाचारशालिनी शासिके'** त्यारोपेण वर्णयन्ति स्म किन्तु १८ जनवरी १९७७ ई० दिने लोकसभां सम्भज्य निर्वाचन-घोषणया सा स्वीयां लोकतन्त्रे दृढां निष्ठां प्रकटयन्ती विरोधिनामारोपमसदसाधयत्। तयाऽप्रत्याशितया निर्वाचनघोषणया विरोधिनो विस्मयं प्राप्ताः परं द्वेषात् केनाप्येतन्न स्वीकृतं यदिन्दिराया इदं कार्यं लोकतान्त्रिक-पद्धतावास्थायाः प्रतीकमासीदिति। निर्वाचन-घोषणोत्तरं येषां नेतॄणां विरुद्धं त्रोटन-स्फोटनानां कर्मसु कान्यपि स्पष्टानि प्रमाणानि नाभूवँस्ते विमोचिताः।

त्रयोदशमासानन्तरं कारातो मुक्तः श्रीमुरारजीदेसाईमहोदयो **'जनता-दल'**-नाम्नैकस्य संयुक्त-सङ्घटनस्य घोषणामकरोत्। तस्मिन् काङ्ग्रेसस्यासन्तुष्टो वर्गो जनसङ्घो भारतीय-जनता-दलं समाजवादि-दलं च सम्मिलितमभूत्। विभिन्न-धारावतां तत् सङ्घटनं सफलं प्रत्यपद्यत। श्रीजगजीवनराम-हेमवतीनन्दनबहुगुणा-सदृशा अनेके महारथा इन्दिरायाः पक्षं त्यक्त्वा निःसृताः। श्रीजगजीवनरामस्य बहिर्गमनात् सत्तारूढदलस्यैकं वास्तविकं नवीनं विभाजनमभूत्। संसदि जगजीवन-रामो भारतस्य जनवसतेः सप्तमभागस्यास्पृश्यवर्गस्य प्रातिनिध्यं करोति स्म। तेनैकं **'काङ्ग्रेस फार डेमोक्रेसी'**-नाम्ना नवीनं दलमपि घोषितम्।

ये लोलुपाः स्वार्थदृशो ह्यनिश्चिताः, पदाप्तिकामाश्च भवन्ति सङ्गताः।
ते सम्पदि त्वाशु भजन्ति सङ्गतिं, दृष्ट्वा विपत्तिं ननु यान्ति सर्वतः ॥९॥

८ फरवरी १९७७ ई० दिने श्रीमतीन्दिरागान्धी-महाभागा सत्तारूढदलस्य कार्यक्रमं प्रास्तौद् यस्मिन् जनतायाः समाधानाय साऽकथयत्—काङ्ग्रेसदलं कदापि कस्याप्येकस्य जनस्य दलं नाभूत्। मया तु जनताया एकया विनम्रया सेविकयैव भाव्यम्। सर्वदैव काङ्ग्रेस-दलं सार्वजनिकं दलमस्थात्। तेन सर्वदैव

दीनानां हितस्य पक्षः समर्थितः। लोकतन्त्रं प्रति काङ्ग्रेसदलं पूर्णया निष्ठया संयुक्तमस्ति। ततस्तत् कोऽपि विचालयितुं न शक्नोति न वा पराकर्तुं शक्नोति।…… नवीने संविधाने न्यायालयानां प्रतिष्ठाया निष्पक्षतायाश्चोत्तरयदायित्वमपि सुनिश्चितमस्ति।" इति।

९ फरवरी १९७७ ई० दिने भारतीय-गणतन्त्रस्य **राष्ट्रपतीनां श्रीफकरूद्दीन-अली-महोदयानां निधनमभूत्**। तेषां निधनेन श्रीमती गान्धी भृशमाहता। ते गभीरा ज्ञानिन आसन्। विभिन्नेषु पदेषु कार्याणि कृत्वैवोच्चैःपदे प्रतिष्ठिता अभूवन्। श्रीमतीन्दिरायास्ते प्रबलाः समर्थका अप्यासन्। १९६९ ई० वर्षे काङ्ग्रेसदलस्य विभाजनावसरे त एव प्रथमे समर्थका अभूवन्। परिवारनियोजन-कार्यक्रममाध्यममाश्रित्यानुचितं लाभं प्राप्नुवानेभ्यो दण्डप्रदानायापि त उत्सुका अवर्तन्त। सङ्क्रान्तिके काले तेषां निधनेन सर्वेऽपि देशवासिनः खेदं सङ्कटञ्चान्वभूवन्!!!

न कोऽप्यवेदीदिदमद्य यावत्, कस्माद् विधाता विनिहन्ति शीघ्रम्।
सुसज्जनानत्र निरीहभावात्, कथं च पुष्यन्ति नितान्त-दुष्टाः॥१०॥

श्रीमतीन्दिरागान्धी दैवस्य प्रतिकूलतामनुभवन्त्येकदा श्री ई० पुष्पदासाय साक्ष्यं ददानाऽकथयत्—"अद्य प्रत्येकं जनः स्वस्याधिकारान् प्रति जागरूकोऽस्ति स हि यः कोऽपि वा भवतु। साम्प्रतिके विश्वे प्रेम्णः सद्भावनायाश्च स्थिरत्वाय दैन्यस्यापाकरणमत्यावश्यकं विद्यते। एवं तत्कालं कर्तुं न शक्यते। दैन्यं पूर्णतया परिहर्तुमपि न शक्यते। परं यथासम्भवं ततोऽधिकाधिकं जना दूरे कर्तव्याः। अस्माकं देशे यथैव वयमीदृशे कार्ये संलग्नास्तदैव सर्वा अपि शक्तयोऽस्माकं विरुद्धमेकीभूताः। देश्यं वैदेश्यं धनमर्थशक्तिः समाचारपत्राण्युद्योगाः सर्वेऽपि सम्भूयास्मान् प्रभावयितुमकथयन्। त इदं न कथयन्ति यद् 'वयं दैन्यस्य विरुद्धाः स्मः। प्रत्येकं जनः कथयति यद् दैन्यं निन्द्यं विद्यते, तथापि तस्य समाप्तेः कार्यक्रमाणां दिशि पुरो वर्धने सत्यस्माकं मार्गेऽवरोधमुत्पादयन्तीति।"

एवंविधायां स्थितौ स्वीयां धूमायमानां राजनीतिकीं स्थितिं धैर्येण संरक्षन्ती श्रीमतीन्दिरा-गान्धी-महाभागा जनवरी १९७७ ई० तः प्रायो मार्च १९७७ ई० पर्यन्तं समस्तेऽपि भारते स्वदलस्य पक्षेऽतिप्रबलं निर्वाचन-प्रचारमकार्षीत्। सा चापातकाले तथाकथित-दुष्प्रभावि-प्रक्रियाणां नैतिकमुत्तरदायित्वमात्मनि स्वयं स्वीकृतवती। तथासत्यपि तस्मिन् निर्वाचने काङ्ग्रेसस्यानेके महान्तो नेतारः पराजिताः। काङ्ग्रेसदलस्याशाया विपरीतानि फलानि प्रकटितानि। स्वयं श्रीमती गान्धी-महाभागाऽपि रायबरेलीक्षेत्रतो निर्वाचने पराजिता। समस्तं विश्वमेतेषां निर्वाचनानां परिणामं विज्ञाय विस्मितम्। एकादशवर्षेभ्यः प्रवृत्तमिन्दिरायाः शासनं भारते समाप्तम्।

निर्वाचनेऽस्मिन् श्रीमती गान्धी नैकाननुभवान् प्राप्तवती । काङ्ग्रेसस्य ते जना, ये ह्यापातकालस्यान्तिमं चरणं यावत् तस्याः समर्थनं कुर्वन्ति स्म तेऽपि निर्गताः। तेषु भूयांसः सौविध्यवादिनोऽप्यभूवन्। उत्तरभारते महान् पराजयोऽभूत् केवलं दक्षिण-भारत-गुजरात-महाराष्ट्रेभ्यस्तस्याः समर्थकाः सार्धशतमिताः सदस्या एव जित्वा संसद्युपागताः।

विरोधिदलानां स्पष्टमुद्देश्यमासीद्—श्रीमत्या इन्दिरागान्धी-महाभागायाः शासनस्य समाप्तिः। तेषां तद्दुरभिकाङ्क्षितं दुर्दैवान्न फलितम्। राजनीतिक-सङ्घर्षाणामनुभववती श्रीमती गान्धी प्रत्याह्वानस्य स्वीकृतेः शक्तिमप्यधारयत्। पराजयानन्तरं च सा स्थितिं सर्वतो विमृश्य जनताया निर्णयं स्वीकृत्य च कार्यकारिराष्ट्रपतिमहामहिम-**श्री बी० डी० 'जत्ती-महोदयेभ्यः'** २२, मार्च ७७ ई० दिने स्वीयं त्यागपत्रं प्रास्तौत्। निजेभ्यः कारणेभ्यः खेदानुभवस्तस्या महाभागायाः प्रकृतौ नासीत्। परं राष्ट्रियेण पराजयेन साऽवश्यं दुःखिताऽभूत्। तथापि येन गरिम्णा सा प्रधानमन्त्रिपदं प्राप्ताऽऽसीद् तेनैव गरिम्णा विपक्षस्य नेत्रीत्वभूमिकाया निर्वाहस्यापि सङ्कल्पमकार्षीत्।

कर्तव्य-मार्गे सततं प्रसक्ताः, प्राप्तिं विसृष्टिं च न चिन्तयन्ति।
दत्तं सुहार्देन च यैस्तदीयं, तेभ्योऽर्पणे स्यात् किमु चिन्तनीयम् ॥११॥

□ जनता-शासनं तदीयाः प्रवृत्तयश्च

अन्तर्भवति निलीनो, यदि दुरभिसन्धिजेन्धनो विरूपः।
दहति शुभोऽपि विचारो, भवति न काऽपि स्थिरा वृत्तिः ॥१२॥

जनता दलेन बहुमतं प्राप्तम्। नेतृत्वं श्रीमुरारजी-देसाई-महोदयैरधिगतम्। तेषां चयनं जनतादलस्य संसत्सदस्यैर्नाक्रियत। सङ्घर्षः श्रीचरणसिंह-श्रीजगजीवनरामयोर्मध्येऽवर्तत किञ्च निर्णीतमासीद् यद् द्वितीयदिने श्रीजयप्रकाशनारायणः प्रातः सदस्यानां सम्मतिं प्राप्य निर्णेष्यतीति। तन्मध्य एव तत्र चौधरी-चरणसिंहस्य पत्रं नीत्वा राजनारायण आगच्छद् यस्मिन् तेन स्पष्टं कथितमासीद् यत् ते जगजीवनरामस्य नेतृत्वे कार्यं न करिष्यन्तीति। सहैव कैश्चित् सदस्यैरपि श्रीजयप्रकाशाय कथितं यत् तेऽपि जगजीवनरामस्य समर्थका न सन्ति। ततः परं गान्धि-प्रतिष्ठाने यत्र स महाभागः सदस्यानां सम्मतिं गृह्णाति स्म, कैश्चन जनैः प्रस्तावितं यत् ते सम्मत्यपेक्षया स्वयं यदुचितं मन्येरँस्तं प्रधानमन्त्रित्वाय मनोनीतं कुर्युः।

श्रीनारायण आचार्य-कृपलानीमहोदयमपि सहयोगिनमकरोत्। उभाभ्यां च श्रीमुरारजीदेसाईमहाभागा एव प्रधानमन्त्रिणो निर्णीताः। तस्मिन्नुपवेशने

श्रीजगजीवनराम उपस्थितो नाभूत्। तेन मन्त्रिपदस्वीकारेऽप्यसहमतिः प्रकटिता। तस्य गृहे प्रदर्शनेन स मन्त्रित्वाय बाधितः। प्रधान-मन्त्रिणश्चयने काऽपि वैधानिक्यापत्तिस्तु नासीत् परं जनतादलस्य सदस्यानां मतानि न गृहीतान्यासन्, तस्मादेव श्रीमुरारजीभ्रातरः स्वीये प्रधानमन्त्रित्वकाल एकस्य दलस्य नेतार एवावर्तिषत।

जनता-शासने श्रीचरणसिंहश्चौधरी गृहमन्त्री, श्रीअटलबिहारी विदेशमन्त्री, श्रीलालकृष्ण अडवानी सूचना-प्रसारणमन्त्री श्रीराजनारायणश्च स्वास्थ्यमन्त्री नियुक्तः। शासन-प्रवृत्तेः समकालमेवैते मन्त्रिणः श्रीमत्या इन्दिराया विरुद्ध-मत्याचारानाचरितुं नानाविधानि कर्माण्यकार्षुः। विविधा मिथ्याप्रचारा निस्तत्त्वा आरोपास्तथा तर्कहीना विचारास्तां महाभागां निन्दयितुं प्रत्यहं निरमीयन्त। इन्दिराया विरुद्धमष्टचत्वारिंशत्-सङ्ख्यकाः परीक्षणायोगा अस्थाप्यन्त। तेषु सर्वतो ज्यायानासीत्—'शाह आयोगः।' श्री सञ्जयस्य विरुद्धमपि पञ्चत्रिंशत्-सङ्ख्यका आयोगा न्ययुज्यन्त। नवीनायां लोकसंसदि प्रायस्तेष्वेव प्राधान्येन चर्चा अक्रियन्त यथेच्छमनर्गलं च सदस्यैरभ्यभाष्यत। श्रीमतीन्दिरा कारायां कथं निपात्येत, कथं च सा पीड्येत कथं च साऽपमानिता क्रियेत? एत एव विषया यत्र तत्र मन्त्रिगणेषु विशिष्य विवेच्या अभूवन्। यतस्ततो यत्किञ्चिदपि परिज्ञाय तद्-विकृत्य प्रस्तोतव्यमित्येव कार्यं सर्वेऽप्यात्मसादकार्षुः। हन्त !!!

श्रीमतीन्दिरागान्धीमहाभागा काङ्ग्रेस-दलस्य दृढतायै भूयो भूय आगन्तुकान् कार्यकर्तॄनबोधयत् परं दलस्य दृढता-रक्षणं कठिनमासीत्। तदा श्रीमती गान्धीमहाभागा समग्रां राष्ट्रियां सामाजिकीं च पीडामात्मनः स्कन्ध उदवहत्। साऽवनमनं नैव शिक्षिताऽऽसीत्। आत्मसम्मानाय राष्ट्रियगौरवस्य रक्षार्थञ्च साऽत्यन्तं संवदेनशीलाऽभवत्। अत एवैकेन प्रतिष्ठितेन राजनेत्रा 'माइकल-फूट'-महानुभावेन स्वीय एकस्मिन् लेखे कथितमासीत्—'इमं पराजयं सा महाभागा येन गरिम्णा ययोदारतयाऽग्रहीत् स भारतीय-लोकतन्त्रस्येतिहासे सर्वतो महत्त्व-पूर्णः क्षणोऽवर्तत।" इति।

एकदा श्रीमत्या इन्दिरागान्धी-महाभागायाः केचन शुभ-चिन्तकास्तया सह मन्त्रयितुं समागताः। येषु श्रीवसन्तसाठेमहोदयास्तथा पञ्जाबप्रान्तस्य भूतपूर्व-मुख्यमन्त्रिणः श्रीदरबारासिंहा अप्याअन्। तैः श्रीमतीगान्धी निवेदिता यद् विरोधि-नामपकीर्ति-प्रसारणाभियानस्योत्तरं दातुं सा पूर्णरूपेणाभिमुखमागच्छेत्। तदा सा महाभागा तयोः प्रस्तावं स्वीकृत्याप्राक्षीत्-सर्वप्रथमं मया क्व गन्तव्यम्? तदा ते **'पवनाराश्रमे श्रीविनोबाभावे'**महानुभावस्य दर्शनाय प्रैरयन्। सा तत्रागच्छत् तस्यास्तत्र भव्यं स्वागतमभूत्। आचार्य-श्रीविनोबामहाभागैश्चाशीर्दत्त्वा 'चरैवेति चरैवेती'ति सन्दिष्टम्। वस्तुतः सा ततः शक्तिं प्राप्नोत्।

तेष्वेव दिवसेषु भारतस्य गृहमन्त्रिणा श्रीचरणसिंहेन जीप-क्रयविक्रतिकाण्डस्य व्याजेन ३ अक्टूबर १९७७ ई० दिने श्रीमतीन्दिरागान्धी निगृहीता। निग्रहणानन्तरं तामधिकृत्य प्रस्तुतानारोपान् सत्यापयितुं श्रीचौधरी समर्थो नाभूत्। अतः सा ४ अक्टूबरदिन एव विमोचिता।

महानिर्वाचने पराजयानन्तरं श्रीमत्या इन्दिरागान्धी-महाभागाया व्यक्तित्वं प्रभावहीनं विधातुं जनतादलस्यान्तर्बहिश्च सुनियोजितेन प्रकारेणाक्रमणानि प्रारभन्त। परम्, आत्मविश्वासवती दृढनिश्चयशालिनी च श्रीमतीगान्धी साहसेन तेषामाक्रमणानामाभिमुख्यमकरोत् तथा प्रामाणयद् यत् सा देशस्य सशक्ता प्रभावशालिनी च नेत्री वर्तत इति। एतन्मध्य एव काङ्ग्रेसाध्यक्षपदाद् दलस्य पराजय-सम्बद्धमुत्तरदायित्वमात्मनि गृहीत्वा श्रीदेवकान्तबरुआमहोदयो दलाध्यक्षपदात् त्यागपत्रमदात्। श्रीमत्या इन्दिरागान्धी-महाभागायाः पराजयकारणात् तस्या नाम्नोऽप्यध्यक्षतायै विरोधोऽभूत्। तदा सा महाभागा तं मार्गमनुचितं मत्वा १८ दिसम्बर १९७७ ई० दिने काङ्ग्रेसकार्यकारिणी-समितेस्त्यागपत्रं प्रादात् तथा स्वीयानां समर्थकानामेकमुपवेशनमाकार्य विचारमकरोत्। सर्वैरपि निर्णीय पृथक् काङ्ग्रेस-निर्माणं कृतं तथा सर्वैः सदस्यैश्च सम्भूय साऽध्यक्षपदेऽभिषिक्ता। तच्च **'काङ्ग्रेस-दलम्' (इ०)'** नाम्ना समबोध्यत।

स्वतन्त्रवृत्त्या निजदेशसेवां स्वकीयतन्वा मनसा धनेन।
कुर्वन्ति येऽजस्रमपेतलोभास्ते स्वापमानं न जनाः सहन्ते ॥१३॥

शनैः शनैर्जनताशासनस्य गतिविधिं जनता ज्ञातवती। मन्त्रिमण्डले वर्तमाना अपि परस्परं सामञ्जस्यं स्थापयितुमशक्ता व्यर्थेषु कार्येषु कालं गमयन्तः स्थैर्याय किमपि कर्तुं नाशक्नुवन्। श्रीमतीगान्धी स्वीयं दलं दृढं कुर्वती मार्च १९७८ ई० मध्य आजमगढ़तो लोकसभाया एकस्मिन् निर्वाचने काङ्ग्रेस (ई०)-प्रत्याशिनीं **श्रीमतीमोहिसिना किदवई**—महाभागामुपास्थापयत्, सा च सर्वानन्यान्-प्रत्याशिनः पराजित्य विजयमवृणोत्। १३ मार्च, ७८ ई० दिने शाहायोगेन संसदि स्वीयमन्तरिमं प्रतिवेदनं प्रस्तुतम्। जूनमासे कर्णाटकान्ध्रमहाराष्ट्रेषु सम्पन्नेषु निर्वाचनेषु काङ्ग्रेस (इ०) दलेन बहूनि स्थानानि जितानि। ततः परमिङ्ग्लैण्डतः श्रीमती गान्धी समामन्त्रिता किन्तु सर्वकारस्यानिच्छया सा गन्तुं नानुमता। कालान्तरेण सा लन्दनस्य यात्रामकरोत् सम्मानञ्च प्राप्नोत्।

आत्मानं निर्वाचन उपास्थाप्य जनताया दृष्टौ स्वीयं पुनर्मूल्याङ्कनं कारयितुं श्रीमतीन्दिरागान्धी चिकमंगलूर (कर्णाटक) तो लोकसभायै प्रत्याशितां प्राप्योपस्थिता। ५ नवम्बर १९०८ ई० दिने च सा जनतादलस्य प्रत्याशिनं पराजित्य विजयमलभत किन्तु तस्यैव मासस्यैकविंशे दिने विशेषाधिकारस्य दुरुपयोगनाम्ना

लोकसभायाः सादस्येन तां वञ्चितां विधायैकस्मै दिवसाय सा तिहाड़-कारायां प्रेषिता। पुनश्च २९ दिसम्बर-दिने विशेषाधिकारसमितेः सम्मत्या निगृहीता तस्मिन्नेव दिने च विमोचिता। इत्थमपदस्थकालस्तस्या अग्निपरीक्षाकाल आसीत्। बहुधा सा राजनीतेः संन्यासायापि व्यचारयत् परं देशभक्तेः परवशा सर्वमसहत।

अवाप्य सङ्कटं न ये भवन्ति जातु विह्वला,
जलाप्लवोपमं च तं विचार्य सन्ततं स्थिराः।
स्वकर्म-साधने रताः पुरः पुरो व्रजन्ति ते,
ह्यवाप्नुवन्ति सद्दिशं तथा जयन्ति जीवने ॥१४॥

आसीज्जनतादलं बहूनां दलानां विलयेन निर्मितम्। तस्मादेव तेषु मिथो नाभूदैकमत्यम्। १९७९ ई० वर्षे जुलाईमासस्यान्तिमे सप्ताहे श्रीमतीन्दिरागान्धी श्रीचरणसिंहं काङ्ग्रेससहयोगेन प्रधानमन्त्रित्वं प्रापयितुं प्रालोभयत्। स हि प्रलोभनवशात् तथाविधां प्रक्रियां विधाय जनतादले स्वीयं बहुमतं संसाध्य श्रीमुरारजीभ्रातरं त्यागपत्राय बाध्यमकार्षीत्। प्रधानमन्त्री च चौधरीचरणसिंहमहोदयोऽभूत्। पुनश्च २० अगस्त १९७९ ई० दिने लोकसभाया उपवेशनं कल्पितमासीत् तद्दिन एव काङ्ग्रेस (इ०)दलेन चरणसिंहमन्त्रिमण्डलात् स्वीयं समर्थनं प्रतिगृहीतम्। फलतश्चौधरीमहोदयस्य मन्त्रिमण्डलेन त्यागपत्रं दत्तम्। २२ अगस्त, ७९ ई० दिने लोकसभा भग्ना राष्ट्रपति शासनञ्च प्रवर्तितम्। ततः परं लोकसभाया निर्वाचनस्य याचनां कुर्वत्या श्रीमत्या गान्धीमहाभागया प्रमाणितं यद् भारतस्यान्येषां नेतॄणामपेक्षया सा राजनीतावधिकं प्रावीण्यं भजत इति।

वाञ्छन्ति स्म सदैव ये निजकरेष्वेयादिदं शासनं,
लब्ध्वा चोच्चपदानि तत्र जनता-सेवां-प्रकुर्याम वै।
किन्त्वासीन्नहि सर्वसम्मतमतं तेष्वैकमत्यं ततो,
मण्डूकप्लुतिवद् विकीर्य विरताः साफल्यमेता न ते ॥१५॥

□

[१०]

सिद्धि-कला

प्राप्ता प्रतिष्ठां पुनरिन्दिरैव

मनो॑ जूतिर्जु॑षतामाज्य॑स्य बृह॒स्पति॑र्य॒ज्ञमि॒मं त॑नो॒त्वरि॑ष्टं य॒ज्ञꣳ समि॒मं द॑धातु। विश्वे॑ दे॒वास॑ इ॒ह मा॑दयन्तामो३म् प्रति॑ष्ठ ॥१३/२॥

—यजुर्वेदसंहिता०

प्रभवति कुटिलेऽथ कृष्णपक्षे, प्रसरति भूपटले घनोऽन्धकारः।
द्रुतमुदयमवाप्य शुक्लपक्षः परिहरते च पुनस्तमत्रिदृग्जः ॥१॥
निरन्तरं निन्दन-दूषणाद्यैर्मिथ्याप्रचारैश्च कदर्थिताऽपि।
महीयसी मानधना प्रधानां प्राप्ता प्रतिष्ठां पुनरिन्दिरैव ॥२॥

१९८० ई० वर्षस्य जनवरीमासे लोकसभाया निर्वाचनं सम्पन्नम्। **श्रीमतीन्दिरागान्धी** महाभागा **'रायबरेली'** तथा **'मेडक'** तो विशालेन बहुमतेन विजयमलभत। **श्रीसञ्जयगान्धी**-महाभागश्च-**'अमेठी'**तो विजयं प्राप्तवान्। श्रीमत्या **इन्दिरागान्धी**-महाभागाया दलं ५२५ स्थानेभ्यः **३५१** स्थानानि सम्प्राप्य **द्वि**-त्रिकांशमितेन बहुमतेन विजित्य लोकसभायामागच्छत्।

१० जनवरी १९८० ई० दिने संसदः केन्द्रीये प्रकोष्ठे काङ्ग्रेस (इ०) संसदीयदलस्योपवेशने परमेण हर्षोल्लासेन श्रीमतीन्दिरागान्धी सर्वसम्मत्या दलस्य नेत्री निर्वाचिता तथा तस्या नेत्रीत्वे सर्वैरपि पूर्णो विश्वासो व्यञ्जितः। तस्या नेत्रीनिर्वाचन-सूचनां श्रीभीष्मनारायणो राष्ट्रपतिभ्योऽदात् तैश्च श्रीमती गान्धी नवीनसर्वकारनिर्माणाय निमन्त्रिता।

चतुस्त्रिंशन्मासानन्तरं जनवरी-मासस्य चतुर्दशे दिने द्वाविंशति-सदस्यानां मन्त्रिपरिषदा सह श्रीमतीन्दिरागान्धीमहाभागा शासन-भारमग्रहीत्। राष्ट्रपतिभवने मन्त्रिपरिषदो द्वाविंशतिसदस्येभ्यो महामहिम-श्रीराष्ट्रपति-महानुभावाः पदस्य गोपनीयतायाः शपथानदापयन्। **श्रीमतीन्दिरागान्धीमहाभागा चतुर्थवारं भारतदेशस्य प्रधानमन्त्रिपदे प्रतिष्ठिताऽभवत्।**

तस्या मन्त्रिमण्डले पञ्चदश केन्द्रीयस्तरस्य सप्त च राज्यस्तरस्य मन्त्रिण आसन्। २१ जनवरीदिनस्यैकादशवादनसमये सप्तम्या लोकसभायाः सत्रमारब्धम्।

शपथसमारोहस्यासीदिदं प्रमुखं वैशिष्ट्यं यत्तस्मिन् पञ्चसदस्यैः संस्कृत-भाषया षट्सदस्यैश्च हिन्दीभाषया शपथाः स्वीकृताः। श्रीमतीगान्धीमहाभागापि हिन्दीभाषयैव शपथमगृह्णात्। २२ जनवरीदिने लोकसभायाः स्थायिनेऽध्यक्षाय श्रीमतीगान्धीमहाभागा कृषकनेतुः **श्रीबलरामजाखड़**—महोदयस्याभिधानं प्रास्तावीत्। श्रीजाखड़-महानुभावश्च सर्वसम्मत्या लोकसभाया अध्यक्षपदाय निर्वाचितः। श्रीबलराम-जाखड़-महोदयः काङ्ग्रेस(इ०)दलेन फिरोजपुर-निर्वाचनक्षेत्रतो लोकसभायै निर्वाचित आसीत्। जनताशासनस्य काले स महाभागः पञ्जाब-प्रदेशे विपक्षदलस्य विधानसभायां नेताऽवर्तिष्ट। पूर्वं शार्करिलायां तथाल्पोदनवत्यां भूमावत्यधिकं परिश्रम्य द्राक्षा-जम्बीरादीनामुत्तमेनोत्पादनेन कीर्तिमानं संस्थाप्य च श्रीबलरामजाखड़-महानुभावो भारत-सर्वकारेण 'कृषि-पण्डित' इत्युपाधिनाऽपि सम्मानित आसीत्।

सत्ताया अधिग्रहणानन्तरं श्रीमतीन्दिरागान्धी राष्ट्राय प्रथमं सन्देशं प्रसारयन्त्यचकथद् यद्—"अहं स्वदेशमात्मनिर्भरं शक्तिशालिनमात्मविश्वासिनं च विधातुमभिलषामि तथा निश्चितमेवेदं कस्याप्येकस्य जनस्य कार्यं न विद्यते। अस्मिन् देशस्य सर्वेषां वर्गाणां जनानां सहयोगोऽपेक्षते। किञ्च लोकतन्त्रं केवलं बहुमताय नास्ति तद् देशस्य सर्वेभ्यो जनेभ्यो वर्तते। देशस्य विकासः सर्वेषां सहयोगेन मैत्रीभावेन च सम्भाव्यते। अस्माभिर्जनतायाः समक्षं यानि वचनानि दत्तानि सन्ति तानि निश्चितेन रूपेण वयं पूरयिष्यामः।"

श्रीमतीन्दिरागान्धी निश्चितरूपेणेदं जानाति स्म यत्—

वचनं हि कदापि कुत्रचिन्नहि देयं यदि तन्न पाल्यते।
अयमेव गुणोऽस्ति यो जनं, नितरां राति पदे समुन्नतिम् ॥३॥ इति।

काङ्ग्रेस (इ०) दले सत्तायामागतवत्येव विरोधि-दलानां विघटनं चरमे सीम्नि प्रयातम् '**जनता, जनता (ए-सी०), भारतीयजनतादलं, जनता (जे० पी०), काङ्ग्रेस (अर्स)-लोकदलं**'चेति बहूनि दलानि विघटनतरोरेव फलान्यभूवन्। इत्थमेव केचन पूर्वं विघटिता अपि क्रमेण काङ्ग्रेस (इ०) दले सङ्घटितुं प्रवृत्ताः। श्रीहेमवतीनन्दनबहुगुणा-महोदयोऽपि काङ्ग्रेस (इ०) तो विभज्य '**लोकतान्त्रिक-समाजवादिमञ्च**'मस्थापयत्। श्रीचौधरीचरणसिंहस्य सङ्कीर्णतया श्रीचन्द्रजीत-यादवेन लोकदलान्निःसृत्य '**लोकतान्त्रिक-लोकदलं**' सङ्घटितम्। अस्य विघटनस्य मूले तेषां वैचारिका मतभेदास्तथा स्वार्थपरताश्चेत्येव कारणतां प्राप्ता आसन्।

१९८० ई० वर्षस्य निर्वाचनानन्तरं विश्वस्य राजनीतिके क्षेत्रे देशस्य महती प्रतिष्ठाऽवर्धत। सर्वेभ्यो भागेभ्यः श्रीमतीगान्धीमहाभागामभिनन्दयन्तः सन्देशा आगच्छन् येषु सा 'प्रमुखा राजनीतिज्ञा, राजनेत्री, व्यक्तित्व-विवेकाभ्यां सम्पन्ना,

सुदृढा नेत्री'त्यादि-सम्बोधनैः सम्मानिता। सर्वेऽपि समाजवादि-देशानां राजनयिकाः स्वयमुपस्थाय भारतीयराजनयिकैः सह सम्मिल्य श्रीमत्या इन्दिरागान्धी-महाभागाया विजये प्रसन्नतां प्राचीकटन्। एतेन सहैवान्येषां दलानां सांसदेषु विधायकेषु च काङ्ग्रेस (इ०) दले प्रवेशाय प्रतिस्पर्धेवाजायत। सर्वप्रथमं कर्नाटकेषु काङ्ग्रेस (अर्स)स्य विधायका महत्या सङ्ख्याया काङ्ग्रेस (इ०)दले मिलिताः। ततो महाराष्ट्रस्य हरियाणाराज्यस्य च विभिन्न-दलानां नेतारोऽपि तथैवाकार्षुः। किमधिकं, सर्वेषां राज्यानां प्रगतिशीलाः सांसदा विधायकाश्चोपेत्य श्रीमत्या इन्दिरा-गान्धीमहाभागाया ध्वजस्याध एकीभवितुं प्रवृत्ताः। अयमासीदपरो विजयस्तस्या महीयस्याः। यतः—

यत्रास्ति सत्यं शुचिता विवेको, न्यायः स्वदेशाय समर्पणं च।
निःस्वार्थभावेन तदाश्रितव्यं, दलं तदेवास्ति हितं च पथ्यम् ॥४॥

यद्यपि विरोधिनां कूट-प्रवृत्त्या १८ जनवरी १९८० ई० दिवस एव—असमराज्यं महतान्दोलनेनोग्रतयाऽऽक्रान्तमभूत्। तत्र सेनाऽप्याकारिता। आन्दोलनानि तु लोकतन्त्रे प्रवर्तन्त एव, किन्तु यदा तानि हिंसात्मकानि रूपाणि प्राप्यन्ते तदा राष्ट्रस्य महती हानिर्भवति। राष्ट्रियाणां सम्पदां विनाशादार्थिकः सङ्कट उद्भवति। तत एव च कराणां भारो वर्धते। एतत् सर्वं विचिन्त्य श्रीमतीन्दिरामहाभागाऽऽन्दोलनकर्तृभिर्नेतृभिः सह शान्तिपूर्वकं वार्तालाप-माध्यमेन तेषां समस्याः समाधातुं तानाह्वयत्। किन्तु तस्याः सर्वेऽपि प्रयासा वैफल्यं प्राप्ताः। कारणं च तस्यासीद् वैदेशिकैः षड्यन्त्रकारिभिस्तेषां प्रोत्साहनं विपक्षदलैरान्दोलनकारिणां तादृशे पथि प्रवर्तनं तथा राजनीतिक-स्वार्थवतामारोपारोपणं च। पञ्जाबराज्येऽपि तादृश्येव स्थितिरवर्तत। तत्रापि सेनाया आकारणमावश्यकमभूत्। वस्तुतो विपक्षाणामिदं कार्यं श्रीमत्या गान्धीमहाभागायाश्चिन्तने राष्ट्रिय-विषयाणां राष्ट्रियप्रगतीनां कार्येषु या दृष्टिरासीत् ततः पराकृत्य व्यर्थेषु विवादेषु प्रवर्तनमासीत्। असमस्थाश्छात्रा आन्दोलनं स्वाधीनं विधाय विदेशिजनानां राज्यान्निस्सारणस्योद्देश्यं बलवदकुर्वन्। तैश्च तादृशाः प्रस्तावा उपस्थापिता ये स्वीकार्या नाभवन्। एवं सत्यपि सा महाभागा निरतं प्रयतते स्म यत् कथमपि समाधानं भवेत्।

या सर्वदा शान्तिमपेक्षमाणा, सर्वस्य सौख्यं भुवि चेष्टते स्म।
कस्मान्न तद्-राज्यगताः समस्याः, पूर्णाः समाधातुमथो न वाञ्छेत् ॥५॥
स्वयं गता साऽसम-राजधान्यां, व्यधाच्च वार्तामपि सन्धिरूपाम्।
परं न साफल्यमवापि तत्र, हठाग्रहात् तत्कृत-याचनासु ॥६॥

श्रीमत्या इन्दिरागान्धीमहाभागायाः प्रयासेन काङ्ग्रेस (इ०)-दलं न केवलं केन्द्र एवापितु भारतस्य प्रतिराज्यं लोकम्पृणतां भजते स्म। तत एव मणिपुर-गोवा-

पाण्डिचेरी-अरुणाचल-प्रदेशेषु विधानसभानां छन्दांकलनानि सम्पन्नानि तेषु गोवां विहाय सर्वत्र काङ्ग्रेस (इ०) दलमेव विजयमलभत। १९८० ई० वर्षस्य जूनमासेऽप्युत्तरप्रदेश-मध्यप्रदेश-गुजरात-पंजाब-महाराष्ट्र-उड़ीसादि-नवराज्येषु विधानसभानां छन्दाकलनेष्वपि कांग्रेस (इ) दलेनैव बहुमतं प्राप्तम्। तमिलनाडु-प्रदेशे च तस्या एव दलस्य सहयोगेनाखिलभारतीय-अन्नाद्रमुक-दलेन विजय आसादितः।

भारतस्य पुनः शासनभारग्रहणानन्तरं श्रीमतीन्दिरामहाभागा मुख्यत्वेनार्थिकं स्वरूपं व्यवस्थापयितुं तथा पूर्वं प्रवृत्तानां राजनीतिकदुरवस्थानां कारणाद् राष्ट्रियेऽन्ताराष्ट्रियेषु च क्षेत्रेषु ह्रसीयसीं प्रतिष्ठां पुनरुन्नमयितुं परिश्राम्यति स्म। तदैव २३ जून १९८० ई० दिने श्रीमत्यामिन्दिरायामाकस्मिको वज्रपातोऽभूत् तस्याः **साहसी वीरः पुत्रः श्रीसञ्जय एकस्यां विमान-दुर्घटनायां दिवमगच्छत्।** श्रीसञ्जयगान्धिनो दारुणं देहावसानं केवलमिन्दिरा-महाभागाया एव दुःखदं नासीदपि तु तस्याभावेन भारतस्य जनताया अपि हृदयानि भृशं विकम्पितानि। श्रीसञ्जयः स्वदेशस्य प्रतिभावान् पुत्र आसीत्। देशस्तस्मान्महत्य आशा धारयति स्म। इममाघातं श्रीमतीन्दिरा स्वकीये हृदये तथैवासहत यथा ह्येका महीयसी माता स्वदेशाय जीविता बलिदानं चादात्, किञ्च देशस्य तथा विश्वस्य सङ्ख्यातीतान् पुत्रानात्मनः पुत्रान् मत्वाऽथ च स्वीयानां पूज्यानां पितामहानां पितृचरणानां स्वस्याः पतिमहाभागानां च निधन-कालेषु विवेकः परिचायितस्तथैव तदानीमप्यश्रूणि पीत्वा तया स्वस्या महनीयतायाः परिचयो दत्तः।

'सङ्कटैः सह सङ्घर्षः, पारम्पर्येण योऽमिलत्।
तमेव चिन्तयन्ती सा, हृदि पीडां न्यलीयत॥७॥
मातुर्ममत्वे राष्ट्रस्य, प्रेम्णाऽऽप्तो विजयस्तदा।
राष्ट्रपीडास्वात्मपीडां, निलीय च पुरोऽचलत्॥८॥

श्रीमतीन्दिरागान्धी तदानीं प्राय इदमेव वाञ्छति स्म यत्— पूर्ववर्तिनि निर्वाचनेऽस्माभिर्यानि कार्याणि पूरयितुं प्रतिज्ञातानि सङ्कल्पितानि च तेषां पूर्तये समर्पितया भावनया सर्वात्मना यतितव्यमिति। तया काग्रेसस्य विजयोत्तरं तालकटोराऽभिध उद्याने समायोजिते प्रथमेऽधिवेशनेऽपि सदस्याः सबलं निवेदिताः सङ्कल्पानां संसिद्धये। तत्रैवाधिवेशने सोवियत-रूसदेशो भारतस्य सर्वतः शुभं मित्रं प्रतिपादितः परं समापन-व्याख्याने तयेदमपि स्पष्टीकृतं यद् "इदं नास्त्यावश्यकं यत् कस्यापि मित्रस्य प्रत्येकं कथनं स्वीकुर्यामैव किञ्च सत्यमिदं विद्यते यत् कोऽप्यस्मान् प्रभावयितुं न शक्नोति।"

तस्मिन्नेव वर्षे सोवियतसङ्घस्य सर्वोच्चसोवियताध्यक्ष-मण्डलाध्यक्षाः **श्री एल० आई० ब्रेझनेव-महोदया** मैत्री-सद्भावना-यात्रार्थं भारतं समायाताः। तेषां यात्रया नैकेषां सहयोगानां मैत्र्याश्च सुदृढत्व-प्रदायकेषु महत्त्वपूर्णेषु सन्धिपत्रेषु

हस्ताक्षराणि सञ्जातानि। यत्र सांस्कृतिकार्थिकोद्यौगिक-व्यापारिकादि-विषयेषु मुख्यत्येनोभयोर्देशयोर्जनगणं प्रति परम्परागताया मित्रताया गत्यात्मकेन विकासेन सहैशियामहाद्वीपे शान्तेः स्थिरतायाश्च विषया आसन्। १९८२ ई० वर्षे नव-देहल्यामायोजितं 'समूहनिरपेक्ष'-देशानां विदेशमन्त्रिणां सम्मेलनमपि प्रामाणयद् यद् भारतं मैत्रीपूर्णेषु मानवीयसम्बन्धेषु विश्वसिति तथाऽन्ताराष्ट्रियशान्तये सामाजिकन्यायाय सुरक्षायै तथाऽऽर्थिकसमुन्नतये प्रयत्नशीलानां च प्रशंसकमस्ति। स्वयं भारतमपि तथाविधे समूहनिरपेक्ष आन्दोलने महत्त्वपूर्णां भूमिकां निर्वोढुं च वाञ्छति। यतः —

अन्ताराष्ट्रिय-मञ्चकेषु विततांऽशान्तिर्निराशा तथाऽ—
सूया शस्त्रसमृद्धिराणविकजास्त्राणां भयं वैरिता।
साम्राज्योपनिवेशवाद-भेद-भरित-स्पर्धाऽपहाराय वा,
सङ्घानां निरपेक्षतैव जयति प्रीतेः सदा वर्धिनी ॥९॥

१९८१ वर्षस्य १६ फरवरीदिने 'बोट क्लब'स्थाने देशस्य लक्षशः कृषकाः श्रीमत्यामिन्दिरागान्धी-महाभागायां स्वीयाः सुदृढा आस्था व्यञ्जयितुं समवेताः। दूरदूराद् विभिन्नेषु यानेषु स्थिताः पदातयश्च ते भूयोभूय उच्चैरिममाघोषमुच्चरन्ति स्म—'किसानों के करोड़ों हाथ—इन्दिराजी के साथ' इति। तत्र १२३ मितानां रैलयानानां तैलयानानां तथा ३५ सहस्रातिरिक्तवाहनानामुपयोगस्तेभ्यो विहित आसीदित्येव तेषामुपस्थितेः प्रमाणायालम्।

कृषकान् सम्बोधयन्ती सा महाभागा षष्ठ्याः पाञ्चवार्षिकयोजनायाः प्रसङ्गेनावोचद् यदस्यां योजनायां व्ययं प्राप्स्यतः समग्रस्य धनस्य पञ्चविंशति-मितोंऽशो ग्रामाणां विकासाय व्ययीकरिष्यते। अनुसूचितजातीनां जनजातीन्नाञ्च प्रगतये तथा कल्याणायास्यां योजनायां सप्तति-कोट्युत्तर-दशार्बुद-रूप्यकाणां व्यय-व्यवस्था विहिताऽस्ति। तथाऽन्ते स्वस्याः समर्थनाय देशस्य विभिन्न-भागेभ्य उपागतानामनुरागदार्ढ्यं वीक्ष्य परमां भावुकतां प्राप्योदकथयच्च—**"कृषकाणामात्मकल्याणाय यद्यस्माकं रक्तस्याप्यावश्यकता स्यात्तदा वयं भवतां क्षेत्राण्यपि स्वीयेन रक्तेन सेचयितुं सन्नद्धाः स्मः।"**

श्रीमतीन्दिरा गान्धी भारते यावती लोकप्रियाऽवर्तत तावत्येव विदेशेष्वपि लोकप्रियाऽभवत् कारणं च तस्येदमभूद् यत् सा स्वीयानि मित्राणि कदापि नो व्यस्मार्षीत् पूर्वं स्थिरीकृतानां लक्ष्याणां भ्रंशनस्य स्थितिमात्मन्युत्पत्तये चावसरं नादात्। अत एव सा १९२७ ई० वर्षस्य नवम्बरमासे पं० जवाहरलालनेहरूभिः सम्पादितां भारत-रूसयोर्मैत्रीं सुदृढामकरोत्। साम्राज्यवादानुवंशवाद-सामन्त-व्यवस्थावादानां विरुद्धं सङ्घर्षयन्तौ देशाविमौ निरन्तरं प्रगतिमन्तौ भवन्तौ शान्तये

सहास्तित्वाय च मैत्रीभावनां विकासयतः स्म। श्रीमती गान्धी तथ्यमिदं सर्वथा जानाति स्म यद् देशस्य शान्तये सुखाय च प्रतिवेशिदेशैः सह मधुरः सम्बन्ध आवश्यकः। तत एव सा भारतस्य यात्रार्थमागतवतां चीनदेशस्य विदेशमन्त्रिणां **श्री हुआंग हुआ**-महोदयानां प्राक्तनीं कटुतां विस्मृत्य हार्दिकं स्वागतं व्यदधात्। दशकद्वयतोऽधिकात् कालात् प्रवृत्तं सीमविवादं समाधातुं द्वावपि सुखदे वातावरणे व्यचारयताम्। उभावपि पारस्परिकेण सौहार्देन समस्यानां च समाधानाय निरचिन्वताम्।

१९८० ई० वर्षे समस्तस्य जगत इस्लामधर्मानुयायिनो यदा पैगम्बर-मुहम्मदमहाभागानां हिजरी-महोत्सवमायोजयितुं प्रवृत्ता आसन्, तदा श्रीमतीन्दिरा गान्धीमहाभागायाः प्रेरणया सहयोगेन च भारतेऽपि पूर्णयाऽऽस्थया श्रद्धया च सह हिजरीमहोत्सवा आयोजिताः। स्वयं स माहाभागाऽपि तेषु सममिलत्। ३ नवम्बर १९८० ई० दिने पञ्चदश्याः शत्याः प्रारम्भावसरे सा पत्र-प्रैष-त्रिकटं प्रसारयन्त्यवोचद् यत्—"पैगम्बर-इस्लाम-हजरतमोहम्मदमहोदयानां शिक्षासु लोकतान्त्रिकभावनायाः समानतायाः प्रेम्णः सुखस्य शान्तेस्तथा स्वकीयं साहाय्यं स्वेन विधातव्यमितिविषयस्य ये सन्देशा विद्यन्ते तेषु जनेभ्यः क्रान्तिकारिप्रतिवेदनं निहितमस्ति। वयं भारते महोत्सवमिममस्मात् कारणान्मानयामो यदस्माकं मिश्रितायाः परिपूर्णायास्तथा विविधवर्णवत्याः संस्कृतेर्विकास इस्लामेनापि विभिन्नरूपेण भागो गृहीतः। अस्मभ्यमियं गर्वस्य वार्ताऽस्ति यद् भारते समुत्पन्नेभ्यो महद्भ्यो धर्मेभ्योऽतिरिक्तमयं देशः संसारस्य महतां धर्माणामपि प्रशंसकोऽस्तीति।"

१९८० ई० वर्षस्य निर्वाचनानन्तरं श्रीमत्यै गान्धीमहाभागायै प्राप्ताया लोकप्रियतायाः परिणतिवशाद् १९८१ तमवर्षस्य षष्ठे मासे सम्पन्नेषूपनिर्वाचनेषु काङ्ग्रेस (इ०) दलेनाभूतपूर्वो विजयः प्राप्तः। 'अमेठी' तो लोकसभाया निर्वाचने काङ्ग्रेस (इ०) दलस्य प्रत्याशित्वेन **श्रीराजीवगान्धी** (वर्तमानः प्रधानमन्त्री) प्रतिशतं चतुरशीतिमितानि मतान्यवाप्य नवीनं कीर्तिमानमस्थापयत्। तदानीमेव तद्दलेनान्यान्यपि चत्वारि स्थानानि लोकसभायै जितानि।

संसारस्य सर्वासु दिक्षु वसतां मानवीय-समस्यानां सर्वेऽपि देशाः सम्भूय समाधानं कुर्युरिति दृष्टेः समर्थिका शान्तौ सहयोगे च दृढं विश्वस्ता श्रीमतीगान्धी परैर्देशैः सह घनिष्ठां मैत्रीं सम्पादयितुं निरन्तरं प्रयतमाना व्यराजत। अत एवाक्टूबरमासे रोमानियादेशस्य राष्ट्रपतिभिः समायोजिते स्वकीये सम्मानभोजे साऽवादीत्—"अद्य वयं तादृशे विश्वे वसामो यत्र सर्वेऽपि परस्परं निर्भरा भवन्ति तस्मादेवास्माभिः सर्वैर्देशैस्सह तेषां राजनीतिकानां वैचारिकाणाञ्च स्वरूपेभ्यो महत्त्वदानं विना मैत्र्या हस्तोऽग्रे वर्धितः।" तत्रैव सैवमपि प्रत्यपादयत्—

सुरक्षा न शस्त्रैर्न चास्त्रैः कदाचित् क्षितौ साधु सम्भावितास्तीति सत्यम्।
मिथो बोधनेनात्मनः शोधनेन, स्वतः प्राप्यते सा विना योधनेन॥

अक्तूबरमासस्य प्रथमे सप्ताहे **'राष्ट्र-मण्डल-शिखर-सम्मेलनं'**—**'मेलबोर्न'** (आस्ट्रेलिया) नगरे समायोज्यत। तत्र श्रीमतीगान्धीमहाभागा भारतस्य प्रतिनिधित्वं निरवहत्। तत्रैव सम्मेलनेन **'नामीबिया'** देशस्य स्वातन्त्र्याय **'अफगानिस्तान-कम्पूचिया-हिन्दमहासागर'**-सम्बद्धानां प्रश्नानां विषये कैश्चित् समूहनिरपेक्ष-देशैस्तथा भारतेन स्वीकृतस्य मार्गस्य समर्थनमक्रियत। इत्थमेव **फिलिस्तीनस्य** जनताया अधिकाराणां पुष्टिस्तथा तद्विषये सम्पाद्यमानासु वार्तासु **'फिलिस्तीनी-मुक्ति-सङ्गठन'**स्य नेतॄणां सम्मेलनस्याप्याग्रहो व्यधीयत। सम्मेलने श्रीमतीन्दिरा-गान्धी स्वीयेषूद्देश्येषु सुस्थिरा भूत्वा पत्रकारवार्तास्वपि स्वीयां विदेशनीतिं यथोचितं प्रस्थाप्य सम्मेलनं विसृज्य बहिः स्थितानां स्थितिमपि व्याञ्जयत्। ततः परं नवम्बरमासे शान्ति सहयोगं सद्भावञ्च वर्धयितुम् **'इटली-फ्रान्स-बुल्गारिया'**-देशानां यात्रा अकार्षीत्। तत्र गत्वा च सा तत्रत्यैः प्रधानैः सह चर्चां विधाय तानपि विश्वशान्तये शस्त्रास्त्रसङ्ग्रहणस्पर्धा-विरुद्धमगवमय्य विश्वशान्तये प्रैरयत्। तया यात्रया च साऽमेरिकाया राष्ट्रपतेः श्रीरीगनमहोदयस्य यूरोपे वर्धमानं प्रभावमवरोद्धुमद्भुतं साफल्यमवाप्नोत्। तथा च ६ जून, १९८२ ई० दिनात् प्रारब्धे त्रिदिवसीये सप्तप्रमुखधनिकदेशानां **'वर्साई-(फ्रान्स)** स्थले सम्पन्ने सम्मेलन आशजनकाः परिणामा निःसृताः। सर्वेऽप्यैकमत्येन विश्ववार्ताया आरम्भाय सहमता अभूवन्।

सति पथि हितमत्या लोककल्याण-काङ्क्षा—
वति विगतभया ये वर्धयन्ते पुरस्तात्।
सति महति विरोधेऽप्यत्र सत्यानुरोधे,
नहि भवति तदीया निष्फला वाग्विभूतिः ॥११॥

एतस्यैव मध्यवर्तिनि काले मईमासे भारतस्य विभिन्नेषु भागेषु सप्त संसदीयानि निर्वाचनानि संवृत्तानि तेषु काङ्ग्रेस (इ०) दलेन त्रीणि स्थानानि जितानि। देशे वर्धमानैर्भ्रष्टाचारानुशासनहीनता-क्षेत्रीयवाद-जातिवाद-प्रभृति-भयैः सङ्घर्षं कुर्वती श्रीमती गान्धी स्वीयं दलं प्रति समर्थनस्य शैथिल्येन मनाक् चिन्तावत्यजायत। चतुर्षु प्रदेशेषु सम्पन्नेषु विधानसभानां निर्वाचनेष्वपि काङ्ग्रेस (इ०) दलं कुत्रापि स्पष्टं बहुमतं प्राप्य सर्वकारं स्थापयितुं नाशक्नोत्। पश्चिमबङ्गप्रदेशे तु वामपथानुयायिनां दलमेवात्यधिकं बहुमत मवाप्यविजयं प्राप्नोत्। एतदतिरिक्तं हरियाणा-प्रदेशे काङ्ग्रेस (इ०) दलस्य सर्वकारनिर्मितये सिद्धान्तहीनतया सह दल-परिवर्तनादीन्यपि तां व्यथयन्ति स्मैव। वस्तुतो राजनीतिरेका तादृशी महानदी वर्तते यस्यां यतस्तत आगता नद्यः सम्मिल्य स्वस्व-स्वभावानुसारं तरङ्गानुत्तालयन्ति, मालिन्यानि मेलयन्ति सति समयेऽनुचितमुचितं वा विदधति, तैरसामयिका उत्फाला उत्पद्यन्ते विलीयन्ते च।

राजनीतौ प्रावीण्यं भजन्ती श्रीमती गान्धी ततो विचलिता न भूत्वा सत्तायां

पुनरागमनस्य प्रायो वर्षद्वयानन्तरं स्व-प्रवर्तितान् विंशति-सूत्रीयान् कार्यक्रमान् भूयोऽपि नवीनेन रूपेण परिष्कृत्य सर्वकारीय-तन्त्राय तेषु दाढ्र्येन कार्यान्वियनाया-दिशत्। सा हि तान् कार्यक्रमान् सफलयितुं जनतां दलस्य कार्यकर्तॄन् नेतृजनांश्चा-प्याह्वयत्। देशस्य प्रगत्या सन्नद्धा आपातकाले प्रारब्धा विंशसूत्रीयाः कार्यक्रमा ये पुरा कियदंशेन पूर्णा आसँस्तेष्वेवाशिष्टेष्वन्यान् परमावश्यकान् नूतनान् कार्य-क्रमान् सा १४ जनवरी १९८२ दिनेऽघोषयत्। यतो हि देशस्याधिकांशा जना ग्रामे वसन्ति तथाऽयं देशः कृषिप्रधानोऽस्त्यत एव प्रारम्भान्नव कार्यक्रमा मुख्यत्वेन ग्रामाणां ग्राम्याणां कृषकाणां कृष्युत्पादानां समृद्धय एव प्रवर्त्तिता आसन्। शिष्टेषु शिक्षा-स्वास्थ्य-राजस्वसम्पन्नता-जनोत्थान-नगर - विकास - परिवार-कल्याणादि-विषयकाः कार्यक्रमा अवर्तन्त।

विश्वस्य प्रथितेषु राष्ट्रेषु भारतं प्रतिष्ठापयितुमपि सा नित्यशश्चिन्तयति स्म। तया तस्मिन्नेव वर्षे **एशियास्थ-देशानां क्रीडोत्सवो**ऽपि समायोजितः। भारत-भूमिं द्रष्टुकामा अनेके विदेशवासिनस्तन्माध्यमेनात्रोपेत्य स्वातन्त्र्योत्तरं समेध-मानानां तान्त्रिक-यान्त्रिक-वैज्ञानिक-प्रगतीनां निरीक्षणेन सन्तुष्टा अभूवन्। यद्यपि बहवो जनास्तादृशमुत्सवं तदानीमनावश्यकं मन्वते स्म, परं सा महाभागा देशस्य प्रगतये तमावश्यकं मत्वा समपादयदेव।

सर्वधर्म-समभावं धारयन्ती सैकदाऽकथयत्—"वयं तु-इस्लामधर्मं भारतीयं धर्ममेव मन्महे। मुस्लिम-शासकैर्यानि राज्यानि स्थापितानि तानि भारतीयानि राज्यानि तथा शासनान्येवाभवन्। तानि भारतस्य विविधवर्णमयस्य जीवनस्य संस्कृतेश्चाङ्गान्यासन्। वस्तुतस्तेषां प्रभुत्वेन तथोज्ज्वलशासनमस्तिष्कवद्भिः शासकै-र्भारतस्य भिन्न-भिन्नानां संस्कृतीनां तुरी-वेमभ्यामतीव महान् भागो गृहीतः।"

ततः परमगस्तमासस्य नवमे दिने विभिन्नेषु केन्द्रीयमन्त्रालयसचिवेषु परिवर्तनं विहितम्। तेष्वेव दिनेष्वफ्रीकीयेषु देशेषु सा यात्रामप्यकरोत्। २६ नवम्बर १९८१ ई० दिने च—'अकालीदलनेतृभिः श्रीमत्या गान्धीमहाभागया वार्ता कृता तथाऽऽत्मसंयमेन वर्तनायतैः प्रतिज्ञातम्।

अन्ताराष्ट्रिय-शान्ति-प्रयासेभ्यः श्रीमती गान्धीमहाभागा २ अगस्त १९८२ ई० दिने 'ऊथान्त-पुरस्कारेण' सम्मानिता तथा—९ सितम्बर १९८२ ई० दिने श्रीशेख अब्दुल्लामहोदयस्य निधनेन सा श्रीनगरं गता। २२ अक्टूबर-दिने च केन्द्रस्याकालीदलस्य च मध्ये साक्षाद्वार्ताया भूमिकानिर्माणाय प्रधानमन्त्रिणो विशेष-प्रतिनिधित्वेन सरदारस्वर्णसिंहमहोदयोऽकालीदलनेतॄनमिलत्। ३० अक्टूबर-दिने च पाकिस्तानस्य राष्ट्रपतये पत्रं विलिख्य बेगम-नुसरत-भुट्टो-महाभागाया मुक्तयेच तथाऽनुरुद्धम्।

न विस्मरति कर्तव्यं यत्र कुत्रापि संस्थितः।
स एव निरतं श्लाघ्यो महत्ता तस्य राजते॥११॥

सहयोगस्य मैत्र्याश्च भावनया प्रेरिता श्रीमती गान्धीमहाभागा २३ मार्च १९८२ ई० दिने ब्रिटेनस्य षड्दिवसानां राजकीय-यात्रार्थं प्रस्थिता। लन्दननगरे सा भव्येन स्वागतेन सम्मानिता। तत्रैव सा भारतसमारोहस्योद्घाटनमप्यकरोत्। तस्मिन् समारोहे विभिन्नक्षेत्रेषु भारतेन विधीयमानानां प्रगतीनां प्रदर्शन्योऽप्यायोजिता आसन्। उद्घाटनसमारोहे ब्रिटिश-प्रधानमन्त्री श्रीमती मार्गरेट थैचर-महोदया, श्रीमतीन्दिरागान्धीमहाभागाया ज्येष्ठा पुत्रवधूः श्रीमती सोनियागान्धी, युवराजश्चार्ल्स महानुभावस्तथा भारतसमारोहस्याध्यक्षः श्रीमाइकेलवाकरमहोदयः समारोहस्य परामर्शदात्र्याः समितेरध्यक्षा श्रीमती पुपुल-जयकरमहाभागा चोपस्थिता आसन्।

विश्वशान्तये मानवतायै च निरन्तरं विधीयमानानां प्रयत्नानां कारणात् १७ जून १९८२ ई० दिनेऽमेरिकाया **'अन्ताराष्ट्रिय-हिमालय-योग-विज्ञान-दर्शन-शास्त्र-संस्थानेन'** श्रीमती-इन्दिरागान्धीमहाभागा 'शान्ति-दूत'-पुरस्कारेण सम्मानिता। पुरस्कारेण सहैव समर्पिते प्रशस्ति-पत्रे समुल्लिखितमासीद् यत्—"श्रीमती-गान्धी-महाभागया मानवतायै विहिताः प्रयासा वर्तमानेभ्यो भविष्यद्भ्यश्च पुरातन-नवीनयोः सम्मिश्रणात्मकयोगदानस्य श्लाघनीयं कार्यं सम्पादयन्ति सम्पादयिष्यन्ति च।"

१९८३ ई० वर्षस्य जनवरीमासान्ते **श्रीविश्वनाथप्रतापसिंहः** केन्द्रीय-मन्त्रि-मण्डले मेलितः किञ्च **श्रीबूटासिंह**महानुभावऽपि केन्द्रीयमन्त्रिस्तरस्य मन्त्रित्वेन सम्मानितः। ११ फरवरी-दिने भूयोऽपि मन्त्रिमण्डले परिवर्तनं कृतम्। १७ मार्च १९८३ दिवसे **सप्तम-सङ्घ-निरपेक्षदेशानां सम्मेलनं** भारते प्रारब्धम्। तस्मिन्नेकोत्तरशतमिता देशाः सहभागिनोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागा तस्य नवीनाऽध्यक्षा निर्वाचिता। तादृशेन महता सम्मानेन तां सभाजयित्वा सर्वेऽपि देशा भारतेन स्वीकृताया नीतेः समर्थनेन सहैव श्रीमतीं गान्धी-महाभागां तादृशकर्मसम्पादन-दक्षामिव मत्वैवाध्यक्षत्वेनाभूषयन्। २५ मार्च दिने—**'अन्ताराष्ट्रिय-क्रीडा-समिते'**रध्यक्षेण श्रीमतीगान्धी विश्वक्रीडा-स्वर्णपदकेनालङ्कृता। १५ अगस्तदिने राष्ट्रस्य नाम्ना स्वीयान् विचारान् प्रसारयन्त्या तयोक्तमासीद्—"कदाचिद् दास्यशृङ्खलासु निगडितो दीनः शोषितस्तथा क्षीणो मन्यमानोऽस्माकमयं देशः साम्प्रतं गर्वेण शिर उन्नमयितुं शक्नोति। अद्य तदीया उपलब्धयो विलोक्यन्ताम्, तासु काश्चन त्वतीव महत्यः सन्ति।" तस्मिन्नेव भाषणे सा महाभागा राष्ट्रियैकतायां ध्यानमाकर्षयन्ती न्यगादीत्—'यदि वयं स्वाधीनता-सङ्ग्रामात् किमपि शिक्षणं ग्रहीष्यामस्तदा प्राप्स्यामो यत् केवलमेकताया अनुशासनस्य च बलादेवास्माभिः साफल्यमवाप्तम्। अद्य वयं पश्यामो यत् समाजस्य केचन वर्गाः केचन जना ज्ञानेन किं वाऽज्ञानेन समु-

दायस्य नाम्ना धर्ममेव क्षीणं कुर्वते । इदमस्माकं दौर्बल्यं विद्यते ।

समस्तेऽपि जगत्यार्थिक्यै समानतायै तथा मानवसेवायै प्रयस्यन्त्याः श्रीमतीगान्धीमहाभागायाः सर्वत्र समादरोऽवर्धत । २७ सितम्बर १९८३ ई० दिने देहल्यां श्रीमत्या गान्धीमहाभागाया आध्यक्ष्ये राष्ट्रमण्डलस्य शासनाध्यक्षाणां सम्मेलनं तथा नवम्बरमासे ब्रिटेनमहाराज्ञ्या आध्यक्ष्ये राष्ट्रमण्डलीय-देश-प्रमुखानां सम्मेलनमायोजिते अभूताम् । अनेकेषां राष्ट्राणामधिपतयस्तदानीं भारतस्य प्रगतिं विलोक्य सन्तुष्टा अभवन्नकथयँश्च—'भारताय विभिन्नेभ्यः स्रोतोभ्य उपलभ्यमानानां साहाय्यानामत्र समुचित उपयोगः क्रियत'इति । तदानीमेव सर्वेऽपि राष्ट्रप्रमुखाः श्रीमत्या गान्धीमहाभागायास्तथा भारतस्य प्रयासानप्यश्लाघयन् ।

आत्मानं शुचि-विषयेषु योजयित्वा,
सङ्कल्पान् जनसुखदाँश्च कल्पयित्वा ।
सन्मार्गेऽनवरतमत्र ये चलन्ति,
श्लाघ्यास्ते सकलजनैर्न किं भवन्ति ? ॥१२॥

६ अक्टूबरदिने पंजाबराज्ये राष्ट्रपतिशासनं घोषितम् । ततः परं एव १२ दिसम्बरं यावत् सर्वप्रथमं 'सङ्घ-निरपेक्ष-मीडिया-कान्फ्रेन्स'स्याध्यक्षं श्रीमती गान्धी निरवहत् । २९ दिसम्बरदिने चाखिलभारतीयकाङ्ग्रेससमितेः सप्तसप्ततितममधिवेशनं कलकत्तामहानगर्यां सम्पन्नम् । एवं सत्यपि—

दुर्वृत्तिमन्तो निजलाभतुष्टाः, परापकाराय कृतप्रयत्नाः ।
किमप्यकार्यं विदधत्यजस्रं, हिताहितं चैव न चिन्तयन्ति ॥१३॥

इति किंवदन्त्यनुसारं सन् १९८० ई० वर्षे सत्तायामागमनात् परं श्रीमतीन्दिरागान्धीमहाभागैकया नवीनया समस्यया सङ्घर्षं करोति स्म । कारणं तस्येदमासीद् यज्जनतादलस्य विघटनात् परं राष्ट्रियेण स्तरेण तदीयकाङ्ग्रेसदलस्य साम्यं भजतः कस्याप्यन्यस्य दलस्याभावाद् विघटिता नेतारो यथेच्छं क्षेत्रीयाणां भावनानां तथा क्षुद्रप्रायाणां समस्यानामाश्रयेण नेतृत्वं स्थिरयितुं प्रयत्नवन्तोऽजायन्त । तत एव क्षेत्रीयाणि दलान्यप्युद्भूतानि । असम-त्रिपुरा-नागालैण्ड-पूर्व-सीमस्थराज्यादिषु यानि क्षेत्रीयाण्यान्दोलनानि चलन्ति स्म तैस्सहैवान्ध्रप्रदेशे प्रान्तीयभाषयोराधारेण प्रान्तेभ्यो विशिष्या स्वायत्तता-प्रापणाय 'तेलगूदेशम्'—नामकस्य दलस्य जन्माभूत् । तन्माध्यमेन विपक्षस्यान्ये नेतारोऽपि तस्मिन् संयुक्ताः । सर्वेषामपि तत्रेन्दिराशासनस्योच्छेदनमेवान्तर्निहितमासीत् । तत्र वस्तुतो राजनीतिकेन विद्वेषेण दुर्भावनायास्तथा प्रवर्तिताया दुर्वृत्तेः कारणाद् भविष्यति काले देशस्य खण्डनेन तेषु केचन स्वल्पाय कालाय प्रशासनमधिकारं नेतृत्वं वा प्राप्स्याम इत्येषैव तुच्छा भावना बलवत्यभूत् ।

पञ्जाबराज्येऽपि तादृश्येव भावना स्वातन्त्र्यप्राप्ति-कालादेव मूलं प्राप्ताऽऽसीत् । तस्य राज्यस्य समस्याः क्रमशो बलवत्तरा बलवत्तमाश्च भवितुं प्रवृत्ताः ।

'पञ्जाब-भूभाग एकः स्वतन्त्रो देशः **'खालिस्तान'**-नाम्ना भारतात् पृथक् स्थाप्येत' —इयं याचना भारतादप्यधिकमुन्नततयाऽमेरिका-इङ्ग्लैण्ड-कनाडा-पश्चिम-जर्मन-पाकिस्तान-भूभागेषु विशिष्योत्थापिता। एकमुग्रवादि दलमेव सङ्घटितम्। तस्य समर्थकाः मुष्टिमेया जनाः पंजाबस्थाया जनतायाः शान्तिं विखण्डच जनहिंसाम-कुर्वन्। खालिस्तान-विरोधिनां प्रमुखनेतृवराणां—येषु स्वयमिन्दिरा महाभागा तदीयाः पारिवारिका अपि सम्मिलिता आसन्—हिंसनसूचीं निर्माय यथायथं वधोऽपि प्रारब्धः। यथा तथा जनेष्वातङ्कोत्पादनं स्वविरुद्धमाचरतां हिंसनमान्दोलन-चालनाय लुण्ठनं धनार्जनं सर्वकारसम्पदो हानञ्चेति बहुभिरुद्देश्यैः प्रेरिता आतङ्कवादिनो निर्दयं क्रूराणि कर्माण्यवर्धयन्। ते हि भारतस्य लोकतन्त्र-समाज-वाद-धर्मनिरपेक्षता-मूलकान् सिद्धान्तान् सर्वथा खण्डयितुमप्यचेष्टन्त। पंजाब-समस्यानां प्रस्थापनाय १९७३ ई० वर्षे तथा १९७८ ई० वर्षे चाकालीदलस्य क्रमश आनन्दपुरसाहबस्थले तथा लुधियानानगरे यत् सम्मेलनद्वयमभूत् तत्र याः समस्या उत्थापिता आसँस्तासु भूयस्यस्तु केन्द्रेण स्वीकृताः किन्तु तैरधियाचितेषु सङ्कल्पेषु—'केन्द्रशासनस्य केवलं रक्षायां, विदेशविषयेषु, मुद्रायान्तथा सामान्यसञ्चारस्य विषयेष्वेव हस्तरूपस्याधिकारो भवेदि'त्यात्मकः सङ्कल्पो न स्वीकृतो यतो ह्ययं मूलसंविधानाद् विपरीतोऽखण्डतादृष्टचा च घातक आसीत्।

१६ अक्टूबर १९८१ ई० वर्षात् १५ फरवरी १९८४ ई० पर्यन्तं प्राय-स्त्रयोविंशतिवारं पंजाबसमस्यानां समाधानाय श्रीमतीन्दिरागान्धी महाभागा-ऽकालीदलस्य नेतृभिः सह वार्ता अकार्षीत् किन्तु किमपि समाधानं नाभूत्। २ जून १९८४ ई० दिने राष्ट्रस्य नाम्ना प्रसारिते स्वीये सन्देशे श्रीमतीन्दिरागान्धी स्पष्टमेवाकथयत्—"अकालिनां सर्वा अप्युचिता याचनाः स्वीकर्तुं शासनं सन्नद्ध-मासीत्। इन्दिरायाः समक्षं केवलं पञ्जाब एव तु नास्ति यतोऽकालिदलीयाः कथये-युर्यत्—पश्चिमोत्तरप्रदेशं दिल्लीञ्चापि पञ्जाबराज्ये मेलयतु तदा तथा क्रियेत। अतो योग्यायोग्ययोर्विवेकस्तु कर्तव्य एव।" इति।

पञ्जाबराज्यस्य तदानीन्तनी रक्तरञ्जिता गाथाऽतीव प्रदीर्घा विद्यते। श्रीमत्या इन्दिराया विषये विहिता आरोपाः सुबहूनां नेतृणां पत्रकाराणां धार्मिकाणां सतां सामाजिक-कार्यकर्तॄणां हत्यास्तथाऽनेकार्बुदमुद्रामूल्यानां सम्पदां विनाशास्तत्र दैवदुर्विपाकं घृणां शोकञ्चोद्भावयन्ति। एतेषां सर्वेषामातङ्कानां केन्द्रममृतसरस्य गुरुद्वारं तथा सञ्चालकः सन्तजनरैलसिंहभिंडरावालाऽभूत्। तदानीञ्च—

देशे विदेशेषु च हन्त ! हत्या लुण्टाकवृत्तिर्जनताभिघाताः।
सम्पद्विनाशाः प्रसृतास्तदानीं सर्वत्र साम्राज्यमभूच्च भीतेः॥१४॥

तदैव तादृशीं दुःस्थितिं बीक्ष्य श्रीमती गान्धी स्वर्णमन्दिरे सेना-प्रवेशस्य घोषणामकरोत्। तस्या घोषणायाः पूर्वं २० मार्च १९८१ ई० दिनादारभ्य ३ जून

१९८४ ई० पर्यन्तं प्रायः १२५० हिंसापूर्णा घटनाः, ४५० हत्याः, १२५५ जनानामाहतयः कृता आसन्। बेंकानां यानानां गुटिकास्त्राणां भुशुण्डीनां बलाल्लुण्ठनान्यपि बहुशोऽभूवन्। श्रीमतीन्दिरागान्धीमहाभागा तदापि संयमेन व्यवस्थां विदधती सर्वस्या अपि सैनिककार्यवाहिन्या उत्तरदायित्वं **प्रधानसेनाध्यक्षश्रीरणजीतसिंहदयालस्य** हस्तेऽदात् तथा परिसरस्यान्तर्वर्ति-सैनिक-कार्यस्य दायित्वं **मेजर जनरल बराड़**-महाभागायार्पयत्। सहैव मुख्यत्वेन सैनिका मुख्यमन्दिरं हरमिन्दरसाहबस्थानं प्रति च विस्फोटकास्त्रादिक्षेपणाय निषिद्धा आसन्। तस्यां सर्वस्यामपि प्रक्रियायां विविधाधिकारि-सहिता ८३ सैनिकाः, ४९३ असैनिका आतङ्कवादिनश्च मृतास्तथा प्रायः ८६ जना आहताः। तत्रैव २८० सैनिका अप्याहताः। आसीदेतेष्वेव मुख्य आतङ्कवादसञ्चालकः श्रीभिंडरावालाऽपि। स्वर्णमन्दिरे सैनिक-प्रयोगानन्तरं तत्परिसरादेव प्रायः ३० लक्षमिता प्रत्यक्षमुद्रा उपलब्धाः। ४१ मशीनगन ९७ स्टेनगन ३०३ राईफलनामकान्यस्त्राण्यपि प्राप्तानि। अन्येषां शस्त्रास्त्राणां सूची तु ततोऽपि विस्तृताऽभूत्।

एक वारं पुनर्देशस्याखण्डतायै विहितोऽयं सुदृढः प्रयासः सर्वैरश्लाध्यत। विपक्षनेतारोऽपि प्रायः समर्थनमेवाकार्षुः।

समग्रो देशोऽयं वसतु सुखितः शान्तिसहितो,
न कस्याप्येकस्य प्रचरतु यथेच्छं विलसितम्।
तदेतद् दार्ढ्येन स्थिरयितुमकार्षीदिह तदा,
महामात्या मान्या समुचितधियैक्याय सकलम्॥१५॥
यथा यथा च यद्यच्च शासनेन कृतं तदा।
तत्सर्वं श्वेतपत्रेण प्रकाश्य विहितं स्फुटम्॥१६॥

आतङ्कवादस्य दुरन्तगाथा कं राष्ट्रभक्तं व्यथितं न कुर्यात्।
अंशोऽपि यस्याः श्रुतिमूलमेतो दुःखाकरोति प्रसभं हि चित्तम्॥१७॥

सर्वा अपि पंजाबक्षेत्रे विशेषतोऽमृतसरस्थ-स्वर्णमन्दिरे तादृश्यः प्रक्रियाः श्रीमतीन्दिरागान्धीमहाभागा देशस्य संरक्षायै जनतायाः सुरक्षायै लोकतन्त्रस्य स्थिरत्वाय भारतस्याखण्डताया अकरोत्। ततः शनैः शनैः पुनरपि देशस्य प्रगतये ध्यानमदात्। तेष्वेव दिवसेषु सत्यामावश्यकतायां केन्द्रीये मन्त्रिमण्डलेऽपि सामान्यं परिवर्तनमकरोत्। २५ सितम्बर १९८४ ई० दिने दक्षिणपूर्वेशियावर्ति-देशानां स्वास्थ्य-मन्त्रिसम्मेलनं श्रीमतीगान्धी समबोधयत् तस्मिन्नेव दिने च सा स्वर्णमन्दिरात् सेनां व्यावर्तयितुं स्वीयं सन्देशं प्रासारयत्। २८ सितम्बरदिने बिहारासमयोरागतयोर्जलोपप्लवयोर्वायवीयं सर्वेक्षणं वायुयानेनाकरोत्। ७-८-९-अक्तूबरदिनेषु राजस्थान-महाराष्ट्रयोर्यात्रां व्यधात्। १० अक्तूबरदिवसे बौद्धानां तथा राष्ट्रियसंस्कृतीनामन्ताराष्ट्रियपरिषदमुदघाटयत्। १६ तो ३० अक्तूबर-

दिवसेषु सा महाभागा तमिलनाडु-बिहारोत्तरप्रदेश-मध्यप्रदेश-जम्मू-काश्मीरोड़ीसा-प्रदेशानां प्रवासान् विधाय तत्रत्यां स्थितिं समस्याश्चावगत्य कर्तव्यानि सन्दिश्य जनताः सम्बोध्य चात्मानं देशसेवाविधयाऽतोषयत्। १६ अक्तूबर १९८४ ई० दिने श्रीमतीमिन्दिरागान्धी-महाभागां मिलितुं यदा बहाई-सम्प्रदायस्य सदस्यास्तदीयं कार्यालयमुपागतास्तदा सा महाभागा विकृतिं गच्छन्त्या अन्ताराष्ट्रियस्थितेर्विषये स्वीयां चिन्तां प्राकटयत् सहैव च मानव-कल्याणस्याभिलाषं व्यञ्जयन्ती विश्वे व्याप्ताया विद्वेषभावनाया न्यूनत्वापादन-विषयेऽपि बलमदात्। सा हि राष्ट्रियै-कतायादाढर्यायापि विचारानभिव्यज्य दलीयभावनाभ्य ऊर्ध्वमुत्थाय सद्भावना-पूर्णस्य वातावरणस्य मार्गप्रशस्त्यै समभावयत्। ईरानदेशे बहाईसम्प्रदायवत्सु विधीयमानैरत्याचारैरुत्पीडनैश्च सा विरुद्धाऽवर्तत। यदा सा महाभागा—आस्ट्रेलियादेशस्य यात्रायां सिडनीनगरस्थं बहाई-मन्दिरं द्रष्टुमगच्छत् तदा तस्य सौन्दर्यमाध्यात्मिकं वातावरणञ्चापि प्राशंसत। दक्षिणदेहल्यां निर्मीयमाणस्य बहाई-मन्दिरस्य पूर्तेरनन्तरं तस्य दर्शनमपि तया काङ्क्षितमासीत्।

३० अक्टूबर १९८४ ई० दिने भुवनेश्वरस्य विशालायां जनसभायां श्रीमत्या इन्दिरागान्धीमहाभागाया अन्तिमं सार्वजनिकं भाषणमभूत्। तस्मिन् भाषणे प्रकृत्यैव प्रेरिता सा महाभागा 'राष्ट्रियभावना:, प्रत्येकं जनस्योत्तरदायित्वं, लोकतन्त्रं, समाजवादः, सन्तुलितो विकासो भारत-हितचिन्तनं, विपक्षस्यासहयोगो निराधारा आक्षेपाः, स्वतन्त्रताया अविभाज्यत्वं' चातीव प्रबलया वाण्या विमृश्यान्तेऽकथयत्—

"नाहं चिन्तिताऽस्मि यदहं जीवेयं वा न वा। परं मम समग्रं जीवनं देश-सेवायां व्यतीतं तस्मिन् गौरवमनुभवामि किञ्च यावच्छ्वासश्चलिष्यति तावद् देशसेवामेव करिष्ये। यदि चाहं स्वदेशस्य सेवां कुर्वती मरणमपि गच्छेयं तदाऽहं तस्मिन् गर्वमावहिष्यामि। अहं विश्वसिमि यन्मम रक्तस्य प्रत्येकं बिन्दुरस्य देशस्य विकासे योगदानं करिष्यति, एनं सुदृढं गतिशीलं च विधास्यतीति।"

स्वर्णमन्दिरे विहिताया आतङ्कवादिनां निःसारण-प्रक्रियाया अनन्तरं प्रधान-मन्त्रि-श्रीमत्या इन्दिरागान्धी-महाभागाया जीवनं सङ्कटापन्नमस्तीति चर्चा प्रायोऽक्रियत। तादृशे समये तस्याः सुरक्षार्थं नियुक्तानां सिखकर्मचारिणां परिवर्त-नाय प्रस्तावः कृत आसीत् परं तया तन्न स्वीकृतम्। देश-विदेशभ्यः आयान्तीनां हत्यासम्बद्ध-सूचनानामनन्तरमपि सा महाभागा सुरक्षाकर्मचारिषु विश्वासम-करोत्। किन्तु ३१ अक्तूबर १९८४ ई० बुधवासरे प्रातः प्रायः सपादनववादनसमये तस्याः सुरक्षार्थं नियुक्ताभ्यां द्वाभ्यां सिखसुरक्षाकर्मचारिभ्यां सा महाभागा गुटिकाप्रहारैः निःशेषतां प्रापिता।

श्रीमतीन्दिरागान्धी प्रत्येकं दिनमिव बुधवासरमपि प्रारभत। नासीत् तदा कोऽपीदृशः सङ्केतो यत् तद् दिनं समस्ताय देशाय तमःपूर्णं दिनं भविष्यतीति।

तस्मिन् दिवसे शरदः सामान्यं शैत्यमवर्तत किन्तु कोऽप्येवं नाजानाद् यत् कतिचित् क्षणानन्तरं समग्रं वातावरणमेव परिवर्तितं भविष्यति ? सा प्रातः सप्तवादनकाले स्वीयं सहायकं **श्री आर० के० धवन**-महानुभावमकथयत्—'अद्यतनः सर्वोऽपि कार्यक्रमो निरसनीयः। उड़ीसाप्रदेशस्य द्विदिवसीयया यात्रया सा श्रान्ताऽस्तीति।' तदनुसारं सर्वे कार्यक्रमाः प्रायेण निरस्ताः परम् आयरलैण्डस्य दूरदर्शनदलेन सह साक्षात्काराय श्रीधवनस्तस्यावश्यकतां निवेद्य स्वीकृतिं प्राप्नोत्।

सा महाभागा प्रातराशं विधाय पौत्र-पौत्रीभ्यां मिलिता कुशलं च पृष्टवती। सज्जादिकं कारयित्वा च पञ्चक्षणोत्तरं नववादनसमये स्वावासस्थानात् (क्र० १) सफदरजंगमार्गतो बहिरायाता तथा २ अकबरमार्ग—यत्र तदीयः कार्यालयोऽवर्तत, प्रति गन्तुं प्रवृत्ता। तदानीं तया सह विदेशमन्त्रालयस्य नीतिनिर्धारणसमितेरध्यक्षः श्री जी० पार्थसारथिस्तदीयः सूचनापरामर्शदाता श्री एच० वाई० शारदाप्रसाद-श्चावर्तताम्। तस्मिन्नेव समये त्रय आरक्षि-सुरक्षाकर्मचारिणः समक्षमायाताः। श्रीमतीन्दिरा स्वभावानुसारं नमस्त इत्यवोचत् तेऽपि हस्तान् संयोज्य नमनमकुर्वन्। तदैव तेष्वेकेन नमनेन सहैव गुटिकास्त्रद्वारा गुटिकावर्षणं प्रारब्धं सा चीत्कृत्य तत्रैव निपतिता। तदैव द्वितीयोऽपि द्रुतगुटिकावर्षकेणास्त्रेण गुटिका अचालयत्।

तयोः प्रथम आसीदारक्ष्युपनिरीक्षको **बेअन्तसिंह**स्तथाऽपर आरक्षी **सतवन्त-सिंहः**। रक्षकावेव भक्षकौ संवृत्तौ। कोटि-कोटि-जनानां माता प्राणैर्वियोजिता। या च प्रकाशभित्तिस्तदानीं यावदखिलान् प्रकाशते स्म सा सहसा गुटिकावर्षणै-र्ध्वंसिता !!!

धर्मान्धताजन्यविकार-पुष्टैर्वैदेशिकैश्चापि हतावबोधैः।
नुन्नो जिघांसुः सहसैव हन्त ! व्याधोऽवधीद् भारत-राजहंसीम् ॥१८॥
अन्यश्च भूमौ पतितां पुनस्तां, प्राणैर्वियुक्तामपि शङ्कितः सन्।
दुष्टः स्वकीयास्त्रज-गोलिकाभिर्व्यधाद् वधायोद्यममाशु हन्त ! ॥१९॥

☐ तेजस्तेजसि हन्त ! विलीनम्

क्रूरस्यास्य काण्डस्यानुपदमेव तावात्मसमर्पणमकुरुतां तदा श्रीमतीगान्धी-महाभागायाः सुरक्षार्थं नियुक्तं कमाण्डो-दलं घटनास्थलमुपेतं तथा द्वयोरपि घात-कयोर्हस्तौ बद्ध्वा १ अकबरमार्ग—स्थित आरक्ष्यागारे तावानीतौ। तत्रारक्षिणा गुटिकाप्रहारो विहितस्तेन गुटिकानां विंशत्याऽऽहतो बेअन्तसिंहस्तु तत्रैव मृतः परं सतवन्तसिंहोऽष्टभिर्गुटिकाभिराहतः सन्नपि जीवितोऽतिष्ठत् तस्मात् स उपचाराय राममनोहरलोहिया-चिकित्सालये प्रेषितः।

तदैवः श्रीमतीन्दिरागान्धीमहाभागां प्रवहद्-रक्तलिप्तसर्वाङ्गीं शीघ्र-मेवायुर्विज्ञानसंस्थानेऽनयन्। तदानीं तया सह श्रीधवनः श्री के० पी० माथुरस्तथा

तस्याः पुत्रवधूः श्रीमती सोनिया गान्धी चावर्तन्त। अतीव प्रयासानन्तरमपि चिकित्सकाः श्रीमतीन्दिरागान्धी-महाभागां रक्षितुं नाशक्नुवन्। तस्याः सकलमपि शरीरं गुटिकाभिश्छिद्रायितमभूत्। बहुषु मार्मिकस्थलेषु गुटिकाः प्रविष्टा आसन्। परं तस्या महाभागाया दिवं प्रयाणस्यौपचारिकी घोषणाऽपराह्णे षड्वादन-वेलातः पूर्वं भारतशासनेन नाक्रियत। यतः —

अस्माकं देशस्य राष्ट्रपतयो ज्ञानि-श्रीजैलसिंहमहाभागाः स्वदेशात् बहिर्यमननगरेऽवर्तन्त, अखिलभारतीय-काङ्ग्रेस (इ०) दलस्य महासचिवस्तथा श्रीमत्या गान्धीमहाभागाया पुत्रः श्रीराजीवगान्धी तदानीं पश्चिमबङ्गालप्रदेशेऽभूत्। गृहमन्त्रि-श्रीनरसिंहराव-महोदयाः, वित्तमन्त्रि-श्रीप्रणवमुखर्जीमहाशया रेलमन्त्रि-श्री ए० बी० ए० गनी खां महानुभावा लोकसभाध्यक्ष-श्रीबलरामजाखड़-महोदयाः प्रधानमन्त्रिणां मुख्यसचिवाः पी० सी० एलैक्जैण्डरमहाशयाः केन्द्रियसचिवाः श्री सी० आर० कृष्णास्वामिमहानुभावाश्च तदानीं देहलीतो बहिरासन्।

श्रीमत्या-इन्दिरागान्धी-महाभागायाः पार्थिवदेहस्य प्रायः पञ्चाशद्गजदूरवर्तिनि स्थले तस्या उत्तराधिकारि-निर्णयाय काङ्ग्रेस (इ०) नेतॄणामुपवेशनमारब्धम्। तावन्तं कालं यावद् राजकीय-रूपेण मृत्योर्घोषणा नाक्रियत। यद्यपि समाचार-सञ्चार-साधनैः सकलमपि विश्वं विदितप्रायमभूत् किन्तु भारतसर्वकारस्य केनापि माध्यमेन मृत्युविषयिणी सूचना न प्रकाशिता। यतो हि राष्ट्रपतीनां श्रीजैलसिंहमहाभागानां विदेशयात्रातः परावर्तनस्य प्रतीक्षाऽवर्तत। प्रायः सार्धपञ्चवादनसमये श्रीराष्ट्रपतयश्चिकित्सालयं प्राप्ताः। अवनतशिरसस्तेऽन्तः प्रविष्टाः, विंशतिक्षणानन्तरं च पुनर्बहिरायाताः। ततः प्रधानमन्त्रिण उत्तराधिकारिरूपेण श्रीराजीवगान्धिमहाभागं निर्णीय श्रीमत्या इन्दिरागान्धीमहाभागाया देहावसानसूचना विधिवत् प्रकाशिता।

तस्या मृत्योर्घोषणया सकलोऽपि देशः शोकसागरे निमग्नः। सर्वमपि स्तब्धमिव प्रत्यभात्। शोके राष्ट्रिया ध्वजा अवनामिताः। शीघ्रमेव सार्वजनिकाः कार्यक्रमा निरस्ताः।

भारतीयायुर्विज्ञान-संस्थानाद् बहिः स्थितवता जनसमूहेन यदा स्वस्याः प्रियनेत्र्या मृत्योः समाचारः श्रुतस्तदा स स्वकीयमाक्रोशमेकस्मिन् समुदायविशेषे प्रकटयितुं प्रावर्तत। फलतो न केवलं राजधान्यामेव, अपि तु भारतस्य बहुषु भागेषु हिंसायाः सम्पद्विनाशस्य ज्वलनज्वालनस्य यानादित्रोटनस्य च ताण्डव एव प्रवृत्तः। १ नवम्बरदिनं यावत् तद् भीषणं कृत्यं ताण्डवं च सर्वत्र प्रसृतम्। तदा नवीनेन **प्रधानमन्त्रिणा श्रीराजीवगान्धि-महाभागेन** तथा **गृहमन्त्रि-श्री पी०वी० नरसिंहराव-**महाभागेन शान्तय एकतायै च जनता निवेदिता। स्थाने-स्थाने सञ्चाररोधाः प्रवर्तिताः। हिंसककार्याणि कुर्वतो विलोकनेन सहैव गोलिकाभिर्मारणमादिष्टम्। इत्थं जनता कथञ्चिदपि शान्ताऽभूत्। एवमेव नानाविधा अपसमाचारा अपि

प्रासरन् तानपि सत्यप्रसारणेन शासनमशातयत्।

इष्टं विशिष्टं प्रसमीक्ष्य नष्टं, स्पष्टं जना धैर्यमिह त्यजन्ति।
प्रायः समापन्न-विपत्तिकाले, धियोऽपि पुंसां मलिना भवन्ति ॥१९॥

राष्ट्रेण द्वादश दिनानां शोको मानितः। देशस्य विभिन्नप्रान्तानां राज्यपाला मुख्यसचिवा राजधानीमागन्तुं प्रवृत्ताः तस्या महाभागायाः पार्थिवं शरीरं दर्शनाय 'तीन-मूर्ति-भवने' स्थापितम्। तद् भवनं तस्याः पितुः श्रीजवाहरलालनेहरूमहोदयस्य शासकीयं निवासस्थानमभूत्। सत्यपि शैत्याधिक्ये १ नवम्बरदिने प्रातरारभ्य स्वस्याः प्रियनेत्र्या अन्तिमदर्शनाय स्त्रियः पुरुषाः बालकाश्च त्रि-मूर्तिभवनमागन्तुं प्रारभन्त। विलपन्तो दर्शनार्थिनोऽसहाया इव शून्ये विलोकयन्तः प्रातीयन्त। अश्रुपूरितनेत्राः प्रकम्पितैर्हस्तैः पुष्पमालाः समर्प्य स्वीयान् हार्दिकान् श्रद्धाञ्जलीनर्पयन्ति स्म।

यस्या असीम-करुणामृतवर्षणेन दीना हीनाः फलन्ति स्म, पुष्यान्ति स्म तथाऽऽत्मविश्वासेन सुरभिता भवन्ति स्म तेऽप्यद्यानाथा इवात्मानमनुभवन्त श्रद्धावनता नयनैरैव नयनैः किमपि किमपि जल्पन्तोऽश्रूणि मुञ्चन्ति स्म। विश्वस्य महतां नेतॄणां राजनेतॄणां तथाऽन्येषां जननेतॄणां समवेदना-सन्देशा आगच्छन्। यतः —

आत्मीयस्य जनस्य हन्त ! सहसा श्रुत्वा स्वकीयैः कृतां,
हत्यां को व्यथते न शोक-विधुतः कार्तघ्न्यभावान्वितः ?।
तत्रापि प्रतिमानवं निजपरीवारोद्भवं निश्छलं,
प्रीत्याऽमन्यत याऽथ तां दिवमितां स्मृत्वा न पीड्येत कः ? ॥ २१॥

३ नवम्बर १९८४ ई० दिने श्रीमत्या इन्दिरागान्धी-महाभागायाः पार्थिव-शरीरस्यान्त्येष्टिः शान्तिवन-राजघट्टयोर्मध्यवर्तिनि स्थलेऽक्रियत। तस्या अन्तिम-यात्रायां देशस्य लक्षशो मानवानामतिरिक्तं शताधिकदेशानां नेतारो राजनयिकाः प्रतिनिधि-मण्डलानि च सहभागमगृह्णन्। प्रायोऽपराह्णस्य चतुर्वादनकाले स्वीयेन व्याकुलितेन चेतसा वाष्पाकुलितैर्नेत्रैश्च देशस्य जनतयाऽऽत्मनोऽतिप्रीता मान्या नेत्री वह्नये समर्पिता। वैदिकमन्त्रोच्चारणेन सह स्व० श्रीमतीइन्दिरागान्धीमहाभागायाः पुत्रस्तथा भारतस्य प्रधानमन्त्री श्रीराजीवगान्धी परमेण भाराक्रान्तेन हृदयेन तस्याश्चितां प्राज्वालयत्। राष्ट्रपति-प्रभृतिभिः परिक्रम्यान्तिमः श्रद्धाञ्जलिरर्पितः। धार्मिकमन्त्रपाठैः सह चिताऽपि ज्वालामालाभिर्व्याप्ताऽभूत्। श्रीराजीव-गान्धिद्वारा ४-४५ समये कपाल-क्रिया-सम्पादनान्तरं तस्या महीयस्या महाप्रयाणं पूर्णतामितम्।

अन्त्येष्टि-स्थलस्य समन्ततो जन-सागरस्तरङ्गित आसीत् तन्मध्ये च स्वीयेन परिवारेण सहोपस्थित आसीत् सजलनयनः श्रीराजीवगान्धी। दूरे पश्चिमायां दिशि पीतवर्णोऽशुमाली निस्तेजा भवति स्म। तेन सहैवान्तिमां दिशं प्रत्येको युगः सङ्कुचति स्म च। पञ्चवादन-समये श्रीराजीवगान्धी मातुश्चिताया अन्तिमं प्रणाममर्पयित्वा पत्नीं श्रीमतीं सोनियागान्धीमहाभागां पुत्रीं प्रियङ्कां पुत्रं राहुलं भ्रातृव्यं वरुणं

च नीत्वा परावर्तत।

तृतीये दिवसे प्रातः सार्धषड्वादन-समये श्रीराजीवगान्धी दिवङ्गताया मातुः पार्थिवावशेषरूपाण्यस्थिपुष्पाण्यवचेतुमन्त्येष्टिस्थलं गतः। मन्त्रोच्चारणेन सह चितास्थले दुग्धं मधु च विकीर्य चत्वारिंशत्-ताम्रकलशेष्वस्थिपुष्पाणि सङ्गृहीतानि। ते कलशाः शोभायात्रया त्रिमूर्तिभवनमानीता जनताया दर्शनाय च 'अमलतास-पादपस्य' परितः स्थापिताः। सर्वैः पारिवारिकैस्तथा राष्ट्रपति-प्रभृतिभिर्माल्यार्पणं विहितम्। ततः परं त्रीनस्थिकलशान् तत्रैव संरक्ष्य शेषा विभिन्नराज्यानां राजधानीषु केन्द्रशासित-प्रदेशेषु च देशस्य जनताया दर्शनाय श्रद्धाञ्जलि-समर्पणाय प्रेषिताः। नवम्बरमासस्य दशमीं तिथिं यावत् सर्वेऽपि कलशाः पुनस्त्रिमूर्तिभवनमानीताः।

विश्वस्य सर्वतो महतो लोकतन्त्रस्य स्व० प्रधानमन्त्रि-श्रीमतीन्दिरागान्धीमहाभागाया हार्दिकोऽभिलाष आसीद्यत् तस्या अस्थ्यवशेषा हिमालयस्य हिमाच्छादितेषु शिखरेषु विकीर्येरन्। श्रीराजीवगान्धिमहाभागस्तमभिलाषं पूरयितुं व्योमयानेन सपरिवारमस्थ्यवशेषान् नीत्वा प्रायः षड्विंशतिसहस्र-फुटमितोन्नतमुड्डीय हिमालयस्य हिमाच्छन्नेषु शुभ्रशिखरेषु सश्रद्धं विसर्जितवान्। कश्चिदस्थ्यवशेषो गङ्गावतर-यमुनावतरतीर्थयोर्मध्ये गोमुखतीर्थे तथा काश्मीरस्य भगवतोऽमरनाथस्य तीर्थेऽपि विसर्जितः। इत्थं श्रीमत्या इन्दिरागान्धीमहाभागायाः पाञ्चभौतिकं शरीरं पञ्चतत्त्वेषु मिलितम्। **तेजो लीनं च तेजसि।**

☐ मृत्यु-पत्र-विषयिणी वार्ता

श्रीमती-इन्दिरागान्धी **'मृत्यु-पत्र'** स्वरूपेण कमपि हस्तलेखं विलिख्य नात्यजत् परंमृत्योरनन्तरं (क्रमाङ्क १ सफदरजंगमार्गे)तदीय-प्रकोष्ठस्थे लेखपीठे तस्याः स्वहस्तेन लिखितपत्राणां त्रीणि पृष्ठानि लब्धानि, यानि वयं श्रीमत्या इन्दिरागान्धी-महाभागाया मृत्यु-पत्रमन्तिमं पत्रं वा कथयितुं शक्नुमः। इदं स्पष्टमस्ति यत् स्वर्गीया प्रधानमन्त्रि-पदे विराजमाना तत्रभवती किमप्यन्यदपि लिखितुं वाञ्छति स्म, यतो हि तेषां त्रयाणां पृष्ठानामन्ते तया हस्ताक्षराणि न कृतानि। कश्चन दिनाङ्कोऽपि नाङ्कितः। स्फुटमस्ति यन्मृत्योः कियतश्चित् कालात् पूर्वं तया सर्वं लिखितमासीत्, यतस्तानि त्रीण्यपि पृष्ठानि तदीये लेखपीठ एव स्थितान्यभूवन्।

श्रीमतीन्दिरागान्धी-महाभागा स्वीयेऽवसान-पत्रेऽन्यत् किं लिखितुमिच्छति स्मेति तु केवलमनुमानस्यैवास्ति विषयः, किन्तु सा त्रिषु पृष्ठेषु स्वहस्तेन यल्लिखितवती तेन ततः पूर्वकालिक्यास्तस्या मनःस्थितेः पूर्णं ज्ञानं भवति। तस्या विश्वास आसीद् यत् तदीयस्य घातस्य षड्यन्त्रं रच्यते। तया लिखितम्—**"यदि मम हिंसापूर्णं मरणं भवेद्, यथा हि केचन जना भीताः सन्ति तथा स्वल्पा जना षड्यन्त्रं विदधति, तदाऽहं वेद्मि यदियं हिंसा घातकस्य विचारे कर्मणि च भविष्यति। मम मृत्यौ नैव।"**

अग्रिमाः पङ्क्तय इन्दिरागान्धी-महाभागायाः सम्पूर्णं चरित्रं द्योतयन्ति। यथा—"**यतो हि काचिदपि घृणा नास्तीयती कृष्णा, या देशं तथा जनतां प्रति ममानुरागस्य विस्तारमाच्छादयितुं प्रभवेत्। काऽपि शक्तिरियती दृढा न विद्यते या मां स्वलक्ष्यात् तथा देशमिमं पुरो वर्धयितुं विधीयमानेभ्यः प्रयत्नेभ्यो विमुखीं कर्तुं शक्नुयात्।**"

आम्, इदं शतप्रतिशतं सत्यमस्ति यद् भारतस्यैकताया अखण्डतायाश्च विनिमये ते खण्डयित्वा केनापि सह सन्धये सा कदापि सन्नद्धा नाभवत्। राष्ट्रः हितानां बलिदानापेक्षया साः स्वीयानां प्राणानामेव बलिमार्पयत्। इन्दिरा-सदृश्य-नुभवपूर्णा कल्पनाशीला दूरदर्शिनी राष्ट्रनेत्री देशे बहिश्च यत् किञ्चिद् भवति स्म तं ज्ञातुं न पारयेदिति सम्भवं नासीत्। भारते राजनीतिकीमस्थिरतामुत्पाद-यितुं तदीया हत्यायाः षड्यन्त्राणि रच्यन्त इति सा जानाति स्म। इदं तु सा भूयोभूयोऽकथयद् यद् बाह्या देशस्यान्तःस्थाश्च शक्तयो भारतं निर्बलं विधातुं चेष्टन्ते। सा चेदमपि समसूचयद् यद् भारतस्य पश्चिमसीमभ्यो भूयोऽपि भयमुत्पन्नमस्ति। परं सार्वजनिकरूपेणेदं कदापि तया नोक्तमासीद् यत् तस्या हत्यायाः केचन जनाः कूटकृत्यं विदधतीति। परं तस्या मृत्योरनन्तरं यो मृत्युलेखः प्राप्तस्तेन स्पष्टं भवति यत् सा हत्यायाः षड्यन्त्रविषये जानाति स्म।

श्रीमती-गान्धी-महाभागा केवलं महती राष्ट्रवादिनी नेत्रीत्वमण्डितैव नावर्तत, परं तस्यामद्भुतः साहसोऽप्यासीद् या आत्मबलिदानादपि पृष्ठपदा नाभूत्। तया यदपि लिखितमभूत् तत् प्रमाणीकृत्यापि दर्शितम्। काऽपि शक्तिस्तां स्वीयेभ्य उद्देशेभ्यः पृथक् कर्तुं नाशक्नोत्।

तत्रभवत्या इन्दिरागान्धी-महाभागया जीवनदानं स्वीकृतमासीत् परं राष्ट्रहितानां विनिमयेन सह केनापि सन्धि-विधानं स्वीकृतं नासीत्।

□ विकसितं सौगन्धिकं सहस्रदलं पद्मम्

आजन्मोर्जितमात्मगौरवमयं कर्मात्र सम्पादितं,
विस्मृत्यात्म-सुखानि यच्च निरतं राष्ट्रस्य सेवां व्यवधात्।
ऐक्यं शान्तिरथोन्नतिः प्रगतिरप्येकान्ततः काङ्क्षिता,
तत्सद्गन्धयुतं सहस्रदलभृत् पद्मं व्यराजत् क्षितौ॥२१॥

आसीत् सर्वतो मनोरमं श्रीमत्या इन्दिरागान्धीमहाभागाया जीवमेकं 'सौग-न्धिकं सहस्रदलंपद्मम्'। प्रतिपत्रं काञ्चनापूर्वां शोभां धारयत् तत् पद्मं दर्शन-मात्रेण हृदयं प्रसादयति स्म। तद् दृष्ट्वा नयने कर्पूरवर्तिकयाऽञ्जिते इव शान्ति मनुभवतः स्म। कर्णौ च तद्गुण-गणाकर्णनेन तृप्तौ भवतः स्म। तस्य पद्मस्य प्रभा तिरयति स्म लोकानामान्तरं तमः। तत् पद्मं नेहरूपरिवारस्य प्रसन्न-सलिले गुण-गम्भीरस्वच्छे सरसि राष्ट्रिय-भावनात्मकैरुन्नतैरंशुमालिनः किरणैर्विकसितं सेवा-

मकरन्दामोदितं निरन्तरं विकसदेव व्यराजत ।

श्रीमतीन्दिरा गान्धी निःसंशयमात्मनः कर्तृत्वसौरभेण देशे विदेशे च सर्वैरपि सम्मान्याऽभवत् । साऽवर्ततैका साहससम्पन्नाऽसाधारण-प्रतिभावती धीरा वीरा च । समाजवादस्य सा पक्षधराऽऽसीत् । स्वदेशमपि सा तस्मिन्नेव मार्गे नेतुं वाञ्छति स्म । दृढसङ्कल्पं सूक्ष्मां दृष्टिञ्च धारयन्ती श्रीमतीन्दिरागान्धी-महाभागा न केवलं देशस्यैका नेत्र्यैवावर्तत परं गभीरा राजनीतिज्ञा कूटनीतिज्ञाऽप्यासीत् । भारतसदृशस्य विशालस्य देशस्य—यत्र बहूनां धर्माणां बह्वीनां जातीनां नैकेषां सम्प्रदायानां मानवा वसन्ति, तस्य— लोकतान्त्रिकपद्धत्या प्रशासनमेकं महत् कार्य-मपि सा सर्वात्मना निरवहत् ।

कैशोरे वयसि वर्तमाने लोकतन्त्रे भारतवासिनः पूर्णरूपेण विकसिता अपि नाभवन् । समाजे प्रवर्तमानाऽसमानतैकतो दीनानामुटजेषु परतश्च धनिनां प्रासादेषु स्पष्टं दृष्टिगोचरीभवति स्म । अभावानां पूर्तये यतमाना अपि प्रशासकाः प्रकृत्याः कोपेन बाह्येनक्रमणेनान्तरिकेण साम्प्रदायिकेनाथ च राजनीतिकेन कलहेन कुण्ठिता नियति-लुण्ठिता इवेच्छन्तोऽपि तावत् साफल्यमवाप्तुं क्षमा नादृश्यन्त । सङ्कटानां समस्यानां च सत्यपि बाहुल्ये निष्ठया साहसेन तथा सूक्ष्मचिन्तनेन निराचिकीर्षुः श्रीमतीगान्धीमहाभागा विश्वमैत्रीं शान्तिं प्रगतिञ्चाभिलक्ष्य कर्तव्ये पथि द्रुतया गत्याऽवर्धत ।

श्रीजवाहरलालनेहरोः श्रीलालबहादुरशास्त्रिणश्च प्रधानमन्त्रित्वकाले लोकतन्त्रस्य याऽऽधारशिला न्यास्यत तस्या दृढत्वाय तदुपरि भव्यस्य भवनस्य निर्माणाय श्रीमतीगान्धी देशं नवीनां दिशं प्रत्यनयत् । राष्ट्रेण सहैकाकारतां प्राप्ता सा महाभागा जनमानसेषु **'इन्दिरैव भारतं भारतमेवेन्दिरा'**-सदृशीं स्थितिमपि प्राप्नोत् । तदासीत् तस्या एव कौशलस्यामृतं फलम् । यद्यपि संसदीये लोकतन्त्रे प्रधानमन्त्रिणः शक्तिषु संविधान-संसद्-दल-लोकमतानां नियन्त्रणं भवति तथापि तस्य सूक्ष्मं परिज्ञानमेव सर्वत्र मुखरं मन्यते । भारते विभिन्नाः प्रधानमन्त्रिणो विभिन्नेन रूपेण भारतीयं लोकतन्त्रं प्राशासत किन्तु श्रीमतीन्दिरागान्धी स्वीये कार्यविधौ समन्वयं समानतां शान्तिमेकतामखण्डतां प्रगतिं विश्वमैत्रीं च सम्भावयन्ती प्राथम्येन तेषु तेषु विषयेषु देशं नेतुं प्रायतत ।

श्रीमत्या इन्दिरागान्धीमहाभागाया राजनीतिक जीवनस्य सूक्ष्माध्ययनेन प्रतीयते यद् वस्तुतस्तस्या महत्सु कार्येषु भारतीयमनीषिणां तत्त्वज्ञानस्य सम्यक् प्रभाव आसीत् । सा महाभागा पारम्परिक्या आध्यात्मिकताया पश्चिमस्य यथार्थवादेन समन्वयं वाञ्छति स्म । स्वतन्त्रभारतस्य विकसितासु राजनीतिकविचारधारासु तया गभीरेण चिन्तनेन नवनवाः प्रयोगा अपि समादृताः । तस्या दृष्टौ **"लोकतन्त्रं तदेवासीद् यत्रावश्यकेन प्रतिबन्धेन सहवैयक्तिक-स्वाधीनताया उत्तर-**

दायित्वं स्यात्।" सा प्रजातन्त्रात्मिकां पद्धतिं वाञ्छन्ती व्यक्तेरेव मुख्यं महत्त्वममन्यत। अत एव सा राज्यस्य वैधानिकेषु तथा प्रशासनिकेषु कार्येषु वैयक्तिकतयाः स्वाधीनतायास्तथा सामाजिकस्य जनहितस्योभयोर्मेलनमकरोत् तथा मध्यवर्तिनं तादृशं मार्गमन्वैषयद्, यस्मिन्नुभावपि फलेयुः पुष्प्येयुः, कस्याप्येकस्य हानं न भवेत् तथा कोऽपि दुर्बलतां न प्राप्नुयात्। सा हि लोकतन्त्र-सम्बद्धं स्वकीयं दृष्टिकोणं स्पष्टयन्त्यकथयद्—"अस्माभिर्लोकतन्त्रस्य पन्थाः स्वीकृतः। तस्य केवलमयमर्थो नास्ति यदेका लोकसभा प्रवर्तते। जना मतदानं कुर्वन्ति, तस्यां प्रतिनिधयो गच्छन्ति किं वाऽस्माकं प्रदेशेषु विधानसभाः प्रवर्तन्ते। इमानि त्वेकया दृष्ट्या साधनानि सन्ति लोकतन्त्रस्य। वास्तविकं तथ्यन्त्विदमस्ति यत् सर्वा जनता भागं गृह्णाति—समस्ता जनता, भवतु नाम सा दीना, दूरस्था वा, सा विचारयति यदस्माकं के प्रश्नाः सन्ति, कानि काठिन्यानि विद्यन्ते, कथं च तानि दूरे करणीयानि। सर्वोऽपि देशः कार्येऽनुरक्तोऽस्त्येतदेवास्ति लोकतन्त्रम्।"

भारते लोकतन्त्रं द्रढयितुं श्रीमतीगान्धीमहाभागा सार्वजनिकस्य सामाजिकोत्तरदायित्वस्य तथा समुदायिकहितस्य गौरवपूर्णां भावनां नागरिकेषु व्यकासयत्। नादवादिन्या राजनीतेर्दूरे वास्तविकीं राजनीतिं प्रवर्तयितुं सा जनतां प्रैरयत्। महात्मनः श्रीगान्धिनस्तथा श्रीजवाहरलालस्य गतिशीलाया दूरदृष्टेः प्रेरणां प्राप्य शतीभ्यः प्राचीनमार्थिकमभावं सामाजिकीं गतिहीनतां सांस्कृतिकं पतनं च तिरयितुं तथा भारतीय-जनजीवने सर्वप्रथममेकं गुणात्मकं शोधनमानेतुं प्रायस्यत्। सा हि भारतस्याखण्डताया लोकतन्त्रस्य धर्मनिरपेक्षतायाः समाजवादस्य तथा यूथनिरपेक्षतायाः सुस्पष्टरूपेण निर्धारितासु नीतिष्वाधारिताया एकस्याः सुसङ्गताया विचारधारायाः प्रतिनिधित्वमाचरत्। भारतीये जनमानसे स्वीयामास्थां प्राकटयत् तथा सति समये जनतायाः समक्षं गमनेऽपि सङ्कोचं नाकरोत्। देशस्य समक्षमुपस्थितानां समस्यानां गोपनेन सा कदापि जनसाधारणं नावञ्चयदपि तु जनसाधारणं सा सदैवात्मनः प्रेरणायाः केन्द्रबिन्दुमेवामन्यत। तस्या महाभागाया दृष्टौ **'जनताशब्दस्यार्थ'** इत्थमासीत्—

"जनताया अर्थोऽस्मभ्यं जनताया एको वर्गो नास्ति। अस्माकं तात्पर्यं सकलया जनतया विद्यते। केचन जना विचारयन्ति यत् केचन वर्गा—ये धनिनः सन्ति ते, जनतायां न सन्ति; परमन्ये ये जना विद्यन्ते तेषां समूहो जनताऽस्ति। केचन मानवा धर्मविशेषानुयायिन एव जनतां मन्वते भिन्न-भिन्नान् भेदांश्च स्वीकुर्वन्ति। परमस्मभ्यं तु भारतस्य प्रत्येकं नागरिको महत्त्वपूर्णोऽस्ति तथा प्रत्येकं महत्त्वपूर्णेन जनेन जनता भवति।" इति। वस्तुतः—

यावन्न स्याद् हृदि विशदता नैव वा कर्मनिष्ठा,
स्वार्थत्यागः प्रचुर-पटुता राजनीतौ च पुंसः।

तावत् तस्मै कथमपि निजं सर्वतः सारभूतं,
स्नेहं मन्ये भुवि न जनता प्रार्पयत्यात्मनीनम्॥ २२॥

भारतीयं विज्ञानमुन्नमयितुं श्रीमतीन्दिरागान्धी महाभागा निरन्तरं प्रायतिष्ट। यद्यपि भारते साम्प्रतिक-भारतीय-विज्ञानस्याधारशिला श्रीमता पं० जवाहरलालनेहरूमहाभागेन स्थापिताऽऽसीत्। तेषां प्रधानमन्त्रित्वकाल एकादश राष्ट्रियाः प्रयोगशालाः स्थापिताः। आणविकोर्जा-विभाग उद्घाटितस्तथा वैज्ञानिकेभ्यः कार्यसम्पादनाय सर्वैः सौविध्यैः सह स्वातन्त्र्यमदीयत तथापि विज्ञानस्य सफलतायाः शिखरं यावत्प्रापणस्य श्रेयः श्रीमत्यै गान्धीमहाभागाया एव गच्छति। सन् १९५०-५१ ई० वर्षयोर्वैज्ञानिकानुसन्धानाय सप्ततिलक्षोत्तरचतुष्कोटि-मुद्राणां व्ययोऽक्रियत। १९७६-७७ ई० वषर्योरयं राशिश्चतुःशतकोटितोऽप्यग्रे व्ययार्थं स्वीकृतः। पञ्चम्यां योजनायां विज्ञान-तान्त्रिकविध्योर्विकसाय सप्तत्युत्तर-पञ्चदशकोटिमुद्राणामनुमितो व्ययोऽभूत्। वस्तुतः श्रीमतीगान्धीमहाभागा विज्ञानमेकं पृथक् साध्यं मन्वानापि सहैव तन्मानवस्य सार्वभौमविकासस्यैकं बलवत्साधनं सम्पादयितुं विशिष्य ध्यानमदात्। तदर्थं स्वदेशे १३० शोधसंस्थानानि, ११९ विश्वविद्यालयाः, १५० क्षेत्रीया आभियान्त्रिकमहाविद्यालया, १०० चिकित्सामहाविद्यालयाः, ३ केन्द्रीय-तान्त्रिकसंस्थानानि, ३५० प्रौद्योगशिक्षणमहाविद्यालयाः कार्यं कुर्वन्ति। प्रतिवर्षमत्र सार्द्धलक्षमिता वैज्ञानिकास्तन्त्रविदश्च सुसज्जा भवन्ति। तथास्माकं सविधे सम्प्रति त्रिंशल्लक्षमिता वैज्ञानिका आभियन्त्रिकाश्च विद्यन्ते। विज्ञानविषये तयोक्तमासीत्—

"साम्प्रतिक-मानवस्य निकटे न केवलं विनाशकारिणी शक्तिरेवास्ति, अपि तु प्रारम्भादेव तस्य निर्माणकारिणी शक्तिरपि तेन प्राप्ताऽस्ति। तस्य समीपे विज्ञानस्य प्रौद्योगिक्याश्चोपकरणान्यागतानि सन्ति। स नक्षत्राणि यावदुपयाति। अतो नाहमस्मि हताशा। यतो हि शान्तिः समस्तस्य विश्वस्य जनसाधारणस्य सामूहिक्या कामनया विमुखीभवितुं न शक्ष्यति।" इति।

श्रीमत्या इन्दिरागान्धीमहाभागाया महत्सु कार्येष्वार्थिकनीतिंस्तथा तस्याः क्रियान्वयनं चावलोक्यते चेत् तदपीयन् महद् व्यापकं च विद्यते येन सा जगत्यां महतीषु व्यक्तिषु नामाङ्किता स्थास्यति। चतुर्दश महतीनां धनागारिकाणां राष्ट्रियकरणं कृषिमुद्योगं प्रति च तासामुन्मुखीकरणं तया सम्पादितम्। उद्यमशीलेभ्यस्तरुणेभ्य आर्थिकसाहाय्यदानेन साधनहीनेभ्यो वित्तविरहितेभ्यश्चार्थिकसहायता-प्रदानेन तेषामुन्नतेर्द्वाराण्युद्घाटितानि। राज्ञां विशेषाधिकारसमाप्तिवैंयक्तिकसौविध्यराशिप्रदाननिरोधावपि तद्विषये स्पृहणीयावास्ताम्। देशे खनिजतैलस्य नैयून्यं निराकर्तुं गवेषणा, ऊर्जाया उपलब्धये परमाणुशक्तेर्विकासः, साम्प्रतं च सौरतापाद् वायोः, समुद्रस्य तरङ्गेभ्यो गोमय-वाष्पेणोल्करादिभ्यश्चोर्जाप्राप्तेः सफलाः प्रयोगाः सम्पन्नाः सन्ति तेभ्यो यथायथं सौविध्यमपि लभ्यते। शान्तये

परमाणुशक्तेः परीक्षणं, व्योमविज्ञानक्षेत्र आर्यभटस्य तथा इन्सैट-उपग्रहस्य स्थापनं तथा प्रथमस्य भारतीयस्य श्रीराकेशशर्मणोऽन्तरिक्षयात्रा चेति महत्य उपलब्धयो विद्यन्ते।

१९६२ ई० वर्ष एव परमाणूर्जाविभागस्यान्तर्गतमन्तरिक्ष-कार्यक्रमं बलवन्तं विधातुं **'इंकास्पर'**नाम्ना संस्था सङ्घटिता तथा **'थुम्बा-राकेट-प्रक्षेपण-केन्द्र'**स्य स्थापनाऽक्रियत। ततः परं श्रीमत्या इन्दिरागान्धीमहाभागायाः शासनकाले प्रथमो भारतीय उपग्रह आर्यभटः सोवितसङ्घस्य साहाय्येनान्तरिक्षे प्रक्षेपितः। तदनन्तरं **'भास्करः प्रथमो भास्करो द्वितीयो रोहिणी'**-प्रभृतय उपग्रहा अपि प्रेषितास्ते पूर्णतया भारतीया एवासन्। **'एपल'**-नामको भू-उपग्रहो जून १९८१ ई० वर्षेऽन्तरिक्षं प्रेषितस्तत एव च **'इंसेट'**-युगस्यारम्भः सञ्जातः। सेयं परम्परा प्रतिवर्षं वर्धत एव। साम्प्रतिकविज्ञानस्येयं गवेषणा महाभारतेऽभिमन्यु-महर्ष्यष्टावक्रयोश्चर्चाकालादेव भारते प्रवृत्तेति मन्यते। एवमेवान्येष्वपि पर्यावरण-दुर्लभ-जीव-जन्तु-रक्षा-सागरतलात् तैलसम्प्राप्ति-बहुधात्विक-पिण्ड-सङ्ग्रह-प्रभृतिकार्येषु साफल्येन भारतीया वर्धन्त इति तस्या एव दूरदृष्टेः फलं विद्यते। सुदूरे दक्षिणध्रुवस्थले हिममहाद्वीपान्टाकार्टिके भारतीयानामधिकारस्थापनाय तथोपयोग्यनुसन्धान-व्यवस्थायै वैज्ञानिकानां दलचतुष्टयं प्रेषितं तेन च तत्राधारशिविरञ्च स्थापितमिति।

भूमेर्वाऽन्तरिक्षस्य च धरणितलस्यास्तु वा योजना या,
वैज्ञानिक्यार्थिकी वा भवतु निजभुवः प्रोन्नतेः साधयित्री।
राष्ट्रक्षेमाय तां तां प्रखरगतिमतीं संविधातुं सयत्ना,
मान्या देवीन्दिरा साऽप्यहरहरकरोत् स्वीकृतां शीघ्रमेव ॥२३॥

सा हि महाभागा विदेशनीत्या भारत-सोवियतसन्धिं सुदृढमकार्षीत्। बांगलादेशस्य स्थापनायां सहयोगमदात्। एशियामहाद्वीपस्य क्रीडामहोत्सवायोजनं व्यूह-निरपेक्षराष्ट्राणां शिखरसम्मेलनं चापि तस्या भारतीयविदेशनीतेः प्रशस्तेः पोषके अभूताम्। प्रतिरक्षानीतावपि सा महाभागाऽतीव सावधानतया विकासाय प्रायतत। पञ्चाशद्वर्षेभ्यः शैथिल्यं प्राप्तां प्रतिरक्षानीतिं पुनरुन्नमय्य श्रीमतीगान्धी शनैः शनैर्नवीनैरायामैस्तामवर्धयत्। सैन्यशक्ति-वर्धनाय जल-स्थल-नभसां सैन्यदलानि सज्जितानि। शस्त्रास्त्रोपकरणानि वायुयानानि च यथावसरमावश्यकतानुसारं सङ्गृहीतानि। तेषामेव परिणाम आसीत् पाकिस्तानयुद्धे विजयः। सीम-सुरक्षा-व्यवस्था सुदृढतां नीता। तस्याः प्रधानमन्त्रित्वकाल एवास्माकं देशः प्रायेण सुरक्षायामात्मनिर्भरोऽभवत्।

श्रीमतीन्दिरागान्धी महाभागा सर्वा अपि राजनीतिकीः प्रक्रिया यथायथं प्रवर्तयन्त्यपि स्वदेशस्य प्राचीनां परम्परां न व्यस्मरत्। साम्प्रदायिक-समन्वयाय तथा धार्मिक-सहिष्णुतायै सा स्वयं दृष्टान्तभूताऽवर्तत। देशस्य सर्वाऽपि जातिर्धर्मैः

सम्प्रदायो वर्गो वा तस्यै समानमादरपात्रमभूत् । सांस्कृतिकं प्रत्येकं क्षेत्रं सा समुन्नतिमद् विधातुं द्रष्टुं च नवनवानामायामानां विस्तृतये सर्वकारपक्षतो धर्मनिरपेक्षभावनया साहाय्यमदात् । सर्वा अपि देशस्य भाषा विकासाय प्रेरिताः । साहित्यिका लेखकाः कवयश्च सम्मानिताः । धर्मे प्रगाढामास्थां धारयन्ती सा भारतस्य यस्मिन् कस्मिन्नपि क्षेत्रे गच्छति स्म, तत्र वर्तमानानां पुण्यस्थलानां पुण्यात्मनां च दर्शनायावश्यं गच्छति स्म ।

'संस्कृतिः संस्कृताश्रिता' **'भारतस्य प्रतिष्ठे द्वे संस्कृतिः संस्कृतं तथा'** **'कथं भविष्यति विना संस्कृतं संस्कृतिशीलो लोक'**—इत्यादि नैकासामभियुक्तोक्तीनां तात्त्विकार्थं स्वीकुर्वतीव श्रीमतीन्दिरागान्धीमहाभागा भारतीयसंस्कृतेरभिरक्षणप्रवर्धन-सम्पोषणैः सहैवान्या भारतीया भाषाः पुष्णन्ती **संस्कृत-भाषायाः** संरक्षणायाभिवर्धनाय पोषणाय च विविधान् शासकीय-सहयोगानाविरभावयत् । **'संस्कृतं भारतस्य जीवन'** मिति धिया पञ्चवार्षिकीषु योजनासु क्रमशो द्रव्यराशेर्वर्धनेन विशिष्टानां संस्कृतसंस्थानानां प्राच्यग्रन्थागाराणां ग्रन्थप्रकाशनानां विद्वत्सम्मानानां संस्कृतविश्वविद्यालयस्थापनानां विद्यापीठानां महाविद्यालयानां विद्यालयानां च संरक्षणोपक्रमैश्च विधीयमानाः प्रयासा अवश्यमेव तस्या महाभागाया एव सुदृष्टेः परिणामाः सन्ति ।

सा हि बहुधा कथयति स्म—

"जगति मानवा द्विविधा भवन्ति, तेषु केचन तमस आवृतौ सत्यां तमो निन्दयितुं प्रवर्तन्ते परमन्ये तमो न निन्दयन्ति किन्तु तस्याग्रे ज्योतिष एकं लघुतमं दीपं ज्वालयन्ति ।"

वस्तुतः सा ज्योतिर्दीपं प्रज्वाल्य तमो निरासाय नितरां प्रायस्यत् प्रान्ते चात्मन उत्सर्गेण महान्तं दीपं ज्वालयित्वा भारतीयानां समुन्नतये ऽपूर्वं प्रकाशमास्तीर्य दिवं प्रस्थिता । अद्य समग्रं राष्ट्रं तस्या महाभागायास्त्यागान् तपस्याः कर्तृत्वानि च स्मारं स्मारं तां प्रति कृतज्ञतामावहति न च विस्मरिष्यति कदापि तया सर्वात्मना विहितां राष्ट्रसेवामित्योम् ।

जयतु जयतु राष्ट्रं भारतं भा-रतं मे,
जयतु जयतु भव्या भारतीया प्रजा च ।
जयतु जयतु नित्यं मान्या संस्कृतिर्विश्ववारा,
जयतु जयतु सर्वदैवेन्दिराऽपि ॥२४॥
लोके विद्वद्भिराख्यातं 'कीर्तिर्यस्य स जीवति' ।
तथैवेयं चिरं जीयाद् 'इन्दिरा-कीर्ति-कौमुदी' ॥२५॥

—०—

कविवंश-परिचयः शुभाशंसा च

'नौसालपुर-थण्या'स्थाः शेखावाटी-समीपगाः ।
पूर्वजा यस्य दुष्काल-प्रभावान् 'मेड़िता' श्रिताः ॥१॥

ततो नन्दावतामेताः पण्डिता 'राम'-नामकाः ।
ते पुनः राजसम्मानात् प्रतापगढ़मागताः ॥२॥

राजस्थानस्य राज्येषु 'प्रतापगढ़'—नामकम् ।
राज्यमासीत् 'मन्दसौर'—निकटस्थं तदुत्तमम् ॥३॥
मानो-खुशाल-लालाजी-चौखा-दौरोजि-संज्ञिताः ।
अभूवंस्तेषु दौराजीरवाप तनयत्रयीम् ॥४॥

तस्यां च धनराजाख्याः पण्डितः सुकविः पटुः ।
श्रीराजपण्डितपदं लेभे तत्र गुणान्वितः ॥५॥

तत्र श्रीभगवानजीति विबुधो ज्योतिर्विदामग्रणी-
रासीद् गुर्जरगौड-विप्रतिलको राज्ञा सुसम्मानितः ।
तस्याभूदथ 'नाथुलाल' इति सन्नामा सुतः पण्डितो,
विद्वन्मण्डन-मण्डनो गणकराड् भक्तः शिवाराधकः ॥६॥

'कृष्णलाल-रमाकान्त'-नामानौ तत्सुतौ शुभौ ।
अभूतां शास्त्रनिष्णातौ ज्योतिःशास्त्रविचक्षणौ ॥७॥

श्रीकृष्णलालस्तु तयोर्विरक्तो, विहाय संसारगतं प्रपञ्चम् ।
संन्यस्तवान् विज्ञवरोऽथ देवीकृपाप्रसादाप्तवरः सुसिद्धः ॥८॥

पुत्रैः पञ्चभिरञ्चितो भुवि रमाकान्ताभिधो विद्वरः,
साहित्यादि-सुशास्त्रवित् कविवरः पंचाङ्गकर्ता पटुः ।

तत्पुत्रः प्रथमः कविर्विनयवान् श्रीरुद्रदेवाभिधो,
नानाग्रन्थविधानवर्धितमतिर्दैवीं गिरं सेवते ॥९॥

सीताऽम्बा यस्य, तातो गणक-गणवरः 'श्रीरमाकान्तशर्मा',
विप्रः शाण्डिल्यगोत्रो 'दशपुर'—भुविजो देववाग्भक्तियुक्तः।

दाक्षायण्याः पदाब्जश्रितवरशरणो देहलीस्थः स चैनां,
चम्पूं चित्वा चरित्रं रुचिरमरचयद् 'रुद्रदेवत्रिपाठी' ॥१०॥

विशद-चरितमार्या ! 'इन्दिरा'याः सुकीर्तेः,
सुर-गिरि विनिबद्धं 'कौमुदी' — रूपमेतत् ।

विलसतु मनुजानां देशभक्तिं श्रितानां,
हृदय-भुवि समन्ताद् भासमानं स-मानम् ॥११॥

स्वातन्त्र्यपूर्व-सङ्घर्षं स्वातन्त्र्याप्त्युत्तरोन्नतिम् ।
वर्णयन्ती मुदं दत्ताम्-'इन्दिरा-कीर्ति-कौमुदी' ॥१२॥

★

"इन्दिरा-कीर्ति-कौमुदी"-गत—

श्लोकानामनुक्रमणिका

★